गीता सटीक



नं० १८

नं. १८६क

गीता टीका तत्त्वप्रकाशः

२१५ पत्र

टीकाकार:

राजानक लक्ष्मीराम:

5383

142 double
143 MISSING
F. = 215.
Complete

गी॰टी॰ ॐ श्रीगणेशाय नमः ॐ नमः सरस्वत्यै ॥
१ ॐ प्रीत्यै स्यातां हरिहरौ विकटैककर्मणीत्यन्यैके
कत्र तनौ लीनौ प्राणापानाविवात्मनि ॥ उदित
येयत्र च संसमेति प्राणो रविः शीतकरोप्यपा
नः अवेत्य यदूर्ध्वमुपैति योगी महः किमप्येत
दुपास्महे तत् मनः समाधाय विहाय चेष्टा
धाद्वयं महिम्नतिर्विचार्या मतस्य कस्यापि विहिना
त्रपक्षपातः कृतः श्रीसमतानुसारात् ॥ इह
खलु परमकारुणिकः श्रीभगवान्वदेवशृङ्गव
तीर्णो देवकीनन्दनः कृष्णाभिधानः संसारिपु
रुषवर्गोजिहीर्षया सर्वजनप्रसिद्धनिरोधयो
गविलक्षणमलौकिकं कुर्यानेपि समहितव
लक्षणं सिद्धवर्गाविद्धितं योगं तद्भूमिका स्वत्र
त्वप्राप्तिपर्यन्ता लोकेपि प्रकाशयितुमिच्छु
रधिगतात्मबोधस्यापि शोकमोहेन विस्मृत
प्रत्यवमर्शस्यार्जुनस्य स्मृतिचानप्रस्तावनया
श्रीगीताख्येरहस्यं सकलदर्शनसूत्रस्थानी
यमुपदेशसर्वस्वं व्याजहार अस्य च योगस्य
लोकोत्तरत्वं स्वयमेव भगवानग्रे वक्ष्यति इमं
विवस्वते योगमित्यत्र एतस्य योगस्य लक्ष



णं संक्षेपेण दर्शनान्तरे दर्शितम् तथा हि उ
त्पन्नतावलेन तत्त्वविकासस्वरूपांसस्वरूपगाल्लिष्ठ
त् स्वयमुपस्तुतेंद्रियार्थातिमज्ञानरश्मियो
योगीप्रबोच्छलितरूपाविकसरतराप्रवुद्ध
बुद्धीनाम् सिद्धाः स्थिताः सदास्यांसानरताः
परा च मुद्देषेतित्वतावद्गालितः शास्थितस्य धृ
तराष्ट्रस्य लब्धदिव्यदृष्टिः समाधिसमीपस्थं
संजयं प्रति युद्धतां कुरुपांडवसैन्यानां कु
रुक्षेत्रप्रतिष्ठितानां तत्र प्रसंगेन वैशम्पा
यनः श्रोतारं जनमेजयमभिलक्षीकृत्य भगव
द्गीताः प्रश्लोकमाह यथा ॥ धृतराष्ट्र उवाच
धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः मा
मकाः पाण्डवाश्चैव किमकुर्वत संजय ॥ १ ॥
हे संजयेति संबोधनं रागद्वेषादिदोषान्सम्य
ग्जितवानसीति कृत्वा निर्व्याजमेव कथनी
यं त्वयेति सूचनार्थं धर्मक्षेत्रे धर्मबीजस्योत्प
त्तिस्थाने कुरुक्षेत्रे तन्नाम्नि देशे विशेषे योद्धुका
माः समवेता मिलिता मामका मदीयास्तु योध
नादयः किमकुर्वत किं कृतवंतः धर्मक्षेत्रे इ
ति उत्पन्नधर्ममतयो युद्धं विनैव पांडवेभ्यो रा

ज्यंकिंस्वित्मासमर्थयेतुरित्येवंव्यंजनार्थम् ॥
॥ संजयउवाच दृष्ट्वातुपांडवानीकंव्यूढं
दुर्योधनस्तदा आचार्यमुपसंगम्यराजावच
नमब्रवीत् २ ॥ ॥ तदातुतस्मिन्समयेराजा
दुर्योधनः पांडवानांसैन्यंव्यूढंचक्रादिव्यूहर
चनयास्थितंदृष्ट्वाधनुर्विद्योपदेष्टारंद्रोणाचा
र्यमुपसंगम्यसमीपंगत्वावचनंवक्ष्यमाणंवा
क्यमवोचत् किंतदित्याहनवभिःश्लोकैः २ ॥
पश्यैतांपांडुपुत्राणांआचार्यमहतींचमूं व्यू
ढांद्रुपदपुत्रेणतवशिष्येणधीमता ॥ ॥
हेआचार्यपांडवानांमहतींसप्ताक्षौहिणीपरि
मितांसेनांपश्यकीदृशींतवशिष्येणद्रुपद
पुत्रेणधृष्टद्युम्नेनधीमताव्यूहविचक्षणः ॥ न्या
सादौकुशलेनव्यूढांव्यूहरचनयास्थापितां
किंच ३ ॥ ॥ अत्रशूरामहेष्वासाभीमार्जु
नसमायुधि युयुधानोविराटश्चद्रुपदश्चम
हारथः ॥ ॥ अत्रास्यांसेनयायुद्धेभीमसेना
र्जुनाभ्यांतुल्यास्तथामहान्तःपौरैर्नश्रीकर्तुम
शक्याइष्वासाधनूंषियेषांतादृशाबहवःशू
रासंतिकेतेइतिनामनिर्देशेनाह युयुधानः

सात्यकिः विराटनामा द्रुपदनामा च महारथ
इति प्रत्येकं विशेषणम् महारथलक्षणं चो
क्तम् एको दश सहस्राणि योधयेद्यस्तु धन्वि
नाम् अस्त्रशस्त्रप्रवीणश्च महारथ इति स्मृ
तः अमितान्योधयेद्यस्तु संप्रोक्तोतिरथस्तु
सः रथी त्वेकेन यो युध्येत्तन्यूनोर्धरथो मत इ
ति तथा ४॥ ॥ धृष्टकेतुश्चेकितानः का
शिराजश्च वीर्यवान् पुरुजित्कुंतिभोजश्च
शैब्यश्च नरपुंगवः॥ ॥ धृष्टकेतुरितिना
मत्रयस्य वीर्यवानिति विशेषणम् पुरुजि
दित्यादिनामत्रयस्य नरपुंगव इति विशेषणं
नरपुंगवो नरश्रेष्ठः तथा ५॥ ॥ युधामन्यु
श्च विक्रांत उत्तमौजाश्च वीर्यवान् सौभद्रो द्रौ
पदेयाश्च सर्व एव महारथः॥ ॥ विक्रांतः
शूरो युधामन्युनामाः तथा वीर्यवान् बलयु
क्त उत्तमौजा इति नामा च सौभद्रोभिमन्युः
द्रौपदेया द्रौपदीपुत्राः प्रतिविन्ध्यादयः पंच
चकारादन्येपि एते सर्वे महारथाः किंच ६
॥ अस्माकं तु विशिष्टा ये तान्निबोध द्विजोत्त
म नायका मम सैन्यस्य संज्ञार्थं तान्ब्रवी

गी॰टी
३

मिते ॥ ॥ ततःपद्यांतरे अस्माकंपार्तेराष्ट्रा
णांयेविशिष्टाःश्रेष्ठाःसंतिहेद्विजोत्तमतान्नि
बोधमद्वचनादवधारय येचममसेनायांनाय
कानेतारोमुख्यास्तान्संज्ञार्थंसम्यग्ज्ञानार्थंत
भ्यंब्रवीमितान्वेवाह ॥ ७ ॥ भवान्भीष्मश्च
कर्णश्चकृपश्चसमितिंजयः अश्वत्थामाविक
र्णश्चसोमदत्तिस्तथैवच ॥ ॥ आदौतावद्भ
वांस्त्वमेवश्रेष्ठः तथाभीष्मपितामहःकर्णःकृ
पाचार्यश्चसकिंविधःसमितिंजयःयुद्धजयन
शीलःतथाश्वत्थामाविकर्णनामासोमदत्ति
र्भूरिश्रवाः तथैवचान्येपिसंतीत्यर्थः अत्रज
यद्रथइतिपाठांतरम् ॥ ८ ॥ अन्येचबहवः
शूरामदर्थेत्यक्तजीविताः नानाशस्त्रप्रहर
णाःसर्वेयुद्धविशारदाः ॥ ॥ अन्येपिभग
वदत्तशल्यकृतवर्मादयोबहवःशूराःसंति
किंविधःमदर्थेमन्निमित्तंत्यक्तजीवितपित्य
क्तमध्यवसिताःनानाशस्त्रैःप्रहारिणःसर्वे
युद्धकुशलाःततः ॥ ९ ॥ अपर्याप्तंतदस्मा
कंबलंभीष्माभिरक्षितम् पर्याप्तंत्विदमेते
षांबलंभीमाभिरक्षितम् ॥ ॥ तत्रासिद्ध

मस्माकं बलं भीष्मेणाकुरुवृद्धेन नीतिकुश
लेन सर्वतो रक्षितम् चापर्याप्तमलं भावावि
षयमतिप्रभूतं च भवति एकादशाक्षौहि
णीबहुलत्वात् तः एतांतरेवेदं परिदृश्यमान
मेतेषां पांडुपुत्राणां सैन्यं भीमेन नीत्यनभिज्ञे
न युद्धविद्याहीनेनाभिरक्षितं च पर्याप्तमलं
भावगोचरं परिमितं च भवति सप्ताक्षौहिणी
परिमितत्वात् तस्माद्भवद्भिरेवं वर्तितव्यमि
त्याह १० ॥ अयनेषु च सर्वेषु यथाभागम
वस्थिताः भीष्ममेवाभिरक्षंतु भवंतः सर्व ए
व हि ॥ ॥ यथाभागं व्यूहविभागमनति
क्रम्य संतः सर्व एव भवंतो वीराः सर्वेष्वयनेषु
वीथिषु कल्पास्तभीष्ममेव सर्वसैन्याधिष्ठान
मभिरक्षंतु शत्रुकृतप्रहारेभ्यः पालयंतु एत
त्संवादं नरपव ११ ॥ तस्य संजनयन्हर्षं कु
रुवृद्धः पितामहः सिंहनादं विनद्योच्चैः शंखं
दध्मौ प्रतापवान् ॥ ॥ कुरुवृद्धः पिताम
हो भीष्मः प्रतापवान् सिंहस्येव दनादमहता
स्वरेणोच्चैर्विनद्य कृत्वा शंखं दध्मौ वादितवान्
प्रतापवतस्य राज्ञो दुर्योधनस्य हर्षं जनयन्

किंच १२ ॥ ततः शंखाश्च भेर्यश्च पणवानक
गोमुखाः सहसैवाभ्यहन्यंत स शब्दस्तुमुलो
ऽभवत् ॥ ॥ ततो भीष्मशंखवादनानन्तरं तत्क्ष
णमेवाभिहन्यन्त वादिताः स शंखादिशब्दस्तु
मुलो दारुणोऽभवत् किंच १३ ॥ ततः श्वेतैर्ह
यैर्युक्ते महति स्यन्दने स्थितौ माधवः पांडव
श्चैव दिव्यौ शंखौ प्रदध्मतुः ॥ ॥ ततः शंखश्र
वणानन्तरं दिव्यावप्राकृतौ अन्यत्स्थम् किं
च १४ ॥ पंचजन्यं हृषीकेशो देवदत्तं धनं
जयः पौंड्रं दध्मौ महाशंखं भीमकर्मा वृकोद
रः अनन्तविजयं राजा कुंतीपुत्रो युधिष्ठिरः
नकुलः सहदेवश्च सुघोषमणिपुष्पकौ ॥
॥ श्रीकृष्णः पंचजन्यनामकं शंखं अर्जुनो दे
वदत्ताख्यं घोरकर्मा भीमसेनः पौण्ड्राख्यं शं
खं दध्मौ अनन्तविजयाख्यं राजा युधिष्ठिरो द
ध्मौ नकुलः सुघोषाख्यं सहदेवो मणिपुष्प
नामकम् १६ ॥ काश्यश्च परमेष्वासः शि
खंडी च महारथः धृष्टद्युम्नो विराटश्च सात्य
किश्चापराजितः ॥ ॥ उत्कृष्टधन्वा काश्यः
काशिराजः महारथः शिखण्डी च धृष्टद्युम्नो

विराटोऽपराजितो विपक्षैरजितः सात्यकि
श्च पृथक्पृथक् शंखान्दध्मुरिति परेणान्व
यः १७ ॥ द्रुपदो द्रौपदेयाश्च सर्वशः पृथि
वीपते सौभद्रश्च महाबाहुः शंखान्दध्मुः
पृथक्पृथक् ॥ ॥ हे महीपते धृतराष्ट्र
द्रुपदो द्रौपदीपुत्रा महाभुजोऽभिमन्युश्च स
र्वशः प्रत्येकं शंखान्दध्मुः १८ ॥ स घोषो
धार्तराष्ट्राणां हृदयानि व्यदारयत् नभश्च
पृथिवीं चैव तुमुलो व्यनुनादयन् ॥ ॥
स पांडवानां घोरः शंखशब्दो द्यावापृथिव्यौ
प्रतिशब्दं कारयन् धृतराष्ट्रसम्बन्धिनां भीष्मा
दीनां हृदयानि विदारितवान् हृदयविदा
रणतुल्यां व्यथां जनितवानित्यर्थः १९ ॥
अथ व्यवस्थितान्दृष्ट्वा धार्तराष्ट्रान्कपिध्व
जः प्रवृत्ते शस्त्रसंपाते धनुरुद्यम्य पांडवः
हृषीकेशं तदा वाक्यमिदमाह महीपते ॥ ॥
अथ शब्दोपरमणानन्तरं धार्तराष्ट्रान्युद्धार्थं
व्यवस्थितान्सन्नद्धान्दृष्ट्वा कपिध्वजः पांडवो
र्जुनः शस्त्राणां संपाते संयोगे च प्रवृत्ते प्रवृ
त्ते सति गांडिवं धनुरुद्यम्य २० ॥

हृषीकेशंतदावाक्यमिदमाहमहीपते
सेनयोरुभयोर्मध्येरथंस्थापयमेच्युत ॥
॥ हेमहीपतेधृतराष्ट्रतदाश्रीकृष्णमिदं
वक्ष्यमाणंवाक्यमुवाचहेअच्युतममरथ
मुभयोःसेनयोर्मध्येस्थापयइत्यर्जुनमा
ह २१॥ यावदेतान्निरीक्षेहंयोद्धुकामा
नवस्थितान् कैर्मयासहयोद्धव्यमस्मिन्र
णसमुद्यमे॥ ॥ यावद्यतोहमेतानेतान्स्व
जान्युयुत्सून्वीरान्प्रणाभिकृतः प्रास्मिन्यु
द्धेयोगेकःसहमेयायोद्धव्यंयुद्धंकर्तव्यम
मित्येतद्दर्शनिरीक्षेकिंच २२॥ योत्स्यमा
नानवेक्षेहंयएतेत्रसमागताः धार्तराष्ट्र
स्यदुर्बुद्धेर्युद्धेप्रियचिकीर्षवः॥ ॥ एत
तेदुष्टबुद्धेर्दुर्योधनस्ययुद्धेप्रियंविजयल
क्षणंकर्तुकामाअत्रयुद्धस्थलेमिलितास्ता
न्ययुत्सूनहमवेक्षे २३॥ संजयउवाच
एवमुक्तोहृषीकेशोगुडाकेशेनभारत
सेनयोरुभयोर्मध्येस्थापयित्वारथोत्तमम्
भीष्मद्रोणप्रमुखतःसर्वेषांचमहीक्षि
ताम् उवाचपार्थपश्यैतान्समवेतान्कु

हनिति ॥ ॥ हे भारत धृतराष्ट्र गुडाका
निद्रा तस्या ईशेन जितनिद्रेणार्जुनेन एवं
यथोक्तः हृषीकेशः श्रीकृष्ण उभयोर्मध्ये उत्तमं रथं
संस्थाप्य भीष्मद्रोणयोः सर्वेषां राज्ञां च संमु
खेर्जुनमित्युवाच इतीति किम्‌ हे पार्थ एता
न्कुरून्भीष्मादीन्समवेतान्कुरून्पश्येति २५ ॥
तत्रापश्यत्स्थितान्पार्थः पितॄनथ पितामहा
न्‌ आचार्यान्मातुलान्भ्रातॄन्पुत्रान्पौत्रान्सखीं
स्तथा श्वशुरान्सुहृदश्चैव सेनयोरुभयोर
पि तान्समीक्ष्य स कौन्तेयः सर्वान्बन्धूनव
स्थितान्‌ कृपया परयाविष्टो विषीदन्निद
मब्रवीत्‌ ॥ ॥ तत्रोभयोः सेनयोः पितॄ
निन्‌ आविशिष्यामः इदं वक्ष्यमाणं २७ ॥
अर्जुन उवाच दृष्ट्वेमं स्वजनं कृष्ण युयुत्सुं स
मुपस्थितं सीदन्ति मम गात्राणि मुखं च प
रिशुष्यति ॥ ॥ इमं युद्धभूमौ समुपस्थि
तं योद्धुकामं बन्धुजनं दृष्ट्वा मम गात्राणि सी
दन्ति विशीर्यन्ते शिथिलीभवन्ति मुखं च प
रितः शुष्कतामापद्यते २८ ॥ वेपथुश्च
शरीरे मे रोमहर्षश्च जायते गांडीवं स्रंस

नेहत्वाकृचैवपरिदह्यते ॥ ॥ ममश
रीरेकम्पोरोमाञ्चजायते गांडीवंपतृम्हस्त
स्ताद्भ्रश्यतित्वक्चशोकाग्निनासन्तप्यते
२९ ॥ नचशक्नोम्यवस्थातुंभ्रमतीवच
मेमनः निमित्तानिचपश्यामिविपरीतानि
केशव ॥ ॥ अहमवस्थातुंशरीरंधारयि
तुमपि नशक्नोमिमेमनोभ्रमतीवावस्मा
दप्रिवप्नोतिहेकेशवनिमित्तानिभावि
सूचकानिशकुनानिविपरीतान्यनिष्टसूच
कानिचपश्यामिउपलभेतथा ३०॥ नचश्रे
योनुपश्यामिहत्वास्वजनमाहवे नकांक्षे
विजयंकृष्णनचराज्यंसुखानिच ॥ ॥ यु
द्धेस्वजनंहत्वाश्रेयःकल्याणमनुपश्या
उत्तरकालेनपश्यामिनतर्कयामि तस्मान्न
कांक्षेइतिहेकृष्णविजयंराज्यंविषयसुखा
निनचप्रार्थये ३१॥ किंनोराज्येनगोविंद
किंभोगैर्जीवितेनवा ॥ गोभिर्वेदवाक्यैःप
रमात्मस्वरूपेणविद्यतेलभ्यतेइतिगोविंद
नोस्माकंराज्येनकिंभोगैःकिंजीवितेनवाकिं
चिफलमित्यर्थः अत्रहेतुमाहद्वाभ्यां ॥

येषामर्थेकांक्षितंनोराज्यंभोगासुखानिच
आचार्याः पितरः पुत्रास्तथैवचापितामहाः
मातुलाः श्वशुराः पौत्राः स्यालाः सम्बन्धिन
स्तथा ॥ ॥ येषांबन्धूनांकृतेराज्यंभोगावि
षयाः सुखानिविषयोपभोगजन्याहर्षाश्च
नोस्माकंकांक्षितंवांछितंतइमेबन्धवःप्राण
भूतानिधनानिसर्वस्वभूतान्प्राणान्धनानिचत्यक्त्वा
णानसह्न्यनान्यर्थीत्यक्त्वाउपेत्ययुद्धेवास्थि
ताः तान्बन्धून्विशिनष्टि आचार्याइत्यादिना
सम्बन्धिनोविवाहादिसम्बन्धिनोविवाहादि
सम्बन्धयुक्ताः अतएव ३३ ॥ एतान्नहंतुमि
च्छामिघ्नतोपिमधुसूदन अपित्रैलोक्यराज्य
स्यहेतोःकिंनुमहीकृते ॥ ॥ एतानाचार्या
दीन्घ्नतोमारयतोपित्रैलोक्यराज्यस्यहेतोर
पिनरपितत्राप्यमापितेच्छामिकिंपुनर्वक्त
व्यंमहीकृतेमहीमात्रप्राप्त्यैहंतुमिच्छामि
३४ ॥ निहत्यधार्तराष्ट्रान्नःकाप्रीतिःस्याज्ज
नार्दन पापमेवाश्रयेदस्मान्हत्वैतानाततायि
नः ॥ ॥ हेजनार्दनधार्तराष्ट्रान्निहत्यनोस्मा
कंकाप्रीतिःस्यात्किंसुखंस्यान्नकिमपीति

गी॰टी॰
७

ननु च अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः । क्षेत्रदारहरश्चैव षडेते ह्याततायिनः इति स्मरणादेतेषां सर्वथाततायित्वात् आततायिनमायान्तं हन्यादेवाविचारयन्
नाततायिवधे दोषो हन्तुर्भवति कश्चनेत्युक्तेः
आततायिवधे हन्तुर्दोषाभावप्रतीतेर्हन्तव्या
एवैत इति तत्राह पापमिति एतानाततायिनो हत्वास्थितानस्मान्पापमेवाश्रयेत्
न हि दृष्टप्रयोजनम् एतोनहिंस्यादिति
धर्मशास्त्रादाततायिनं हन्यादित्यर्थशास्त्रस्य
दुर्बलत्वात् यदुक्तं याज्ञवल्क्येन स्मृत्योर्वि
रोधे न्यायस्तु बलवान्व्यवहारतः अर्थशास्त्रात्तु
बलवद्धर्मशास्त्रमिति स्थितिः यस्मादेवं ३५ ॥
तस्मान्नार्हा वयं हन्तुं धार्तराष्ट्रान्स्वबान्धवान्
स्वजनं हि कथं हत्वा सुखिनः स्याम माधव ३६
॥ न केवलं पारलौकिकं सुखं नास्ति ऐहिक
मपि नेत्याह स्वजनो ज्ञमिति नन्वेते यथा बन्धु
वधे प्रवर्तन्ते तथा भवानपि प्रवर्ततामित्यत
आह ३६ ॥ यद्यप्येते न पश्यन्ति लोभोपहत
चेतसः कुलक्षयकृतं दोषं मित्रद्रोहे च पा
तकम् ३७ कथं न ज्ञेयमस्माभिः पापादस्मा

निवर्तितुम् कुलक्षयकृतंदोषंप्रपश्यद्भि
र्जनार्दन ३८ ॥ एतेधार्तराष्ट्रालोभेनगर्धे
नोपहतंमलिनीभूतंविवेकाभावमापन्नंचे
तोयेषांतादृशाःसन्तःकुलक्षयकृतंदोषंमि
त्रद्रोहेचपातकंयद्यपिनपश्यंतिमापश्यंत
हेजनार्दनअस्माभिःकुलक्षयकृतंदोषंप्र
पश्यद्भिःपर्यालोचयद्भिरस्मात्पापान्निवर्तितुं
कथंनज्ञेयंनिवर्तावेवबुद्धिःकर्तव्येत्यर्थः
कुलक्षयकृतंदोषमाह ३८ ॥ कुलक्षये
प्रणश्यंतिकुलधर्माःसनातनाः धर्मेनष्टेकु
लंकृत्स्नमधर्मोभिभवत्युत ३९ ॥ गोत्रपु
रुषविनाशेसतिसनातनाःपरम्पर्यागताश्चि
रंतनाःकुलधर्माःप्रणश्यंतिधर्मेषुनष्टेष्वव
शिष्टंबालादिरूपंकृत्स्नमपिकुलमधर्मोभि
भवतितिरस्करोति ३९ ॥ अधर्माभिभवा
त्कृष्णप्रदुष्यंतिकुलस्त्रियः स्त्रीषुदुष्टासुवा
र्ष्णेयजायतेवर्णसंकरः ४० ॥ हेकृष्णअध
र्माभिभवात्कुलस्त्रियोविशुद्धवंशोद्भवाःप्र
दुष्यंतिस्वैरिण्योभवंतिहेवृष्णिवंशोद्भवस्त्री
षुदुष्टासुसतीषुवर्णसंकरोजायतेवर्णस्य

8

वर्णान्तरेणामिश्रीभावः संकरः ४०॥ संकरो
नरकायैव कुलघ्नानां कुलस्य च पतन्ति पित
रो ह्येषां लुप्तपिंडोदकक्रियाः ४१॥ जातिसं
करो न केवलं कुलघ्नानां कुलहन्तृणामेवं न
रकाय भवति किन्तु कुलस्य च प्रमीतस्य पितृ
वर्गस्य च नरकाय भवति यतो ‥ षां कुलह
न्तृणां पितरः पुत्रादिक्रियाकर्तृभावाल्लुप्ताः पिं
डक्रिया उदकक्रियाश्च येषां तद्दृशाः सन्तः
स्वस्थानात्स्वर्गादेर्विभ्रष्टाः नरके पतन्ति न परं
कुलघ्नानां तत्पितॄणां च संकरदोषेण नरका
वाप्तिर्यावत्तस्माद्वाशिष्ठस्यापत्यरूपस्य बाल
कसमूहस्यापि तत्प्राप्तिर्भवतीत्याशयेनाह द्वाभ्याम्
४१॥ दोषैरेतैः कुलघ्नानां वर्णसंकरकारकैः
उत्साद्यन्ते जातिधर्माः कुलधर्माश्च शाश्वताः
४२॥ एतैः कुलनाशे सत्यधर्माभिभवादिल
क्षणैर्वर्णसंकरकारकैः कुलघ्नानां दोषैः क्ष
त्रियत्वादिजातिप्रयुक्ता धर्मास्तथा शाश्वताः
पारम्पर्यागताः कुलधर्माश्चोत्साद्यन्ते विनाश्य
न्ते तेषामाचरणं न भवतीत्यर्थः चकारादा
श्रमादयोपि गृह्यन्ते ४२॥ उत्सन्नकुलधर्मा

णोमनुष्याणांजनार्दन नरकेनियतंवासो
भवतीत्यनुशुश्रुम ४३ ॥ हेजनार्दनधर्मा
नभिज्ञानेनतदाचरणाहिनष्टकुलधर्माणांम
मादियर्माणांप्रत्यनरकेनियमेनवासःस्थि
तिर्भवतीतिवयमनुशुश्रुमअनुवारंवारंव्या
सादिभ्यःश्रुतवंतोवयम् नतुस्वाभ्यूहेनक
ल्पयामःपरितापातिशयसूचनायात्मगतमे
वार्जुनोवचनमाह ४३ ॥ अहोवतमहत्पापं
कर्तुंव्यवसितावयम् यद्राज्यसुखलोभेन
हंतुंस्वजनमुद्यताः ४४ ॥ अहोवतकष्टंव
यंकौरवपांडवभेदभिन्नाःसर्वएवमहत्पापंक
र्तुंव्यवसितानिश्चयवंतउत्साहवंतोवास्मःकिं
तन्महत्पापम् यद्राज्यसुखलोभेनहन्तुंस्वज
नमुद्यतायत्नवंतोजाताः अन्येतेसर्वेवंधव
धोयामिनोयुद्धंकरिष्यंतेवाकिंतवस्थयाविवे
किनयेत्यतःस्वाभिमतमाह ४४ ॥ यदिमा
मप्रतीकारमशस्त्रंशस्त्रपाणयः धार्तराष्ट्रार
णेहन्युस्तन्मेक्षेमतरंभवेत् ४५ ॥ यदिमाम
प्रतीकारंप्रतियुद्धमकुर्वाणमतएवाशस्त्रं
शस्त्रपाणयोधार्तराष्ट्राःसंग्रामेहन्युर्हनिष्यं

9

ति नर्हितद्धननंममक्षेमतरंअन्यन्नोहितंभ
वेत् पापस्यातिघ्नतेः ४५ ॥ संजयउवाच
एवमुक्त्वार्जुनः संख्येरथोपस्थउपाविशत्
विसृज्यसशरंचापंशोकसंविग्नमानसः ४६।
अर्जुनएवमुक्त्वाशोकेनसन्तप्तमानसः सश
रंचापंत्यक्त्वासंख्येसंग्रामेरथोपस्थेरथस्योपरि
पश्चाद्भागेउपाविशदुपविष्टः ४६ इतिश्री
भगवद्गीताटीकायांतत्त्वप्रकाशिकाख्यायां
राजानकलक्ष्मीरामविरचितायांमर्जुनविषा
दोनामप्रथमोध्यायः १ ॥ संजयउवाच
तंतथाकृपयाविष्टमश्रुपूर्णाकुलेक्षणम्
विषीदंतमिदंवाक्यमुवाचमधुसूदन १ ॥
तमर्जुनंकृपयाव्याप्तमश्रुणापूर्णेआकुले
दर्शनात्मेचेक्षणेयस्यतंतथोक्तप्रकारेणवि
षीदन्तंश्रीकृष्णइदंवक्ष्यमाणंवाक्यमुवाच
१ ॥ श्रीभगवानुवाच ऐश्वर्यस्यसमग्रस्य
धर्मस्ययशसःश्रियः वैराग्यस्याथमोक्षस्य
षण्णांभगवतीगना इंगनासंज्ञाएवमैश्वर्या
दियस्यनित्ययोगेनविद्यतेसभगवान्श्रीकृ
ष्णाभिधानउवाच ॥ कुतस्त्वाकश्मलमिदं

विषमे समुपस्थितं अनार्यजुष्टमस्वर्ग्यमकी
र्तिकरमर्जुन २ ॥ हे अर्जुन विषमे संकटे
संग्रामे त्वा त्वां इदं कश्मलं स्वधर्मे पराङ्मुख
त्वरूपोयं मोहः कुतः हेतोः समुपस्थितः मु
कीच्छातः स्वर्गेच्छातः कीर्तीच्छातो वा एवं हे
तुत्रयमपि निषेधति यत इदं कश्मलमना
र्यजुष्टं आर्यैः साधुभिर्मुमुक्षुभिर्न सेवितं तथा
स्वर्ग्यं स्वर्गाय न हितं तथेहलोके कीर्तिकरं च
त्वमाणयोपपन्यात्तस्मादेतद्धेयमेव २ ॥
क्लैब्यं मा स्म गमः पार्थ नैतत्त्वय्युपपद्यते क्षु
द्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परन्तप ३ ॥
हे पार्थ क्लैब्यं कातर्यं मा स्म गमः न प्राप्नुहि
यतस्त्वयि वीरवरे एतत्क्लैब्यं नोपपद्यते योग्यं न
भवति तस्मात्त्वं इदं तुच्छं हृदयदौर्बल्यं कात
र्यं त्यक्त्वा युद्धायोत्तिष्ठ सज्जो भव हे परंतप शत्रु
तापन नाहं कातर्येण युद्धादुपरतोस्मि किन्तु
युद्धस्यान्याय्यत्वात् ३ ॥ अर्जुन उवाच कथं
भीष्ममहं संख्ये द्रोणं च मधुसूदन इषुभिः
प्रतियोत्स्यामि पूजार्हावरिसूदन ४ ॥
भीष्मपितामहं द्रोणाचार्यौ पूजायां योग्यौ तौ

प्रति कथमहं योत्स्यामीति वक्तुमनुचितं म
धुसूदनारिसूदनेति संबोधनद्वयं शोकव्याकु
लतया अत्र हेतुमाह ४ ॥ गुरूनहत्वा हि म
हानुभावाञ्छ्रेयो भोक्तुं भैक्ष्यमपीह लोके ह
त्वार्थकामांस्तु गुरूनिहैव भुंजीय भोगान्रुधिर
प्रदिग्धान् ५ ॥ हि यतः महानुभावाः अनुभा
वः प्रभावो येषां तादृशान्गुरून्भीष्मद्रोणादी
नहत्वा महापातकरूपं परलोकविरुद्धं तद्वध
मकृत्वा इह लोके भैक्ष्यमपि क्षत्रियस्य प्रतिषिद्ध
मपि भिक्षान्नं हिंसाशून्यत्वाद्भोक्तुं श्रेयः प्रशस्य
तरं महापातकात्सकाशात्स्वल्पं पापं कि य
तापि प्रायश्चित्तेन परिहर्त्तुं शक्यत्वात् न के
वलं तद्वधे पारलौकिकं दुःखमेव यावदि
हापि शोकनिन्दात्मकं दुःखमस्तीत्या
ह हत्वेति गुरून्हत्वा इहैव लोके रुधिरेण
प्रकर्षेणादिग्धानपयशोव्याप्तत्वेन शोको
त्पादकत्वेन च शोणितालिप्तानिव अर्थकामा
त्मकान्भोगान्विषयानहं भुंजीय भोक्ष्ये यद्वा
र्थकामानिति गुरूणां विशेषणम् अर्थका
मानर्थलुब्धान् तथा च युधिष्ठिरं प्रति भीष्म

गीतम् अर्थस्य पुरुषो दासो दासस्त्वर्थो न क
स्यचित् इति सत्यं महाराज बद्धोस्म्यर्थेन
कौरवैरिति नत्वद्युद्धे मतावपि जयपराज
योः संशयात् युद्धमनर्थावहमेव भी
त्याह ५ ॥ न चैतद्विद्मः कतरन्नो गरीयो य
द्वा जयेम यदि वा नो जयेयुः यानेव हत्वा न
जिजीविषामस्तेवस्थिताः प्रमुखे धार्तराष्ट्राः
६ ॥ द्वयोर्जयपराजययोर्मध्ये नोस्माकं क
तरत्किं नाम गरीयोधिकतरं भवतीत्येतन्न वि
द्मः तदेव द्वयमाह यद्वा एतान्वयं जयेम जे
ष्यामः यदि नोस्मानेते धार्तराष्ट्रा जयेयुर्जेष्यं
तीति नन्वस्माकं जय एव श्रेयानित्यत्र दोष
माह यानेवेति यानेव हत्वा जीवितुं नेच्छामः
त एवैते धार्तराष्ट्राः संमुखेवस्थिताः तस्मात्
६ ॥ कार्पण्यदोषोपहतस्वभावः पृच्छामि
त्वां धर्मसंमूढचेताः यच्छ्रेयः स्यान्निश्चितं
ब्रूहि तन्मे शिष्यस्तेहं शाधि मां त्वां प्रपन्नम्
७ ॥ कार्पण्यमेतान्हत्वा कथं जीविष्यामः
इति दैन्यं दोषः स्वकुलक्षयकृतस्ताभ्यामुपह
तास्तिरस्कृतः स्वभावः शौर्यादिलक्षणो य

स्याच्छ्रेयइत्येवंसंदिग्धंचेतोयस्यसएवंविधःसं
स्त्वामहंपृच्छामि अतोमेयन्निश्चितंश्रेयःप्रश
स्ततरंस्यात्तद्ब्रूहि किंच अहंतेतवशिष्यःशा
सनार्हीतस्त्वत्वांप्रपन्नंशरणागतंमांशाधित्व
यत्वमेवविचार्ययद्युक्तंतत्कुर्वितिचेत्तत्राह
७ ॥ नहिप्रपश्यामिममापनुद्याद्यच्छोक
मुच्छोषणमिंद्रियाणाम् अवाप्यभूमावसप
त्नमृद्धंराज्यंसुराणामपिचाधिपत्यम् ८ ॥
तत्किमप्यहंनपश्यामियन्ममेंद्रियसंता
पकरंशोकमपनयेत् यद्यप्यहंभूमौनिष्कंट
कंसमृद्धंराज्यंप्राप्स्यामितथास्वेंद्रत्वमपिय
दिप्राप्स्यामिएवंसर्वमभीप्सितंप्राप्यापिशोका
पनोदनोपायंनपश्यामीत्यन्वयः ॥ ८ ॥
संजयउवाच एवमुक्त्वाहृषीकेशंगुडाके
शःपरंतप नयोत्स्यइतिगोविंदमुक्त्वातूष्णीं
बभूवह ९ ॥ हेपरंतपराजन्धृतराष्ट्रश्री
कृष्णमेवमुक्त्वामवोध्यनयोत्स्यइतिकथित
मुक्त्वातूष्णींबभूवहप्रसिद्धोततःकिंवृत्तमि
त्यतआह ९ ॥ तमुवाचहृषीकेशःप्रह
सन्निवभारत सेनयोरुभयोर्मध्येविषीदं

नमिदंवच १० ॥ हेभारतसेनयोरुभयोर्म
ध्येविषीदन्तमर्जुनंश्रीकृष्णइदंवचोवक्ष्य
माणमुवाच विषयाहप्रहसन्निवबोधयन्
कस्याप्यर्जुनस्यव्यामोहकल्पेनसमायाशोके
वैभवंचमत्कर्तव्यमर्जुनसुहृदयन्नितीव
शाहृप्रयोगःशोकावेगेनवशीकृतस्यातप
वविस्मृतात्मसत्यवमर्शतयानित्यत्वादितत्त्व
र्मस्यामम चिन्तयोतेर्जुनस्यस्मृतिदानाय ॥
१० श्रीभगवानुवाच अशोच्यानन्वशोचस्
त्वंप्रज्ञावादांश्चभाषसे गतासूनगतासूंश्च
नानुशोचन्तिपण्डिताः ११ ॥ अशोच्यानशो
कस्याविषयभूतानन्वशोचस्त्वंबोधयुक्तोपिसन्
मन्वशोचः अनुशोचितवानसिदृष्ट्वेमंस्वजनं
कृष्णेत्यादिनानश्वरस्यदेहस्याशोचितत्वमशो
च्यत्वान्नित्यस्यचात्मनःशोचनानर्हत्वादशो
च्यत्वम् कुतस्त्वाकश्मलमिदमित्यादिना
मयाबोधितोपिप्रज्ञावतांबहिर्भूतेनयाने
प्रज्ञायुक्तानांवाचनकथंभीष्ममहंसंख्येइ
त्यादीनियुक्तानिवचनानिप्रज्ञाभाषसेप्रत्यु
तकथयासियतोगतप्राणानन्वभूनगतासूं

अजीवतोपि बन्धून्हीना एते कथं जीविष्यंती
तिनानुशोचंति पंडिता विवेकिनः पाण्ड स द
सद्विवेकजन्या बुद्धिः संजाता अमी घ्नामिति त्व
न स्त्वं पंडितस्य शोको न युक्तः तथा हि आत्म
नस्तावद्विनाशिनो नाना शरीरेषु संचरतः
कास्य शोच्यता न च देहानां संचार एव शोच्य
ता एवं हि बाल्ययौवनादिप्राप्तावपि शोच्य
ता स्यात् अशोच्यत्वे आत्मनः स्थूलदेहवैल
क्षण्यमेवास्य तेनानुभूत सर्वं हेतुमाह ११॥
न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः न
चैव न भविष्यामः सर्वे वयमतः परम् १२॥
अहं परमेश्वरो लीलाशरीरत तु लीलावि
ग्रहस्याविर्भावे तिरोभावे वा जातु नासमि
ति नैव अपि त्वासमेवानादित्वात् न च त्वं ना
सीरपि त्वासीरेव इमे नृपा नानासन्नपि त्वा
सन्नेव मदंशत्वात् एतेन प्रागभावाप्रति
योगित्वमुक्तम् तथातः परं देहविनाशाद
नरकालं न भविष्याम इति न किंतु भविष्या
म एवात्मस्वरूपेणानित्यत्वात् एवं ध्वंसाप्र
तियोगित्वमुक्तम् देहभेदापेक्षया च बहुव

चनमुक्तंनत्वात्मभेदाभिप्रायेणाऽतःकाल
त्रयेपिसत्तायोगित्वादात्मनोऽनित्यादेहाद्वै
लक्षण्यंसिद्धम् नन्वीश्वरस्यतवजन्मादि
शून्यत्वंसत्यमेवजीवानांतुजन्मतोदेवद
नोपिजन्मनाशाविति भ्रांतिरित्यादेहजन्म
नाशाभ्यामात्मनोपिजन्मनाशावितिभ्रां
तिरित्याशंक्याह १२॥ देहिनोस्मिन्यथादे
हेकौमारंयौवनंजरा तथादेहांतरप्राप्ति
र्धीरस्तत्रनमुह्यति १३॥ देहिनोदेहाभि
मानेनजीवभूतस्यास्यात्मनःएकस्यैवसर्वदे
हेषुविभक्तेषुमूढःसर्वव्यापीसर्वभूतांतरात्मे
तियथास्मिन्स्थूलदेहेकौमाराद्यवस्थाःस्थू
लदेहनिबन्धनानतुस्वतःपूर्वावस्थानाशे
वस्थान्तरोत्पत्तौसएवाहमितिप्रत्यभिज्ञा
नात् तथैवैतद्देहनाशेतस्यैवात्मनःदेहां
तरप्राप्तिरपिलिंगदेहनिबन्धनाजातमात्र
स्यपूर्वसंस्कारेणस्तन्याप्रवृत्तिदर्शनात् अ
तोधीरोधीमान्मुह्यस्तत्रतयोर्देहनाशो
त्पत्त्योर्नमुह्यति आत्मैवजातोमृतश्चेति
नमन्यते नतुमृताज्जीवतोवाहंनशोचा

मि किंतत द्वियोगादि दुःखभाजमात्मानमे
वेति चेत्तत्राह १३ ॥ मात्रास्पर्शास्तु कौंतेय
शीतोष्णसुखदुःखदाः आगमापायिनोऽनि
त्यास्तांस्तितिक्षस्व भारत १४ ॥ मीयंते विष
या आभिरिति मात्रा इंद्रियवृत्तयः तासां स्पर्शा
विषयैः सह संबंधास्ते शीतोष्णादिप्रदा अ
न्योन्यविरोधिका आभ्यंतरभोगप्रदाः प्रकरणस्य
भवंति स त्वहतो नात्मा एतैः स्पृश्यते एवं नतु
नित्ययोगिनया मलिनीक्रियते इति व्यज्यते
ते तु त्यति विनाशवत्त्वादनित्याः अस्थिराः अत
एवोदितदशामाश्रित्य तांस्तितिक्षस्व सहस्व
आत्मावष्टंभप्रतिष्ठमात्मानीरित्यर्थः यथा
जलसंपर्कास्तु कालकृताः शीतोष्णादिप्र
यच्छंति एवमिष्टसंयोगवियोगाश्च पि सुख
दुःखादि प्रयच्छंति तेषां चास्थिरत्वात्सहनेन त
वधीरस्योचितं न तन्निमित्त हर्षविषादपार
वश्यमित्यर्थः स्वात्मपरास्पर्शात्यागेन तत्स
हनस्य महाफलत्वमित्याह १४ ॥ यं हि न
व्यथयंत्येते पुरुषं पुरुषर्षभ समदुःखसु
खं धीरं सोऽमृतत्वाय कल्पते १५ ॥ एते मात्रा

स्पर्शा यं पुरुषं धीरं तत्वज्ञं तथा समदुःखे सुखे
सुखदुःखप्राप्तौ हर्षविषादरहितं न व्यथयं
ति आत्मदर्शनात्प्रच्यावयंति स एवं विधो
ज्ञानधारादिद्वंद्वोऽमृतत्वाय मोक्षाय कल्पते
समर्थो भवति इह प्रसिद्धो प्रसिद्धमेवैतदित्य
र्थः अथोपपत्तिः सर्वमात्मात्मनस्त्वाविकीस
नं देहादेरावश्यकमभावं सामान्यतः प्रति
पादयति १५ ॥ नासतो विद्यते भावो नाभा
वो विद्यते सतः उभयोरपि दृष्टोंऽतस्त्वनयोस्त
त्वदर्शिभिः १६ ॥ स्वभावादेवासतो वस्तु
नो भावः सत्त्वा नास्ति स्वभावतः सतो नित्यस्य
भावो नास्ति नहि तयोः सदसतोः प्रकाशतम
सोरिव परस्पराविरुद्धयोः स्वभावो विपर्येति
तथा च शास्त्रम् नहि स्वभावभावानां व्या
वर्त्यैतौष्ण्यवद्रवेरिति एतयोर्द्वयोरपि तत्व
विद्भिर्वस्तुयाथात्म्यविद्भिरंतो निश्चयो दृष्ट
विज्ञानः सत्सदेवासदसदेवेति तत्र सतस्त्व
भावस्याविनाशमभावं विशेषतो निरूपयति
१७ ॥ अविनाशि तु तद्विद्धि येन सर्वमिदं
ततम् विनाशमव्ययस्यास्य न कश्चित्क

र्तुमर्हति १७ ॥ येनतत्प्रत्याभिज्ञानेन सर्व
मिदमागमापायधर्मकं देहादिकं साक्षितेन
ततं व्याप्तम् तदात्मस्वरूपमविनाशि विनाश
शून्यत्वात्तज्जानीहि तत्र हेतुमाह विनाश
मिति अस्य सत्स्वरूपस्याव्ययस्य देशकालाद्य
परिच्छिन्नत्वादव्ययस्य तद्विलक्षणो देशका
लादिपरिच्छिन्नः कश्चिद्पदार्थः ईश्वरो वा वि
नाशमभावं कर्तुं नार्हति न प्रभवति तुशब्दो
ऽसतो विशेषणार्थ अथासत्स्वभावमाह ॥
अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरिणः
अनाशिनोऽप्रमेयस्य तस्माद्युध्यस्व भारत १८
॥ नित्यस्य सर्वदैकरूपस्य शरीरिण आध्यात्मि
कसम्बन्धेन शरीरवत आत्मनः अनाशिनो
देशतः कालतो वस्तुतश्चापरिच्छिन्नस्य अ
प्रमेयस्य प्रत्यक्षादिप्रमाणैर्देहादिवदपरि
च्छेद्यस्य तदुक्तम् स्वपदात्मशिरच्छायां य
द्वल्लंघितुमीहते पादोद्देशे शिरो न स्यात्
थेयं वैन्दवी कलेति इमे सुखदुःखादिधर्म
का देहाः प्रतिक्षणमवस्थान्तरभाक्त्वात्प्रमा
णेनान्तवन्तः स्वप्नमायादेहादिवन्नाशयुक्ताः

15

अनश्चात्मतत्त्वप्रतिष्ठामाश्रित्ययुध्यस्वयुध्य
स्वेतिहिंसात्मकर्मणिप्रवर्तयतीतियन्मन्यसे
तदज्ञानविलसितमित्याह १८ ॥ यएवंवे
त्तिहन्तारंयश्चैनंमन्यतेहतम् उभौतौनवि
जानीतोनायंहन्तिनहन्यते १९ ॥ योनात्म
ज्ञाएवमकुलत्वमात्मानंहन्तारंहननक्रि
याकर्तारंवेत्तियश्चैनंहननक्रियायानकर्ता
नापिकर्मभूतः अविक्रियत्वात् अविक्रियत्वं
षड्भावविकारशून्यत्वेनदर्शयति १९ ॥
नजायतेम्रियतेवाकदाचिन्नायंभूत्वाभवि
तावानभूयः अजोनित्यःशाश्वतोयंपुराणो
नहन्यतेहन्यमानेशरीरे २० ॥ नजायतेइ
तिजन्मप्रतिषेधः नम्रियतेचेतिविनाशप्र
तिषेधः वाशब्दोचार्थे नचायंभूत्वाउत्पद्यभू
यः पुनर्भविताभवति अस्तित्वंभजते किं
त्वप्रागेवस्वतःसिद्धःसद्रूपइतिजन्मानन्त
रास्तित्वलक्षणोद्वितीयविकारप्रतिषेधः त
त्रहेतुर्यस्मादजः योहिजायतेसजन्मानन्त
रमस्तित्वंभजतेनतुयः स्वयमेवास्तिसभूयो
ऽस्तित्वंभजतेइत्यर्थः नित्यःसर्वदैकरूप

15

इतिवृद्धिप्रतिषेधः शाश्वतः शश्वद्भवत्यपक्ष
यप्रतिषेधः पुराणइतिविपरिणामप्रतिषेधः
पुरापिनवएवनतुपरिणामतोरूपान्तरंप्राप्य
नवोभवतीत्यर्थः यद्वानभवितेत्यस्यानुषंगंकृ
त्वाभूयोधिकंयथाभवतितथानभवतीतिवृद्धि
प्रतिषेधः अजोनित्यइतिचोभयंतुद्भावेहेतु
रितिनपौनरुक्त्यम् तदेवंजायतेऽस्तिवर्धतेवि
परिणमतेऽपक्षीयतेनश्यतीत्येवंयास्कादि
भिरुक्ताःषड्भावविकारानिरस्ताः यदर्थमेते
विकारानिरस्तास्तंप्रस्तौतिविनाशाभावमुपसं
हरतिनहन्यतेहन्यमानेशरीरेइति। अतएव
हन्तृत्वाभावोपिप्रोक्तःसिद्धइत्याह ॥ वेदा
विनाशिनंनित्यंयएनमजमव्ययम् कथंस
पुरुषःपार्थकंघातयतिहन्तिकम् २१ ॥
नित्यंवृद्धिशून्यमव्ययमपक्षयशून्यमजम
विनाशिनमेनंयोवेदप्रत्यभिजानातिसपुरुषः
कथंहन्तिकथंवाकर्त्रिपदंश्रुतस्यवधेसाधना
भावात्तथास्वयंप्रयोजकोभूत्वान्यंकंघात
यतिकथंवाघातयति नकथंचिदपीत्यर्थः
अनेनमम्यापिप्रयोजकत्वाद्दोषदृष्टीमाका

धीरिन्युक्तंभवति । ननुदेहनाशेप्यात्मनश्चेत
नधर्मोऽनुपलम्भात्कथमविनाशित्वमितिदृष्टां
तेनद्रढयति ॥ वासांसिजीर्णानियथाविहा
यनवानिगृह्णातिनरोपराणि तथाशरीरा
णिविहायजीर्णान्यन्यानिसंयातिनवानिदे
ही २२ ॥ यथाकश्चिज्जीर्णान्युपभोगाक्षमा
णिवस्त्राणित्यक्त्वाऽपरमन्यान्यनवान्युपभो
गक्षमाणिगृह्णाति तथादेहीअयमात्माका
रणभूतप्रारब्धकर्मक्षयेणजीर्णान्युपभोगा
क्षमाणिविहायन्यानिनवानिउपभोगक्षमा
णिसंयातिप्राप्नोतिकर्मनिबन्धनानांनूतना
नामवश्यम्भावित्वात्जीर्णनाशेशोकावका
शइत्यर्थः ननुदेहनाशेतदन्तर्वर्तिनआत्म
नोपिनाशप्रसंगोगृहदाहेतदन्तर्वर्तिपुरु
षःवदित्यतआह २२ ॥ नैनंछिन्दंतिशस्त्रा
णिनैनंदहतिपावकः नचैनंक्लेदयंत्यापो
नशोषयतिमारुतः २३ ॥ शस्त्राण्येनमात्मा
नंशरीरवन्नछिन्दन्ति एवंपावकोनदहति
एनमापोनक्लेदयन्ति विशिष्टावयवंकुर्वन्ति
एनंमारुतोनशोषयति निरवयवत्वात्

पृथिव्यप्तेजोवायूनामविनाशकत्वप्रसिद्धेस्ते
षामेवोपन्यासोनाकाशस्यतत्त्वञ्चेतनाह २३॥
अच्छेद्योयमदाह्योयमक्लेद्योशोष्य एव च
नित्यः सर्वगतः स्थाणुरचलोयं सनातनः २४॥
निरवयवत्वादच्छेद्योयमक्लेद्यश्चामूर्तत्वाद
दाह्यः अद्रवत्वाभावादशोष्य इतिभावः कुत
श्छेदाद्ययोग्योनभवति यतोनित्योविना
शीसर्वत्रगतः स्थाणुः स्थिरस्वभावः रूपान्त
रानिष्पन्नः अचलः पूर्वरूपापरित्यागी सना
तनोनादिः नित्याइत्यादीन्येकार्थान्यपि बहू
निविशेषणानि प्रतिपत्तिदार्ढ्याय भगवता
सहोक्तानि किंच २४॥ अव्यक्तोयमचिं
न्त्योयमविकार्योयमुच्यते तस्मादेवंविदि
त्वैनंनानुशोचितुमर्हसि २५॥ अव्यक्तश्च
क्षुरादिविषयः अचिन्त्योमनसोप्यविषयः
अविकार्यः कर्मेन्द्रियाणामप्यगोचरः उच्यते
इतिनित्यतादावभियुक्तोक्तिःप्रमाणयति उ
पसंहरति तदेवमात्मनोजन्मविनाशाभा
वाच्छोकोनकार्यइत्युक्तम् जन्मविनाशौ
देहसम्बन्धादंगीकृत्यापिशोकोनकार्यइ

त्याह २५ ॥ अथ चैनं नित्यजातं नित्यं वा म
न्यसे मृतम् तथापि त्वं महाबाहो नैवं शोचि
तुमर्हसि २६ ॥ अथ यद्यप्येनमात्मानं नि
त्यं सर्वदा तत्तद्देहे जाते जातं मन्यसे अपात
तैंगीकृकृषेनत्वतात्पर्येण तथा तत्तद्देहे
मृते मृतं मन्यसे पुण्यपापयोस्तत्फलभूतयो
श्च जन्ममरणयोरात्मगामित्वात् तथापि त्वं
शोचितुं नार्हसि कुत इत्यत आह २६ ॥ जा
तस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च तस्मा
दपरिहार्येऽर्थे न त्वं शोचितुमर्हसि २७ ॥
हि यस्माज्जातस्य तदारम्भककर्मक्षये मृत्युर्ध्रु
वो निश्चितः मृतस्य तत्तद्देहकृतेन कर्मणा
जन्मापि ध्रुवमेव तस्मादेवमपरिहार्येऽर्थे
ऽवश्यंभाविनि जन्ममरणलक्षणेऽर्थे त्वं
प्रबुद्धः शोचितुं नार्हसि योग्यो न भवामि
प्राणिनो नित्याः सन्तु अनित्या वा यस्मात् देहानां
शोच्यकत्वं प्रत्येवाऽशोच्यत्वमित्याह २७॥
अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत
अव्यक्तनिधनान्येव तत्र का परिदेवना २८॥
अव्यक्तनिधनान्येव तत्र का परिदेवना २८॥

गी·टी· निभूतानिपृथिव्यादिभूतानिपृथिव्यादिभूतसं
१८ घातात्मकाः प्राणिनः प्रागुत्पत्तेरप्रत्यक्षत्सर्वेन्द्र
याणितथाअक्तमध्यानिप्रागरणाद्व्यक्तानि तेन
नेनरूपेणवेद्यमानानामध्यावस्थाजन्ममरणान्त
रालवर्तिनीयेषांतानिअव्यक्तनिधनान्येवप
रोत्तपर्यन्तानिमरणादूर्ध्वमव्यक्ततामेवप्रति
पद्यते तथाचोक्तम् अदर्शनादापतितः पुन
श्चादर्शनंगतः नत्वासौवेदनंत्वंतेकःसन्कम
नुशोचसि तत्रतेषुकापरिदेवनाकःशोकनि
मित्तोविलापःप्रतिबुद्धस्यस्वप्नदृष्टबन्धुष्विव
शोकोनयुज्यतेइत्यर्थः आदावन्तेचयन्नास्ति
वर्तमानेपितत्तथेतिन्यायात् कृतस्त्वंहिवि
द्वांसोपिलोकेशोचन्ति आत्माज्ञानादेवेत्या
शयेनात्मनोदुर्विज्ञेयतामाह २८ ॥ आश्च
र्यवत्पश्यतिकश्चिदेनमाश्चर्यवद्वदतित
थैनमन्यः आश्चर्यवच्चैनमन्यःशृणोतिश्रु
त्वाप्येनंवेदनचैवकश्चित् २९ ॥ अनेक
सहस्रेषुकश्चिदुत्कृष्टपुण्यःएनमात्मान
माश्चर्यवत् आश्चर्यमदृष्टमद्भुतकस्माद्
दृश्यमानंतेनतुल्यंशास्त्राचार्योपदेशाभ्यांप

श्यति साक्षात्करोतिनित्यज्ञानानन्दस्वभाव
स्यात्मनोलौकिकत्वादिंद्रजालवदद्भुतमात्मं
पश्यन्निवाविस्मयेनपश्यति असंभावनाभि
भूतत्वात् तदुक्तंश्रीकुलवृकौ आत्माचेवा
त्मनाज्ञातोयदाभवतिसाधकैः तदाविस्मय
मात्मावैआत्मन्येवप्रपश्यतीतितथैनमन्यः
परप्रबोधनायआश्चर्यवत् वदति तथान्यः
परेणप्रबोध्यमानएनमाश्चर्यवच्छृणोति
तथाचोक्तंशिवसूत्रेषु विस्मयोयोगभूमिके
ति श्रुत्वाप्येनमीश्वरानुग्रहभाजनंकश्चिदे
व तथाचश्रुतिः येमेवैषवृणुतेतेनलभ्यइ
तिकश्चित्तुनविंपरीतभावनाभिभूतः श्रुत्वा
दृष्ट्वाप्येनंनसम्यग्वेद तदयमत्रनिश्चय
इत्याह २९ ॥ देहीनित्यमवध्योयंदेहेस
र्वस्यभारत तस्मात्सर्वाणिभूतानिनत्वंशोचि
तुमर्हसि ३० ॥ सर्वस्यमायीयस्यप्रमातुः
प्राणिजातस्यदेहेवध्यमानेपिदेहीपरःप्र
मातात्मानित्यमवध्योहन्तुमशक्यःयतए
वंतस्मात्सर्वाणीतिविवेकित्वादितिभावः
३० ॥
नकेवलंपरतत्वापेक्षयैवंयावत्

गी॰टी॰
१८

स्वधर्ममपिचावेक्ष्यनविकम्पितुमर्हसि
धर्म्याद्धियुद्धाच्छ्रेयोन्यत्क्षत्रियस्यनविद्यते
३१ ॥ क्षत्रियस्यस्वधर्मंयुद्धमवेक्ष्यनवि
कम्पितुमर्हसि धर्मस्यानपहार्यत्वात् य
तःधर्म्यात् धर्मादनपेतात्युद्धात्श्रेयस्करं
क्षत्रियस्यान्यन्नास्ति तदुक्तंमनुना समोत्त
माधमैराजाचाहूतःपालयन्प्रजाः नानिव
र्तेतसंग्रामात्क्षात्रंधर्ममनुस्मरन् संग्रामे
ष्वनिवर्तित्वंप्रजानांचैवपालनम् शुश्रूषा
ब्राह्मणानांचराज्ञःश्रेयस्करंपरमिति रा
जाक्षत्रियःएवंसकामैरपिक्षत्रियैर्युद्धंस्वर्ग
हेतुत्वात्नत्याज्यंकिंपुनस्त्वयोपदिष्टविवेक
स्येत्याह ३१ ॥ यदृच्छयाचोपपन्नंस्वर्गद्वा
रमपावृतम् सुखिनःक्षत्रियाःपार्थलभंते
युद्धमीदृशम् ३२ ॥ यदृच्छयाप्रार्थितमे
वोपनतंप्राप्तमीदृशंयुद्धंसुखिनःसभाग्या
एवक्षत्रियालभंतेयतोनिरावरणंस्वर्गद्वार
मेवतत् यद्वायएवंविधंयुद्धंलभंतेतएव
सुखिनःभविष्यत्स्वर्गसुखभाजइत्यर्थः
विपक्षेदोषमाह ३२ ॥ अथचेत्वमिमंध

18

र्म्यं संग्रामं न करिष्यसि ततः स्वधर्मं कीर्तिं च
हित्वा पापमवाप्स्यसि ३३ ॥ कीर्तिं महादेवा
दिसमागमनिमित्तां हित्वा पापमवाप्स्यसि तथा
च मनः यस्तु भीतः परावृत्तः संग्रामे हन्यते प
रैः भर्तुर्यद्दुष्कृतं किंचित्तत्सर्वं प्रतिपद्यते य
च्चास्य सुकृतं किंचिदमुत्रार्थमुपार्जितम् भ
र्ता तत्सर्वमादत्ते परावृत्यहतस्य तु इति न पुं
स्वधर्मपरित्याग एव यावत् ३३ ॥ अकीर्तिं
चापि भूतानि कथयिष्यंति तेऽव्ययाम् संभावि
तस्य चाकीर्तिर्मरणादतिरिच्यते ३४ ॥ अव्य
यां शाश्वतीं कल्पान्तस्थायिनीं भूतानि प्राणिनो
देवादयः न तु मरणादकीर्तिरेव वरं नेत्याह
धर्मात्मा शूर इत्यादिगुणैः संभावितस्य बहुमानि
तस्याकीर्तिर्मरणादतिरिच्यतेऽधिका भवति न
त्वन्ये जना मां निन्दन्तु महारथास्तु कारुणिक
तामालक्षयिष्यंति मामित्यत आह ३४ ॥
भयाद्रणादुपरतं मंस्यंते त्वां महारथाः येषां च
त्वं बहुमतो भूत्वा यास्यसि लाघवम् ३५ ॥ ये
षां भीष्मादीनां बहुगुणत्वेन सर्वसंमतो भूत्वा
एवं भयेन संग्रामान्निवृत्तं मंस्येरन् ततश्च

पयातस्तस्य सर्वं बहुमतो भूत्वा लाघवं यास्यसि
ननु भीष्मादयो न बहु मन्यन्तां दुर्योधनादयः
शत्रवो युद्धनिवृत्तानपकारित्वाद्बहु मन्यन्ते
इत्यत आह ३५॥ अवाच्यवादांश्च बहून्वदि
ष्यंति तवाहिताः निन्दन्तस्तव सामर्थ्यं ततो दुः
खतरं नु किम् ३६॥ शत्रवो दुर्योधनादय
स्तव सामर्थ्यं निन्दन्तो वचनानर्हान्बहूनपशब्दा
न्वदिष्यंति ननु भीष्मादिवधदुःखान्निन्दादुः
खं सोढुं शक्यमित्यत आह ततो दुःखतरमिति
ततो निन्दाया दुःखतरं कष्टतरं दुःखं नास्त्येवे
त्यर्थः अतो यथाकथंचिद्युद्धमनुष्ठेयमेवेत्या
ह ३६॥ हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भो
क्ष्यसे महीम् तस्मादुत्तिष्ठ कौंतेय युद्धाय कृत
निश्चयः ३७॥ पक्षद्वयेपि तव लाभ एवेत्य
र्थः कृतनिश्चयः जेष्यामि शत्रून्मरिष्यामि वेति
निश्चयं कृत्वा न तु गुरुब्राह्मणवधात्पापमेवा
प्स्येदित्यत्रोपदेशं शृणोत्याह ३७॥ सुखदु
ःखे समे कृत्वा लाभालाभौ जयाजयौ ततो
युद्धाय युज्यस्व नैवं पापमवाप्स्यसि ३८॥
सुखदुःखे समे कृत्वा तयोः कारणभूतौ

19

लाभौतयोरपिकारणभूतौजयाजयावपिसमौ
कृत्वाएतेषांसमत्वेकारणंनिरंतरस्वात्मपरा
मर्शावष्टम्भेनहर्षविषादराहित्यंततोयुद्धा
युज्यस्वसन्नद्धोभवयथोक्तबोधनिष्ठतया
स्वकर्मानुष्ठेत्यर्थः फलाभिलाषरहितःस्वध
र्मेयुद्ध्यमानःपापंप्राप्स्यसीत्यर्थः शो
कापनयनायस्वधर्ममपिचावेक्ष्येत्यादिभिः
श्लोकैःप्रासंगिकोलौकिकोन्यायउक्तोनतु
तात्पर्येणेतिप्रकृतंपरमार्थदर्शनमुपसंहर
न्कर्मयोगंप्रस्तौति ३८ ॥ एषातेभिहिता
सांख्येबुद्धिर्योगेत्विमांशृणु बुद्ध्यायुक्तोयया
पार्थकर्मबन्धंप्रहास्यसि ३९ ॥ एषातेत
भ्यंसांख्येपरमार्थवस्तुविवेकविषयेबुद्धि
र्बोधउक्तःउक्तबोधप्रापणेपरमार्थेनसंबंधो
योगः योगेपरमात्मसमाधानेइमांबुद्धिंव
क्ष्यमाणांबोधंशृणुययाबुद्ध्यायुक्तःसंबद्धस्त्व
कर्मकृतंबोधशून्यजनविषयंबन्धमज्ञानं
त्वंप्रहास्यसित्यक्ष्यसितादृशंकर्मानुष्ठान
सिद्धोपदेक्ष्यतेयेनसकलमूढजनबन्धहे
तोरपिकर्मणोमोक्षहेतुत्वमेवपर्यवस्येत्

20

इतश्चवोधक्रियासमुच्चयस्यैवोपदेशयतनात्
तदुक्तंकल्पार्णवे क्रियमाणानिकर्माणिज्ञान
प्राप्तेरनन्तरम् नसंस्पृशंतितत्त्वज्ञंजलंपद्मद
लंयथेति अन्यत्र येनयेनहिबध्यन्तेजन्तवो
रौद्रकर्मणा सूपायेनततेनैवमुच्यंतेभवब
न्धनात् तथान्यत्रापिसीदतियेनैवजंतुःप्राज्ञ
स्तेनैवसन्तरतिदुःखात् पिण्डमयोप्यमज्ज
तितदेवपात्रीकृतंप्लवतेइतिअस्यकयोगस्य
चित्तवृत्तिनिरोधलक्षणयोगातिरिक्तशक्ति
तांप्रतिपादयति ३९ ॥ नेहाभिक्रमनाशो
स्तिप्रत्यवायोनविद्यते स्वल्पमप्यस्यधर्मस्य
त्रायतेमहतोभयात् ४० ॥ इहवक्ष्यमाणे
कर्मयोगेचित्तवृत्तिनिरोधलक्षणयोगवद
भिक्रमेणप्रमादेननाशआत्मनोदर्शनंपराम
र्शाभावोनास्ति अन्यत्रयोगेचित्तवृत्तिनिरोध
पवसतिस्वात्मपरामर्शोन्यस्यांवृत्तौनैतदुक्तं
निरोधादीनिकर्माणिजहातिजडधीर्यदि
मनोरथान्सलापांश्चकर्तुंप्राप्नोत्यतःक्षणात्
अत्रप्रक्रांतेतत्तत्रवक्ष्यमाणयोपपत्त्याप्रत्य
वायोनिष्टयोगःशीतोष्णादिदुःखैर्निमग्नचि

नतयातदनुभावोऽप्यन्ययोगमविद्यते सदा
स्वात्मनिष्ठत्वाच्छिन्नस्ययथापरिमितेनैवश्री
खण्डकेनज्वालायमानोपितैलकटाहः स
द्यःशीतीभवति एवंस्वल्पमपिमितकालल
ब्धानुभूतेस्वरूपमस्यस्वात्मनिसमाहिततया
विहितस्यधर्मस्यचोदितकर्मानुष्ठानरूपस्य
महतोभयात् अनात्मन्यात्मप्रत्ययरूपात्सं
सारापरपर्यायात् अनुष्ठातारंयोगिनंपरि
त्रातिपुनस्तत्संबन्धंतिरस्करोतीत्यर्थः कर्म
ण्यनुष्ठीयमानेपिस्वात्मपरामर्शरूपस्यस
माधेःसर्वदाप्यभासमानत्वात् नचानिरोधयो
गस्यपरिहारोऽत्रविवादितस्तस्यापरत्वादिति
यतःकालानुष्ठेयतयात्रैवांतर्भावात् तच्चष
ष्ठेध्यायेश्रीभगवान्स्वयमेवप्रपंचयिष्यति
अस्मिन्योगेभवादृशोलब्धात्मबोधोयोधिकृते
नसर्वःकश्चिदित्याह ४० ॥ व्यवसायात्मि
काबुद्धिरेकेहकुरुनन्दन बहुशाखाह्यनंता
श्चबुद्धयोऽव्यवसायिनाम् ४१ ॥ इहजीव
लोकेश्रेयोमार्गेवाव्यवसायात्मिकाप्युद्यम
दर्थात्मनिश्चयस्वभावाबुद्धिःबोधएकेवब्र

त्मादिकीटान्तं विपरीतभावनया बाधितत्वात्
अव्यवसायिनां सदसद्विवेकनिश्चयहीनां बु
द्धयः प्रतीयः बहुशाखाः अनन्तदेहप्राणादिष्व
भिमानिनोनानात्वात् अतएवानन्ताश्चानन्तही
नाश्चात्मत्यपारसंसारस्यानुपरमात् स्वर्गादि
भोगमात्रंपरत्वेन प्रतिपन्नानामव्यवसायिना
बुद्धिः प्रक्रांतेपरास्मिन्धर्मेनयुज्यतेइत्याह ४१॥
यामिमांपुष्पितांवाचंप्रवदन्त्यविपश्चितः
वेदवादरताःपार्थनान्यदस्तीतिवादिनः ४२
कामात्मनःस्वर्गपराजन्मकर्मफलप्रदां क्रि
याविशेषबहुलांभोगैश्वर्यगतिंप्रति ४३ भो
गैश्वर्यप्रसक्तानांतयापहृतचेतसाम् व्यव
सायात्मिकाबुद्धिःसमाधौनविधीयते ४४॥
भोगेचैश्वर्येचप्रकर्षेणानिश्चितव्यसहस्रान्त
रपरिहारेणसक्तानांलीनचित्तानांवेदवाचा
पहृतचेतसामावर्जितमनसामविपश्चितां
व्यवसायात्मिकाबुद्धिःसमाधौकर्मण्यपिस
क्षेप्रत्यगात्मसमाधानविषयानविधीयते
ननियुज्यतेमयातत्सकाशेनेतदहस्यमबुद्धा
नामित्यर्थः तदुक्तंश्रीकुलपञ्चाशिकायाम्

यन्नास्तिसर्वलोकस्यतदस्तीतिविरुध्यते
निगद्यतेयदादेविदृढयेनप्ररोहति एत
स्मात्कारणाद्देविदेवताभिःप्रगोपितम् ते
नाचिरेणदेवेशिकिंनसिध्यतिभूतलइति
कयावाचायामिमांवेदवादेकर्मकाण्डलक्ष
णांअविपश्चितोऽविवेकिनःप्रवोपमृन्या
वेदवादरतावेदयेर्थवादाअक्षय्यंहवैचातु
र्मास्ययाजिनःसुकृतंभवति अपामसोम
ममृताअभूमेत्याद्यासुरताःप्रीतानान्यत्स्वा
प्यमीश्वरतत्वमस्तीतिवदनशीलाःतथाका
मात्मानःकामाविषयाआत्मवत्परप्रेमास्प
दत्वादात्मायेषांतेअतएवस्वर्गपराःस्वर्गए
वपरःपुरुषार्थोयेषांतेऽप्यतोभविष्यत्स्वर्ग
फलेनव्यमांवदंतिकीदृशींतांजन्मकर्मफ
लप्रदांजन्मयोन्यंतरेसंचारःकर्मधर्मात्मकं
फलंसुखदुःखेतानिप्रददातीतितथाविधां
तथाभोगैश्वर्ययोर्गतिंप्राप्तिंप्रतिक्रियाविशे
षवहुलांकर्मभेदैर्व्याप्ताम् अतस्त्वाविज्ञान
पात्रभूतस्त्वंकामनिश्चितांविहायाक्रिय
मापिकर्माणियथोपदिष्टाविज्ञानष्टोभवेत्या

ते ४४ ॥ त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भ
वार्जुन निर्द्वन्द्वो नित्यसत्त्वस्थो निर्योगक्षेम
आत्मवान् ४५ ॥ त्रयो गुणाः सत्त्वरजस्तमांसि
त्रयो गुणा एव त्रैगुण्यं संसारि भूतषड्वर्गः स्वप
रविषये सत्वेडुः स्वार्थे गुणानि गुणोपचा
रात् तद्विषया वेदाः कर्मकाण्डात्मकाः वे
दानां चांशा तयोरमृष्टात्मककर्मप्रतिपादक
त्वात् अथवा त्रैगुण्येन सकामत्वेन विषया
वन्यका वेदाः विशेषेण सिन्वन्तीति विषयाः
षिञ्जो रूपं त्वं तन्नीदृश आत्मवान प्रमत्तो भवा
त्मानं प्रत्यवमृशन्नेव ममैवेनात्मानः प्रत्यवम
र्शीभावात् निस्त्रैगुण्यः सन् त्रैगुण्यान्निष्क्रां
तः सन् निरभिलाष इति यावत् तदुक्तमज
उप्रमातृसिद्धौ संविदेकपरामर्शरूपा चेत
दसावपि अभावेन जडेनाथ तल्येव प्रागव
दात्मनीति तथा निर्योगक्षेमः अप्राप्तस्य स्वी
कारो योगः प्राप्तस्य परिरक्षणं क्षेमस्तद्रहितः
नित्यसत्त्वस्थो धैर्यावलम्बी निर्द्वन्द्वः सत्वेडुः
खादिद्वन्द्वसहनशीलः ईदृशः सन्नात्मवान्भ
व आत्मप्रत्यवमर्शसाधकश्रद्धाणवापकं

22

परिहरेत्यर्थः ४५॥ ननुनानाकर्मकलाप
प्रतिपादकाद्वेदात्सर्वकर्मानुष्ठेयमुतत्सार्थ
बोधमात्रोपयोग्युपादेयमित्याशंक्याह ॥
यावानर्थउदपाने सर्वतःसंप्लुतोदके ता
वान्सर्वेषुवेदेषुब्राह्मणस्यविजानतः ४६॥
यावान्स्नानपानादिरर्थःसर्वतःसंप्लुतोदके
समुद्रजलेक्षुद्रेउदपानेयथाभवति न
सर्वोक्षुद्रउपादेयःतथासर्वेषुसरहस्येषुवे
देषुविजानतोविज्ञानवतोब्राह्मणस्यब्रह्मवे
दिनस्तावत्परमार्थोपलब्धिमात्रोपयोगीअ
र्थःप्रयोजनंभवतिनसर्वःकर्मकलापस्तादेय
इत्यर्थः अथविजानतःसर्वशास्त्रेभ्योयदुपादे
यंतदर्जुनमुद्दिश्योपदेष्टुमाह ४६॥ कर्म
ण्येवाधिकारस्तेमाफलेषुकदाचन माकर्मफ
लहेतुर्भूर्मातेसंगोस्त्वकर्मणि ४७॥ कायवा
ङ्मनोभिर्निर्वर्त्येवैदिकेस्वाभाविकेवाकर्मण्येवा
धिकारःकर्तव्यंतेनवाह्यफलेषुदृष्टाद्यविक
फलेषुकदाचनाधिकारोमाभूत् यतःफला
भिसन्धिनाक्रियमाणानिकर्माणिचित्तभूमौ
वासनारूपेणवीजभावंयोन्यंतरसंचारेआप

द्यंते अतः कर्मफलहेतुः कर्मणां शुभाशुभा
नां फलानि सुखदुःखात्मकानि हेतुर्जन्मनो नि
मित्तं यस्य तथाविधो मा भूः रजवत् यथोक्तबो
धनिष्ठस्य हि कर्माणि ज्ञानाग्निना दग्धबीजता
मापद्यंते तथा कर्माणि कर्माकरणेऽपि संगोऽस्ति
त्वि मास्त्वित्युक्तम् न कर्माणि त्यजेद्योगी कर्मभि
स्त्यज्यते ह्यसौ कर्मणां मूलभूतस्य संकल्पस्यै
व नाशन इति पूर्वोक्तमेवाविष्करोति कुलार्ण
वे ह्येवं यैः परित्यक्तं कर्मकाण्डमपण्डितैः पा
षण्डपण्डितंमन्यास्ते यान्ति नरकं प्रिये इति पू
र्वोक्तमेवाविष्करोति ४७ ॥ योगस्थः कुरु कर्मा
णि संगं त्यक्त्वा धनंजयः सिद्ध्यसिद्ध्योः समो भू
त्वा समत्वं योग उच्यते ४८ ॥ संगं फलाभिसं
धिं न कर्माणि लीनाचिनतं त्यक्त्वा तथा फलस्य सि
द्ध्यसिद्ध्योः समो हर्षविषादरहितो भूत्वा योग
स्थः सन् कर्मण्येव क्षीयमाणे ध्यात्मन्यवहित
त्वमप्रमत्तता योगस्तत्रास्थितः सन् कर्माणि कु
रु यतः समत्वं सर्वास्ववस्थास्वविकारत्वं योग
लक्षणमुच्यते अनेन श्लोकेनार्जुनमुद्दिश्य बु
द्धियोगकर्मयोगयोर्लक्षणं युगपदुपदिष्टं

एवंविधोत्कृष्टबुद्धियुक्तः कर्मसमाचरेन्नकेव
लमित्याह ४८ ॥ दूरेणह्यवरंकर्मबुद्धियोगा
द्धनंजय बुद्धौशरणमन्विच्छकृपणाःफलहे
तवः ४९ ॥ हियस्मात्बुद्धियोगाद्यथोक्तबो
धसमाधानात् रिक्तंकर्मदूरेणावरमत्यन्ताध
मम् बोधशून्यस्यकर्मणःसंसारहेतुत्वात् अ
तोबुद्धौसम्यग्बोधनिमित्तंशरणमाश्रयमन्वि
च्छोपायनतयाकर्मावलम्बस्वेत्यर्थः व्युत्थानद
शायांहिकर्मानुष्ठानेपरामर्शावलम्बनेनात्म
नःप्रमातृत्वेनसदाभासमाननयायथासम्य
ग्बोधवृद्धिर्नतथासमाधिदशायांतस्याःकदा
चित्कत्वात् एतत्सर्वदासमाधानयत्नायएवसंचे
नयंतेनात्मप्रमादिनःयतोफलहेतवःफलमे
वतत्साधनकर्मसुहेतुःप्रयोजकःयेषांतेफला
भिसन्धिनाबोधशून्यकर्मानुष्ठायिनःकृपणा
महत्फलमुपेक्ष्यतुच्छफलार्थित्वागार्ग्यस्माल्लो
कात्प्रैतिसकृपणइति अथसम्यग्बोधवतउक्त
बुद्ध्याकर्मानुष्ठातुर्महिमानमाह ४९ ॥ बुद्धि
युक्तोजहातीहउभेसुकृतदुष्कृते तस्माद्यो
गाययुज्यस्वयोगःकर्मसुकौशलम् ५० ॥

बुद्धौप्रत्यगात्मबोधेयुक्तः समाहितः इहजन्म
निकर्माणिकुर्वन्नपीश्वरभावानुप्रवेशादुभेपुण्य
पापेत्यजतितदुक्तंकुलार्णवे । तत्त्वनिष्ठस्यकर्मा
णिपुण्यपापानिसंचयम् । प्रयांतिनैवलिप्यंते
क्रियमाणानिवापुनः इति । तस्मात्सम्यग्बुद्धत्वंयो
गायसमासस्वस्वरूपप्रत्यवमर्शरूपाययुज्यस्वक
र्मानुष्ठानद्वारेणोद्युक्तोभवयतःकर्मसुक्रियमा
णेषुकौशलंवापनिष्ठत्वंयोगः नान्यः केवलनि
रोधलक्षणः एतमेवार्थंहेतूपन्यासपूर्वंविव
रीतुमाह ५० ॥ कर्मजंबुद्धियुक्ताहिफलंत्यक्त्वा
मनीषिणः जन्मबन्धविनिर्मुक्ताः पदंगच्छन्त्यना
मयम् ५१ ॥ हियस्मात् बुद्धियुक्ताबुद्ध्यावात्म
बोधेयुक्ताअवहिताःकर्मजंफलंस्वाबोधात्मकं
त्यक्त्वात्मनिष्ठतयानिरभिकांक्षत्वात् मनीषिणः
प्रवीणाजन्मरूपाद्बन्धनाद्विनिर्मुक्ताः सन्तः अना
मयंसर्वोपद्रवशून्यमविद्यातत्कार्यात्मकरोगर
हितपदंमोक्षाख्यंगच्छन्तिप्राप्नुवंति अतस्त्वंबु
द्धियुक्तोयोगाययुज्यस्वेतिपूर्वेणसम्बन्धः कदा
कर्मयोगप्रतिष्ठांप्राप्स्यामीत्यपेक्षायामाह ५१ ॥
यदातेमोहकलिलंबुद्धिर्व्यतितरिष्यति तदा

गन्तासि निर्वेदं श्रोतव्यस्य श्रुतस्य च ५२ श्रुति
विप्रतिपन्ना ते यदा स्थास्यति निश्चला समाधाव
चला बुद्धिस्तदा योगमवाप्स्यसि ५३ ॥ यदा ते
बुद्धिरन्तःकरणं मोहमेव देहाद्यात्मप्रत्ययमेव क
लिलं गहनं विशेषेण तरिष्यति तदा श्रोतव्यस्या
र्थस्य श्रुतस्य चार्थस्य निर्वेदं निश्चेतव्यस्य निश्चित
तया वैराग्यं प्राप्स्यति अविद्यापदपातितप्रमादनु
ग्राहकत्वाच्छास्त्रस्य तदुक्तं कुलार्णवे यथामृ
तेन तृप्तस्य नाहारेण प्रयोजनम् तत्वज्ञस्य तथा
देवि न शास्त्रेण प्रयोजनमिति नथा श्रुतिभिर्ना
नालौकिकवैदिकार्थश्रवणैर्विप्रतिपन्ना इतः पू
र्वं विक्षिप्ता सती समाधौ आत्मसमाधाने निश्चला
विक्षेपरहिता सती अचला लयरहिता च बुद्धिः
स्थास्यति प्रतिष्ठां लप्स्यति तदा योगं यथोक्तं क
र्मसमधिलक्षणं कृत्स्यानेप्यवाप्स्यसि यदा ते स
तिः स्थास्यतीति प्रश्नबीजं लब्ध्वा स्थितप्रज्ञस्य ल
क्षणायार्ज्जुन उवाच ५३ ॥ स्थितप्रज्ञस्य का
भाषा समाधिस्थस्य केशव स्थितधीः किं प्रभा
षेत किमासीत व्रजेत किम् ५४ ॥ स्थिता निश्च
ला विकल्पैरविकम्प्या प्रज्ञा आत्मविषये बोधो य

स्यस्थितप्रज्ञो व्युत्थानवान् समाधिस्थो व्यु
त्थितचेताश्चेति समाधिस्थस्य स्थितप्रज्ञस्य का भा
षाभाष्यतेऽनयेति भाषा लक्षणं किम् स एव व्यु
त्थितचित्तः स्थितप्रज्ञः किं प्रभाषेत स्वानि निन्दा रा
गद्वेषादिलक्षणम् कथं प्रभाषेत सर्वत्र संभा
वनयालिङ्. किमासीत कथं बहिरिन्द्रियाणां
निग्रहं करोति व्रजेत कथं विषयान्प्राप्नोति स्व
त्तविलक्षणानि तस्य भाषणासनव्रजनानि की
दृशानीत्यर्थः तदेवं चत्वारः प्रश्नाः समाधिस्थित
प्रज्ञे एकः व्युत्थितस्थितप्रज्ञे त्रय इति ॥ एतेषां
चतुर्णां प्रश्नानां यावदध्यायसमाप्ति उत्तरं श्रीभ
गवानुवाच ५४ ॥ प्रजहाति यदा कामान्सर्वा
न्पार्थ मनोगतान् आत्मन्येवात्मना तुष्टः स्थि
तप्रज्ञस्तदोच्यते ५५ ॥ कामान्संकल्पभेदान्प्र
माणविपर्ययविकल्पनिद्रास्मृतिभेदेन पंचधो
क्तान्मनोवृत्तिविशेषान्सर्वेणा निरवशेषत
या यदा यस्मिन्काले जहाति चित्तवृत्तिशून्य ए
व यदा भवति स्थितप्रज्ञस्तदोच्यते समाधि
स्थ इति शेषः कामानामनात्मधर्मतया शक्य
त्यागमाह मनोगतानिति मनोधर्मा एवैते न

त्वात्मयमर्थोऽनतस्य क्लेशका इत्यर्थः हतिस्नूय
त्वेतर्हि किं प्रतिष्ठितइत्याह आत्मन्येवपरमा
नन्दरूपेणात्मदेहादौ आत्मनैव आत्मतेननम
नोहृन्यात हृष्टस्त्तः तथा च श्रुतिः यदासर्वेप्र
मुच्यंते कामायेस्य हृदि स्थिताः अथमर्त्योमृतो
भवत्यत्र ब्रह्म समश्नुते इति एवं समाधिस्थस्थि
तप्रज्ञलक्षणोदाहृत्या प्रथमप्रश्नस्योत्तरमुक्तं
इदानीं व्युत्थितः स्थितप्रज्ञः किं प्रभाषेतेत्यत्रो
त्तरमाहद्वाभ्याम् ५५ ॥ दुःखेष्वनुद्विग्नमनाः
सुखेषु विगतस्पृहः वीतरागभयक्रोधः स्थि
तधीर्मुनिरुच्यते ५६ ॥ आत्मेषु दुःखेष्वाध्या
त्मिकादिषु अनुद्विग्नमनित्यमात्मप्रतिष्ठत्वात् त्वमि
तेमनो यस्य सः सुखेषु विगतस्पृहो निष्कामावि
लाषः वीतारागो रंजनात्मको भयं क्रोधो यस्य स
मुनिर्मननशीलः स्वात्मपरामर्शमत्यजन्योगी
स्थितप्रज्ञ इत्युच्यते ५६ ॥ यः सर्वत्रानभिस्नेह
स्तत्तत्प्राप्य शुभाशुभम् नाभिनंदति न द्वेष्टि तस्य
प्रज्ञा प्रतिष्ठिता ५७ ॥ यो व्युत्थानेपि सर्वत्र पु
त्रमित्रविषयादिषु निःस्नेहः तत्तन्नानाविधं शु
भमनुकूलं प्राप्य न प्रशंसति तत्तदशुभं प्रति

गी॰टी॰ कूलंप्राप्यनद्वेष्टितस्यप्रज्ञाप्रतिष्ठितासास्थितप्र
२९ ज्ञइत्यर्थः स्तुत्यादिरूपावाचोनभाषतइतिव्यति
रेकउक्तः अथकिमासीतेत्यस्योत्तरमाहषड्भिः
५७ ॥ यदासंहरतेचायंकूर्मोंगानीवसर्वशः इं
द्रियाणींद्रियार्थेभ्यस्तस्यप्रज्ञाप्रतिष्ठिता: ५८ ॥
चोव्यतिरेकेयदापुनरयंव्युत्थितःसन्सर्वविषये
26 भ्यइंद्रियाणिप्रत्याहृत्यासीतसंस्थितप्रज्ञइति
पिण्डार्थः अनायासोपसंहारेदृष्टांतः कूर्मोंगा
नीवेति ननुयदिविषयेष्वप्रवृत्तिरेवस्थितप्रज्ञ
लक्षणंतर्ह्यज्ञानामातुरोपवासपरतपाहिनां
विषयेष्वप्रवृत्तेरविशेषस्तत्राह ५८ ॥ वि
षयाविनिवर्त्ततेनिराहारस्यदेहिनः रसवर्ज्जं
रसोप्यस्यपरंदृष्ट्वानिवर्त्तते ५९ ॥ निराहार
स्येंद्रियैर्विषयग्रहणमकुर्वतोदेहिनोदेहाभि
मानिनोज्ञस्यविषयानिवर्त्ततेतदनुभवोनि
वर्त्ततइत्यर्थः किंतुरसवर्ज्जंरसोभिलाषोराग
स्तुननिवर्त्ततइत्यर्थः सतदानींप्रहसमस्तत्र
र्वोवर्त्ततेअस्यतुनःस्थितप्रज्ञस्यपरंपरमात्मा
नंदृष्ट्वामतः साक्षात्कृतवतोरसोरागोपिनिव
र्त्ततेनश्यतीत्यर्थः छिद्रान्वेषिणामिंद्रियाणां

वशीकारं विना स्थितप्रज्ञत्वासंभव इत्याह
५९ ॥ यततो ह्यपि कौंतेय पुरुषस्य विपश्चि
तः इंद्रियाणि प्रमाथीनि हरंति प्रसभं मनः
६० ॥ यततः प्रयतमानस्य प्रत्यवस्त्वद्वारपि
अनुदात्तेत्वलक्षणमात्मपदमनित्यमितिङो
ङित्करणाज्ज्ञापकात् विपश्चितः सदसद्विवे
किनः पुरुषस्यापश्यंतेतमनाद्यस्य इंद्रियाणि
प्रमाथीनि दस्यव इव प्रमथनशीलानि क्षोभ
कानि प्रसभं बलात्कारेण मनो मननात्मकं चि
त्तमेव सर्वस्वं हरंति विषयाभिमुखं कुर्वंति हि
प्रसिद्धो प्रसिद्धमेवैतत् यत एवं ततः ६० ॥
तानि सर्वाणि संयम्य युक्त आसीत मत्परः व
शे हि यस्येंद्रियाणि तस्य प्रज्ञा प्रतिष्ठिता ६१ ॥
तानि सर्वाणींद्रियाणि संयम्य वशीकृत्य प
रतत्त्वाभ्यासेन न तत्प्रवृत्त्या युक्त आत्मतत्त्वे समा
हितः मत्परो मामेव चिदात्मानं परमेश्वरं म
त्पराश्रितः आसीत सदाभ्यसेत् युक्तमेवैतत्
नहि राजाश्रितं प्रति दस्यवः प्रभवंति वशी
कारफलमाह वशे हीति यथा सन्दमन्त्राभ्या
सं गारुडिकं छिद्रान्वेषिणो भुजगा व्यापा

दर्शितमुपचक्षितिगाप्याभ्यसनमनन्तवशीकृ
त्यैतैः स्वयदामभिविक्रीडतीति तदेतत् यथोक्तं
वमान्विषयमध्येपिनवसत्येवबुद्धिमान् संव
मत्येवदुर्बुद्धिरमत्वाविषयेष्वपि नपरमेन्द्रि
यवशीकारंविनाश्रितप्रज्ञत्वासंभवो यावद्दो
षप्रसक्तिरपीत्याह ६१ ॥ ध्यायतोविषयान्पुं
सः संगस्तेषूपजायते संगात्संजायतेकामः
कामात्क्रोधोभिजायते ६२ क्रोधाद्भवतिसंमो
हः संमोहात्स्मृतिविभ्रमः स्मृतिभ्रंशाद्बुद्धिना
शोबुद्धिनाशात्प्रणश्यति ६३ ॥ विषयान्ध्या
यतोविमृशतोनत्वात्मानंप्रकषस्यतेषु संगआ
सक्तिर्भवति संगात्कामोभिलाषोजायतेका
मात्केनचित्प्रतिहतात्क्रोधोभवति क्रोधात्सं
मोहः कार्याकार्यविवेकाभावः ततश्चशास्त्रा
चार्योपदिष्टार्थस्मृतेर्विभ्रमोविभ्रंशः ततोबुद्धेः
परमार्थनिश्चयात्मकस्यबोधस्यनाशात्तिरोभा
वः ततश्चशास्त्राचार्योपदिष्टार्थस्मृतेर्विभ्रमो
विभ्रंशः ततोबुद्धेःपरमार्थनिश्चयात्मकस्य
बोधस्यनाशात्तिरोभावः ततःप्रणश्यतिपुरु
षार्थान्मोक्षाद्व्याभ्रश्यति एवंसर्वानर्थमूला

नामपि विषयाणामुपभोगो मोक्षकारण
मिति वदन्किं व्रजेतेत्यस्योत्तरमाह यावदध्या
यसमाप्ति ६३ ॥ रागद्वेषवियुक्तैस्तु विषया
निन्द्रियैश्चरन् आत्मवश्यैर्विधेयात्मा प्रसाद
मधिगच्छति ६४ ॥ विषयध्यानसक्तस्यावि
सक्तात्मनो विषयश्रवणाद्विन्द्रियेषु रागद्वेषौ
स्तः अनीदृशस्तु पुरुषो रागद्वेषमुक्तैरिंद्रियैरा
त्मवश्यैः स्वाधीनैः स्वभावतः षड्भिः विषया
नुपभुंजानः विधेयात्मा विधेयः प्रत्यवमर्शेन
वश्यः आत्मा स्वस्वभावो यस्य स प्रसादं सुखादि
संपर्ककलंकाभावमधिगच्छति प्राप्नोति त
दुक्तं शिवोपनिषदि ग्राहकसम्बन्धे सामान्ये
सर्वदेहिनां योगिनां तु विशेषोयं संबन्धे साव
धानतेति प्रसादे सति किं स्यादित्याह ६४ ॥
प्रसादे सर्वदुःखानां हानिरस्योपजायते प्र
सन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते ६५ ॥
प्रसादे सुखादिलेपाभावे सर्वेषां त्रिविधानां
दुःखानां हानिः क्षयोस्य पुंसो जायते प्रसन्नचे
तसो विमलान्तःकरणस्याशु बुद्धिर्निश्चयात्मि
का प्रत्यगात्मनि पर्यवतिष्ठते निर्विक्लवां

प्रतिष्ठां लभते वो पवनोपि प्रत्यवमर्शही
नस्य बुद्ध्यर्थाभावव्यतिरेकेणाह ६५ ॥
नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना न
चाभावयतः शांतिरशांतस्य कुतः सुखम्
६६ ॥ अयुक्तस्यासमाहितस्य नित्यं स्वात्मा
नमविमृशतो बुद्धिरात्मनिश्चयात्मिका नास्ति
अभावं प्राप्नोति अयुक्तस्य भावनात्मविष
यं ध्यानं च नास्ति अभावयतो भावनामकुर्व
तः शांतिश्चित्तोपरतिर्न अशान्तस्य अनुपरत
चित्तस्य कुतः सुखं मोक्षानन्द इत्यर्थः अयुक्तेत
माह ६६ ॥ इंद्रियाणां हि चरतां यन्मनो न
विधीयते तदस्य हरति प्रज्ञां वायुर्नावमिवा
म्भसि ६७ ॥ इंद्रियाणां विषयेषु स्वैचरतां
मध्ये यदेकमिंद्रियं कर्मभूतं मन आत्ममन
नात्मकमनुविधीयते तु करोति स्वस्वरूपं
त्यक्त्वा तत्सादृश्यं विषयविमर्शात्मकतां ग
च्छति तदेवेंद्रियमस्य पुरुषस्यात्मनिश्चय
रूपां बुद्धिं हरति विषयाविष्टिमां करोति कि
मुवक्तव्यं बहूनि प्रज्ञां हरंतीति यथा प्रम
मस्य कर्णधारस्य नावं वायुः समुद्रे परिभ्रा

मयतितद्वत् तदेतदुपसंहरति ६७ ॥
तस्माद्यस्यमहाबाहोनिगृहीतानिसर्वशः
इंद्रियाणींद्रियार्थेभ्यस्तस्यप्रज्ञाप्रतिष्ठिता
६८ ॥ तस्माद्यस्यसर्वशःसमनस्कानींद्रिया
णिविषयेभ्योनिगृहीतान्युक्तयुक्त्यादांतानि
तेनप्रवृत्त्यातस्यप्रज्ञाप्रतिष्ठिताभवतीत्यर्थः
हेमहाबाहोइतिसंबोधयन् वैरिनिग्रहेस
मर्थस्यतवस्वैरचारीन्द्रियनियमनेपिसाम
र्थ्यंभवेदितिसूचयतितथोक्तम् अस्मत्यका
न्सभावानानाविषयानदुगृहीतान् विज्ञात
परमार्थानांजीवतामेवमुक्ततेति ॥ अतःसंसा
रिपुरुषविलक्षणांप्रवृद्धस्यस्थितिमाह ६८ ॥
यानिशासर्वभूतानांतस्यांजागर्तिसंयमी
यस्यांजाग्रतिभूतानिसानिशापश्यतोमुनेः
६९ ॥ सर्वेषांभूतानामात्मज्ञानशून्यानां
मतीनांयाह्यत्रिरात्मनिष्ठारूपानिशेवनिशा
स्फुटार्थप्रकाशिकापरमार्थभूतायाप्रहंता
याविद्यमानायादेहादिषुनिमग्नतेयतेषा
मस्फुटत्वेनभासनात् तस्यांसंयमीउक्तवि
धयानिगृहीतेंद्रियःप्रवृद्धोजागर्तिस्फुटं

परमार्थं पश्यति यस्यां तु ग्राह्यविषयाणि शब्द
पायांनि जाग्रतां भूतानि जाग्रति स्फुटमर्थं पश्य
ति सा मुनीर्मननशीलस्य आत्मनि समाधि
नस्य पश्यतो दर्शनादिव्यापारं कुर्वतएव नि
शा अस्फुटतयावभासनात् यथा मधुपान
तीवस्य तदुक्तं मोहोपायेषु अंतर्मुखवृत्तयाति
श्च बहिर्वृत्तिपरोपि सन् परिश्रांतनयानि
त्यनिद्रालुरिव लक्ष्यते इति अन्यस्फुटतया
प्यर्थप्रकाशेन तदुक्तैः स्वप्नदुःखादिभिर्विक्रि
यास्यात् तस्येत्युपमाननिदर्शनेन तत्स्वरूप
माह ६९ ॥ आपूर्यमाणमचलप्रतिष्ठं समु
द्रमापः प्रविशंति यद्वत् तद्वत्कामा यं प्रवि
शंति सर्वे स शांतिमाप्नोति न कामकामी ७० ॥
नानानदीभिरापूर्यमाणमप्यचलप्रतिष्ठम
नतिक्रान्तमर्यादमेव समुद्रं पुनरप्यन्या आपो
यथा प्रविशंति तथा कामा विषया यं मुनिम
न्तर्दृष्टिं भोगैरविक्रियमाणमेव प्रारब्धकर्म
भिराक्षिप्ताः सन्तः प्रविशंति स शांतिं मोक्षा
ख्यां प्राप्नोति न तु कामकामी विषयाभिला
षुकः योगी तदभिलाषेण बहिर्धावति अपि

विंद्रियधर्मेन तया विषयानत्र प्रविशंतोनंतरं
गयंतीत्यर्थः एनमेवाभिप्रायं समासेनाह ७०॥
विहाय कामान्यः सर्वान्पुमांश्चरति निःस्पृहः
निर्ममो निरहंकारः स शांतिमधिगच्छति ७१॥
यः पुमान्स्वरूपप्रतिष्ठो निरहंकारो वच्छिन्नदेहा
द्यभिमान इत्यर्थो न केवलं निरहंकारः यावन्नि
र्ममोपि देहादिषु ममताशून्यः तथा निस्पृहः
विषयेषु निरभिलाषः सर्वान्कामान्सामान्विष
यान्विहायोपेक्ष्यांतर्दृष्टिर्भूत्वा चरति भुंक्ते स
शांतिं मोक्षमधिगच्छति याहकेंद्रियनानाते
न सर्वानित्युक्तम् उक्तं चान्यत्र सम्यक्त्वबोध
विश्रांतो योक्षमात्रभवास्थितिः विषयानपि
सेवमानस्या जीवन्मुक्तस्तत्त्वविदिति अथैवं
विधायाः प्रबुद्धावस्थायाः संज्ञान्तरं माहिमानं
चाह ७१॥ एषा ब्राह्मी स्थितिः पार्थ नैनां प्रा
प्य विमुह्यति स्थित्वास्यामंतकालेपि ब्रह्मनि
र्वाणमृच्छति ७२॥ एषोक्तरूपा ब्राह्मी स्थिति
र्ब्रह्मज्ञानावस्था एनां प्राप्य न मुह्यति देहाद्या
त्मप्रत्ययं न भजते यतोस्यामवस्थायामंतका
लेपि मृत्युसमयेपि ईश्वरानुग्रहेणाज्ञोपि स

गी॰टी॰
३॰

णमात्रं स्थित्वा ब्रह्मनिर्वाणं परं तत्त्वं लयमृच्छ
ति प्राप्नोति किंपुनर्वक्तव्यं बाल्यमारभ्य स्थित्वा
प्राप्नोतीति तथोक्तं चिदर्कसुहृदिश्यश्रीभग
वदाशयज्ञेन श्रीसाम्बेन आसां जन्मप्रभृति
भवतः सेवनं तद्धि लोके वाच्यके नापरिमित
फलेषु किंपुनः किं प्रकारम् ज्योतिर्मीत्रः स्मृतिप
थमिता जीवितांतेऽपि मा स्वस्मिन्निर्वाणाय प्रभव
सि सतां तेन न तेऽकः समोऽन्यस्त्विति कर्माणि क्रिय
माणोऽपि स्वात्मबोधेव यथा न ततः बुद्धियोगाच
चक्षेयस्त्वं वंदेऽर्जुन प्रियम् ७२ इति श्रीभगवद्गी
ताटीकायां तत्त्वप्रकाशिकाख्यायां राजानक
लक्ष्मीरामविरचितायां सांख्ययोगो नाम द्वि
तीयोऽध्यायः २ ॥ ॐ अथ कर्मयोगं पूर्वं
सूचितमपि विस्तरेण वक्तुं तृतीयमध्यायं
प्रस्तौति पूर्वमुपक्रमते न तु कर्म चोक्तमात्मबो
धलक्षणं ज्ञानं चोक्तं तत्र द्वयोः प्राधान्यं तु क
मपि तत्त्वबोधस्यैव तत्फलेन कर्मणोऽल्पत्वीय
स्त्वं कथनात् ततः कर्मणा किं प्रयोजनमित्य
र्जुन उवाच ॥ ज्यायसी चेत्कर्मणस्ते मता
बुद्धिर्जनार्दनः तत्किं कर्मणि घोरे मां नियोज

यसिकेशव १ ॥ पूर्वेणाख्यवंकर्मेत्यादिव
दवस्तेनवकर्मणःसकाशाद्यदिबुद्धिरात्म
बोधोज्यायसीप्रकृष्टतरत्वेनमताभिप्रेतान
त्किंकेनहेतुनातत्त्वापिघोरेहिंसात्मकेकर्म
णितनोयुद्धायत्तुज्यस्वेतिकर्मण्येवाधिकार
स्तेइतिचमांनियोजयसिप्रवर्तयसि नतुध
र्म्याद्धियुद्धाच्छ्रेयोन्यदित्यादिनाकर्मणोपिश्रे
ष्ठत्वमुक्तमेवेत्याशंक्याह १ ॥ व्यामिश्रेणे
ववाक्येनबुद्धिंमोहयसीवमे तदेकंवदनि
श्चित्ययेनश्रेयोहमाप्नुयात् २ ॥ क्वचित्कर्म
प्रशंसाक्वचिद्धीप्रशंसेत्येवंव्यामिश्रेणेवस
न्देहोत्पादकेनेववाक्येनमेबुद्धिंमतिंमोहय
सीवोभयत्रदोलायितामिवकरोषि परम
कारुणिकस्यतवमोहकत्वंनास्त्येवयतोत्या
मैमैवंभातीतीवशब्दप्रयोगः अतउभयो
र्मध्यादेकंज्ञानंकर्मवेदमेववानुष्ठेयमिति
निश्चित्यब्रूहि येनैकतरेणसम्यग्गृहीते
नश्रेयोमोक्षमाप्नुयाम् अथान्यथैवमयो
क्तमन्यथैवत्वयाप्रतिपन्नमित्यर्जुनंप्रत्यु
पालम्भमिवाविष्कुर्वंस्तत्संशयमुदासा

31

पश्रीभगवानुवाच २॥ लोकेस्मिन्द्विविधानि
ष्ठापुराप्रोक्तामयानघ ज्ञानयोगेनसांख्यानां
कर्मयोगेनयोगिनाम् ३॥ अस्मिंलोकेधि
कारिजनेनिष्ठात्मपरन्तापकैवाधिकारभेदेन
द्विविधाद्विप्रकारापुरापूर्वाध्यायेमयासर्वज्ञे
नप्रोक्तातत्रस्पष्टमेवोक्ताप्रकारद्वयमेवाह ज्ञान
योगेनेतिसांख्यानांदेहात्मविवेकवतांसिन्नाधिकारि
णांज्ञानयोगेनज्ञानमात्मानात्मतत्त्वस्यप्रत्यभिज्ञा
लक्षणंतत्रयोगःकर्मण्यपिसतिसमाधानेते
ननिष्ठोक्तायोगःपरमात्मनिनिर्विकल्पंसमा
धानंविद्यतेयेषांतेलब्धबोधानात्मनिसमा
हितानांयोगिनांकर्मयोगेनकर्माणिक्रियमा
णेयोयोगःसमाधानंस्वात्मपरामर्शात्मग
स्तेननिष्ठोक्तासांख्यानांज्ञानंप्रधानंयोगिनां
चबोधहेतवेकर्मपूर्वोक्तयुक्त्योक्तम् नन्व
लब्धात्मबोधस्यदेहात्मविवेकाधिकारिणः
प्रत्यभिज्ञालक्षणज्ञानभावनातत्परत्वमेव
युक्तंकृतंकर्मणेत्यतआह ३॥ नकर्मणा
मनारम्भान्नैष्कर्म्यंपुरुषोश्नुते नचसंन्यस
नादेवसिद्धिंसमधिगच्छति ४॥ कर्मणा

मनारंभादनुष्ठानात्पुरुषोनैष्कर्म्यंसर्व
कर्मशून्यत्वंबोधनिष्ठामितियावत् नाश्नु
तेनप्राप्नोतिज्ञानक्रियामयत्वात्संवित्तत्व
स्यभवत्वेवंलब्धात्मबोधस्यतुयोगिनःकर्म
संन्यासएवयुक्तःप्रारब्धस्यप्राप्तत्वादित्या
शंक्याह नचसंन्यसनादिति सन्न्यसनादे
वसर्वकर्मत्यागादेवपुरुषोलब्धात्मबोधो
पिसिद्धमद्वैतलक्षणंज्ञानकाष्ठांनाधिग
च्छतिनाप्नोतियतोज्ञानंकर्मणारहितंनभ
वति कर्मचकौशलोपेतंज्ञानरहितंनभ
वतीत्येकमेवतज्ज्ञानकर्मणी तथाचोक्तं
नक्रियारहितंज्ञानंनज्ञानरहिताक्रिया
ज्ञानक्रियाविनिष्पन्नमाचार्यःपशुपाशहे
ति अत्रहेतुमाह ४ ॥ नहिकश्चित्क्षणम
पिजातुतिष्ठत्यकर्मकृत् कार्यतेह्यवशः
कर्मसर्वःप्रकृतिजैर्गुणैः ५ ॥ हियस्मात्
कश्चिद्देहभृन्यःक्षणमपिस्वल्पंकाल
मपिजातुकस्यांचिदवस्थायांमकर्मकृत्क
र्माऽकुर्वाणोनातिष्ठति कायवाङ्मनसां
परिस्पन्दात्मकत्वात् तथाहिबाल्ययौवना

दिषु तदंतर्गतयोर्वा जाग्रत्स्वप्नयोः कायवा
ङ्मनोभिर्व्यक्तमेव कर्म क्रियते सुषुप्तेपि तत्का
लेव्यतिरिक्तविषयसंवेदनाभावेपि तत्तोनि
र्गतस्य सुखाद्यनुभवप्रत्यवमर्शोन्यथानुपप
त्त्या मानसं कर्म विद्यते एवेति अज्ञस्यापि
कर्मकरणे पारवश्यमेवेत्याह कार्यते इति
हि यस्मात् प्रकृतिजैः प्राधानप्रभवैः सत्वा
दिभिः सर्वोपि अज्ञोपि जनोऽवशः परतंत्र
एव सन् कर्म शास्त्रविहितं शारीरिं वा व्यभिचा
रि च कार्यते अनुष्ठाप्यते ५ ॥ कर्मेंद्रियाणि सं
यम्य य आस्ते मनसा स्मरन् इंद्रियार्थान्विमू
ढात्मा मिथ्याचारः स उच्यते ६ ॥ कर्मेंद्रि
याणि संयम्य स्वव्यापारान्निरुध्य यो वि
मूढात्मा विमूढो देहादावध्यस्तः आत्मास्व
स्वभावो यस्य सः देहादावात्माभिमानवान्
मनसांतःकरणेन शब्दादीश्चिंतयन्नास्ते स
मिथ्याचार उच्यते मिथ्याफलाविसंवादी आ
चारो योगाचरणं यस्य स दांभिक इति याव
त् ज्ञानमंतरेण मानसानां कर्मणामपरि
हार्यत्वात् कर्मेंद्रियग्रहणं सर्वेंद्रियोप

लक्षणोर्थस्तेनमोक्षादीनिवतङ्कंक्षला
णैवे संसारजलवोसकंबलिज्ञोस्मीति
वाधिनम् कर्मव्रमोदुतेश्रष्टयमजेदंत्य
जंयथेति एतद्विपरीतकर्मकर्ताश्रेष्ठइत्या
ह ६ ॥ यस्त्विंद्रियाणिमनसानियम्यार
भतेर्जुन कर्मेंद्रियैःकर्मयोगमसक्तःस
विशिष्यते ७ ॥ तशाहोव्यतिरेकेयःपुनर्ज्ञा
नेंद्रियाणिमनसात्ममनात्मकेननियम्योत्कृष्ठ
कामरागादिदोषेभ्यःप्रतिविध्यनत्वप्रवृत्त्याः
असक्तःफलानभिलाषेणालीनचित्तःकर्मे
न्द्रियैःकर्मयोगमुक्तलक्षणमारभतेत्रातिष्ठति
सविशिष्यते ज्ञानकाष्ठापिरोहेणश्रेष्ठोभव
ति एवश्लोकःकर्मयोगलक्षणप्रतिपादकः
पुरुषोद्देशेनोपदिष्टोभगवतान्यप्रसक्तावप्र
सक्तास्येवोपोद्वलकाहष्ट्याइतियस्मादेवं
तस्मात् ७ ॥ नियतंकुरुकर्मत्वंकर्मज्यायो
ह्यकर्मणः शरीरयात्रापिचतेनप्रसिध्येद
कर्मणः ८ नियतंवर्णाश्रमविभागेननिय
मितंकर्मत्वंवोपयुक्तःकुरुयतो कर्मणःक्रि
यात्यागात्सकाशात्कर्मानुष्ठानंज्यायःश्रेष्ठं

सिद्धिहेतुत्वात् न केवलं सिद्धिहेतुत्वं किंतु
कर्मणः सर्वकर्मसंन्यस्यतस्तव शरीरयात्रा
पि देहस्थितिरपि न प्रसिध्येन्न घटेत पानाश
नादिक्रियांतरेण केनचिदपि वर्तितुमश
क्यत्वात् तदुक्तं कुलार्णवे ज्ञानिनोज्ञानिनो
वापि यावद्देहस्य धारणा तावद्वर्णाश्रमाचा
रः कर्तव्यः कर्ममुक्तये इति ननु कर्मणा वध्य
ते जन्तुरिति स्मृतेः कर्मणो बन्धकत्वात्कुतः
कर्मकरणे श्रुतेः प्रशंससीत्यत आह ८ ॥
यज्ञार्थात्कर्मणोन्यत्र लोकोयं कर्मबन्धनः
तदर्थं कर्म कौंतेय मुक्तसंगः समाचर ९ ॥
यज्ञो विष्णुः यज्ञो वै विष्णुरिति श्रुतेः तदर्थं त
त्प्रीतिनिमित्तात्स्वात्मपरामर्शाविनाकृतात्क
र्मणोन्यत्र तादृशं कर्म वर्जयित्वायं सर्वलो
कः कर्मबन्धनः कर्म शास्त्रीयं स्वाभाविकं वा
बन्धनं संसारदायित्वात्मारवश्यपहेतुर्यस्य स
यथोक्तविज्ञाननिष्ठतया कृतं कर्म परसिद्धि
दं भवतीत्यर्थः तदुक्तं कुलार्णवे क्रियमा
णानि कर्माणि ज्ञानप्राप्तेरनन्तरम् न संस्पृ
शंति तत्त्वज्ञं जलं पद्मदलं यथा तत्त्वनिष्ठ

स्वकर्माणि पुण्यपापानि संत्यजन् प्रयाति
नैवलिप्यंति क्रियमाणानि कायेनेति यत एवं
ततस्त्वंमुक्तसंगः मुक्तस्त्यक्तः संगो फलाभिला
षो येन तदेकनिमित्तावितत्वं येन सः तदर्थमीश्व
रप्रीत्यर्थं मुक्तयुक्तः कर्म समाचर सम्यक्कु
र्वित्यर्थः अतो न मुमुक्षोः कर्म परित्याज्यम्
एवं निवृत्तिधर्माधिकृतस्य मुमुक्षोरपि कर्म
कर्तव्यं प्रवृत्तिधर्माधिकृतस्याप्यतस्यागमो
पन्यासः सर्वकर्मानुष्ठेयतामाह ९ ॥ सहय
ज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः अनेन प्र
सविष्यध्वमेष वोस्त्विष्टकामधुक् १० यज्ञः
प्रतिवर्णाश्रममावश्यकं कर्म तेन सह वर्तंते
इति सहयज्ञाः प्रजा ब्राह्मणाद्याः सृष्ट्वा पुरा
सर्गादौ प्रजापतिर्ब्रह्मेदमुवाच अनेनावश्य
ककर्मणा यूयं प्रसविष्यध्वम् प्रसवो वृद्धिरुत्तर
नराभिवृद्धिं लभध्वमित्यर्थः प्रसविष्यध्वमिति
प्रयोगश्छान्दसः एष यज्ञो वो युष्माकमिष्टका
मधुक् अभीष्टभोगप्रभोगप्रदोस्तु कथमिष्ट
दोग्धृत्वं यज्ञस्येत्याह १०॥ देवान्भावयताने
न ते देवा भावयन्तु वः परस्परं भावयन्तः श्रे

34

थः परमवाप्स्यथ ॥ अनेन सहजन्मनाय
ज्ञेन देवान्युयं भावयत हविर्भागैः संवर्धय
त ते त्स्मा देवा वो युष्मान्भावयंतु अभीष्टदा
नेन वर्धयन्तु एवमन्योन्यं संवर्धयंतो देवा
श्च यूयं च परं श्रेयोभिमतमर्थमवाप्स्यथ ल
प्स्यथ देवास्तर्पिताः संतः स्वर्गाख्यं परं श्रेयो
दास्यंतीति न केवलं पारत्रिकमेव फलं य
ज्ञात्किं त्वैहिकमपीत्याह ॥ ११ ॥ इष्टान्भोगा
न्हि वो देवा दास्यंते यज्ञभाविताः तैर्दत्तान
प्रदायैभ्यो यो भुंक्ते स्तेन एव सः १२ यज्ञभा
विता यज्ञैस्तोषिता देवा हि यस्मात् इष्टान्भो
गान्पशुहिरण्यादीन्वो भवद्भ्यो दास्यंते अ
तस्तैर्देवैर्दत्तान्भोगानेभ्यो देवेभ्य उनमकेभ्यः
पंचयज्ञादिभिरदत्वाऽनृण्यमकृत्वा यो भुंक्ते
स चौर एव देवस्वापहारित्वात् एतदन्नं प्रपति
वचनमतः परं भगवद्वाक्यम् अतो यज्ञेन एव
श्रेष्ठा नेतरेऽत्याह १२ ॥ यज्ञशिष्टाशिनः सं
तो मुच्यंते सर्वकिल्बिषैः भुंजते ते त्वघं पापा
ये पचन्त्यात्मकारणात् १३ ये सन्तः शिष्टा
वैश्वदेवादियज्ञादवशिष्टमश्नंतन्नुपभमश्नं

ति तेपंचसूनाकृतेभ्योविहिताकरणादि
भिः कृतैः सर्वैः पापैर्मुच्यंते पंचसूनाः स्मृता
गृहाः खंडनीपेषणीचुल्लीउदकुम्भीप्रमार्ज
नी पंचसूनागृहस्थस्यताभिः स्वर्गनविंदति
इति पंचसूनाकृतंपापंपंचयज्ञैर्व्यपोहतीति
च व्यतिरेकेदोषमाहतेत्ववधारणे येआत्मनो
भोजनार्थमेवपचंति नतुपंचयज्ञाद्यर्थं
तेपंचसूनोद्भवात्पापात्पापरूपावेवदेवाद्य
करणात्पापमेवभुंजते नकेवलंप्रजापतिव
चनादेवकर्मकर्तव्यं किंतुजगच्चक्रप्रवृत्ति
हेतुत्वादपीत्याह १३॥ अन्नाद्भवंतिभूतानिप
र्जन्यादन्नसंभवः यज्ञाद्भवतिपर्जन्योयज्ञः
कर्मसमुद्भवः १४ कर्मब्रह्मोद्भवंविद्धिब्रह्मा
क्षरसमुद्भवम् तस्मात्सर्वगतंब्रह्मनित्यंय
ज्ञेप्रतिष्ठितम् १५ अन्नाद्भुक्ताच्छोणितरूपे
णपरिणताद्भूतानिप्राणिशरीराणिउत्पद्यंते
पर्जन्याद्वृष्टेरन्नस्यसमुद्भवः यज्ञात्कारीर्यादे
रग्निहोत्रादेश्चापूर्वाख्याद्धर्मात्पर्जन्योभवति
यज्ञोयज्ञाख्यः यज्ञस्यच सर्वस्यविहितंकर्म
कारणंतस्मात्सर्वोत्पादकम् तथाचस्मृतिः अ

35

ग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते आदि
त्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजा इति कर्म य
जमानव्यापारेतिकर्तव्यतारूपं ब्रह्मवेदस्तदु
द्भूतं विद्धि प्रमाणं जानीहि ननु पाषण्डिशास्त्रा
द्युद्भवं तस्य ब्रह्मवेदाख्यमक्षरात्परब्रह्मणो
ऽद्भूतं सर्वसमुद्भवः आविर्भावो यस्य तत् तथा
च श्रुतिः अस्य महतो भूतस्य निःश्वसितमेत
द्यदृग्वेदो यजुर्वेदः सामवेद इति न तु बुद्धिपू
र्वकेन चित्पाषंडिना निर्मितम् तस्मात्सर्वग
तमप्यक्षरं ब्रह्म नित्यं सर्वदा यज्ञे प्रतिष्ठितम्
यज्ञेनोपायेन प्राप्यत इत्यर्थः उद्यमस्थाः सदा
लक्ष्मीरिति वत् यद्वा यदर्थमेवं प्रसक्तं तस्या
र्थस्य किल यज्ञे प्रतिष्ठा स्थितिरित्यर्थः भवत्वे
वं ततः किं फलमित्याह १५ ॥ एवं प्रवर्तितं
चक्रं नानुवर्तयतीह यः अघायुरिंद्रियारामो
मोघं पार्थ स जीवति १६ एवमन्नाद्भवंतीत्या
दिक्रमेणेश्वरेण जगत्स्थितये प्रवर्तितं प्रवृत्ति
धर्मात्मकं तथा विध्युक्तं च चक्रं य इह लोके स्वय
मपि यथाशास्त्रमननुवर्तमानो न्यानपि ना
नुवर्तयति सोऽघायुर्नरकनिमित्ताय पापाये

वायुर्जीवितं यस्य स इंद्रियैर्वितं यस्य स इंद्रि
यैर्विषयेष्वेव रममाणो मोघो भावि स्वर्गादि
भोगसंचयाभावाद्व्यर्थं जीवति प्रारब्धं कर्म
क्षपयतीत्यर्थः न तु कस्यचिद्ब्रह्मविदोपि ज्ञा
नोत्कर्षेण क्षीणसंकल्पत्वाच्छास्त्रीयं कर्मक
र्तव्यं नास्त्येवाद्युष्टमतिनेत्याह १६ ॥ यस्त्वा
त्मरतिरेव स्यादात्मतृप्तश्च मानवः आत्मन्ये
व च संतुष्टस्तस्य कार्यं न विद्यते १७ आत्मा
न्येवात्मनि इष्टेर्थेभिलाषो रतिः आत्मेष्टेर्थे संप
र्णेच्छता तृप्तिः अभिकांक्षा निवृत्तिः संतो
षः यस्यैते रतितृप्तिसंतोषाः सदा सन्निहि
ता आत्मन्येव प्रतिष्ठिता न विषयेषु तस्यात्र
ह्मविदो वरिष्ठस्य कार्यमवश्यकर्तव्यं न वि
द्यते ईदृश्येवावस्थायां कृतं तत्कृत्यं नत
त्वात्मलाभादि नेयतो मानवश्चत्क्रमम् मइ
क्रमागमेजलं हि मं च यो वेदगुरुवक्त्रागम
मात्रिये नास्त्येव तस्य कर्तव्यं न स्यापक्व्म
जन्मनेतिनिष्पाचकुलाणिवे उत्पन्नसहजा
नन्दस्तत्त्वज्ञानरतः प्रिये सर्वसंकल्पसंन्य
कः स विद्वान्कर्मसंत्यजेत् अत्रहेतुमाह

१७ ॥ नैव तस्य कृतेनार्थो नाकृतेनेह कश्च
न न चास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः
१८ तस्यात्मारामस्य ब्रह्मविदः कृतेन कर्म
णार्थः स्वर्गादिलक्षणं प्रयोजनं नास्ति न
चाकृतेन कर्माकरणेन कश्चन प्रत्यवायनि
रयादिप्राप्तिलक्षणोस्ति निरहंकारतया
विधिनिषेधातीतत्वात् ननु मोक्षे देवकृत
विघ्नसंभवात्तत्परिहारार्थं कर्मभिर्देवाः से
व्या इत्याशंक्याह सर्वभूतेषु ब्रह्मादिस्थाव
रान्तेषु कश्चिदर्थव्यपाश्रयोर्थो मोक्षे आश्र
यणीयो नास्तीत्यर्थः विघ्नाभावस्य श्रुत्यैवो
क्तत्वात् तथा च श्रुतिः तस्य ह न देवाना भू
त्या ईशते आत्मा ह्येषां स भवतीति ह नेत्य
व्ययमर्थे देवा अपि तस्यात्मतत्त्वज्ञस्या
भूत्यै ब्रह्मत्वप्रतिबन्धाय नेशते न शक्नुव
न्तीति श्रुतेरर्थः देवकृतास्तु विघ्नाः सम्यग्ज्ञा
नोत्पत्तेः प्रागेव तथा च श्रुतिः यदेतद्ब्रह्म
मनुष्या विदुस्तदेषां देवानां न प्रियमिति ब्र
ह्मज्ञानस्यैवाप्रियत्वमुक्तं तेनैव विघ्नकर्तृ
त्वसूचितत्वात् यत एवंभूतस्यैव ज्ञानि

36

नः कर्मणोपयोगो नास्यस्यात्तस्यैवोपयुक्त
स्यैवेत्याह १८ ॥ तस्मादसक्तः सततं कार्यं
कर्म समाचर असक्तो ह्याचरन्कर्म परमाप्नो
ति पूरुषः १९ तस्मात्कारणात्त्वं वोपयुक्तोपि
मुमुक्षुस्त्वमसक्तः फलानभिलाषी न तदति
मयत्वितिवृत्तिः सन्सततं नित्यं कार्यमवश्य
कर्तव्यतया चोदितं कर्म समाचर सम्यग्ना
त्मतत्त्वप्रतिष्ठितत्वेन मनागप्यप्रमत्ततया
चराद्रतिष्ठ हि यस्मादसक्तः पुरुषो वोपयु
क्तः प्रवर्त्तिपुरुषोऽन्ये पशुसंज्ञाः शास्त्रेषूक्ता
षिताः तदुक्तं कुलार्णवे निद्रादिमैथुनाहा
राः सर्वेषां प्राणिनां समाः ज्ञानवान्मानवः
प्रोक्तो ज्ञानहीनः पशुः प्रिये इति अत्रोदाह
रणमाह १९ ॥ कर्मणैव हि संसिद्धिमा
स्थिता जनकादयः लोकसंग्रहमेवापि सं
पश्यन्कर्तुमर्हसि २० हि यस्मात् जनकाद
यो राजर्षयः कर्मणैव वर्णाश्रमोचितेन प्र
जापालनादिना संसिद्धिं सम्यग्ज्ञानोत्कर्ष
मास्थिताः स्वीकृतवन्तः तत्त्वविदोप्यत्यं क
र्मपरित्यागहेतुमाह लोकसंग्रहमिति

37

लोकस्यस्वधर्मादिकारिजनस्यसंग्रहः स्वध
र्मेप्रवर्तनंमयाकर्माणिकृतेसर्वोजनः
करिष्यति अन्यथाज्ञानिदृष्टांतेनाज्ञः क
र्मत्यजत्यतेदित्येवं लोकरक्षणमपिना
वश्यंयोजनम् पश्यन्कर्मकर्तुमर्हसिन
त्यक्तुमित्यर्थः तथाहि २०॥ यद्यदाचरति
श्रेष्ठस्तत्तदेवेतरोजनः सयत्प्रमाणंकु
रुतेलोकस्तदनुवर्तते २१ श्रेष्ठः कुलवि
द्यादिमान्निकृष्टोजनयद्यत्किंचित्कर्मानु
तिष्ठते इतरोजनः कार्याकार्यविवेकशून्यम
तिस्तत्तदेवानुतिष्ठतिनान्यत् सश्रेष्ठोजनः
प्रवृत्तिशास्त्रंवायत्प्रमाणंकुरुतेतदेव
लोकोप्यनुसरति अतश्चाहमेवदृष्टां
तमाह २१॥ नमेपार्थास्तिकर्तव्यंत्रिषु
लोकेषुकिंचन नानवाप्तमवाप्तव्यंवर्त
एवचकर्मणि २२ हेपार्थमेममवर्णा
श्रमभेदअवस्थापकस्येश्वरस्यकिंचन
कर्तव्यंनास्तिकुतः त्रिष्वपिलोकेष्वप्राप्तं
तत्प्राप्तंनास्त्याप्तकामत्वात् तथापिकर्म
णिवर्तएवकर्मकरोमीत्यर्थः व्यतिरेकेना

शोप्रसक्तिरित्याह २२ ॥ यदिह्यहंनवर्ते ७५
यंजातुकर्मण्यतंद्रितः ममवर्त्मानुवर्तं
तेमनुष्याःपार्थसर्वशः २३ हि निश्चये
ऽहंजातुकदाचिदतंद्रितोऽनलसः सन्सर्वैः
प्रकारैर्यदिकर्माणिनवर्तेयं कर्मनानुति
ष्ठेयं तत्सर्वेमनुष्याःकर्माधिकारिणोममैव
वर्त्मानुवर्तेरन्नित्यर्थः ततश्च २३ ॥ उत्सी
देयुरिमेलोकानकुर्यांकर्मचेदहम् सं
करस्यचकर्तास्यामुपहन्यामिमाःप्रजाः
२४ यद्यहंकर्मनकुर्यांतदिमेलोकाउत्सी
देयुःकर्मलोपेननश्येयुःकर्मनिबन्धना
हिलोकस्थितिः ततश्चवर्णसंकरोभवेत्
तस्याप्यहमेवकर्तास्यांभवेयम् ततश्चेमाः
प्रजाउपहन्यांमलिनीकुर्याम् ननुतवेश्व
रस्यलोकसंग्रहार्थंकर्मकुर्वाणस्यनात्मि
मन्नाचिंततया समाधानादुपपत्तेर्वा यत्का
निःस्यादित्यतआह २४ ॥ सक्ताःकर्मण्य
विद्वांसो यथाकुर्वन्तिभारत कुर्याद्विद्वां
स्तथासक्तश्चिकीर्षुर्लोकसंग्रहम् २५
अविद्वांसोबोधशून्याःकर्मणिशक्ताःफ

लाभिलाषेणतत्सक्तोन चितायथाकर्मकुर्व
न्तितथालोकसंग्रहंचिकीर्षुःपुरुषःलोक
स्यात्तुरस्यजनस्यसंग्रहंसर्वोक्तंचिकीर्षु
रसक्तःसन्फलाभिलाषकर्तृत्वाद्यभिमा
नात्रिगुणसाम्यंप्रकृतिःनत्वेवन्याभिर्गु
णैःसत्वादिभिःसमकृष्टास्तेष्वेवानुखे
नतिरस्कृतस्वस्वरूपागुणेषुगुणकार्येषु
देहादिषुतत्कर्मसुचसज्जन्तेऽहंकारमका
रैभजन्तेतान्कर्मसंगिनोऽकृत्स्नविदोकृ
त्स्नपरिमितंदेहाद्यात्मत्वेनमन्यमानान
नएवमन्दाज्ञतानु ज्ञानाधिकारमप्राप्ता
न्कृत्स्नवित्परिपूर्णात्मविन्नचालयेदात्मोपदे
शेनकर्मश्रद्धातोनप्रच्यावयेत् कृत्स्नाकृ
त्स्नशब्दौह्यात्मानात्मपरितयायास्कस्यार्थानु
सारेणवार्तिककृद्भिर्व्याख्यातौ एवंलोकसं
ग्रहायापिकर्मानुष्ठीयमानंयथायोगिनः
कैवल्यायैवपर्यवस्यतितथार्जुनमुद्दिश्य
प्राप्तकमपिकर्मयोगंप्रत्यनरूपदिशति २९
मयिसर्वाणिकर्माणिसंन्यस्याध्यात्मचेत
सा निराशीर्निर्ममोभूत्वायुध्यस्वविगतः

ज्वरः २९ त्वंप्रबुद्धत्वान्निराशीर्निष्कामो
निर्ममः सर्वभावेषुममताशून्योभूत्वासर्वा
णिकर्माणिलौकिकानिवैदिकानिचाध्या
त्मचेतसात्मनिष्ठेनमनसामयिपरमेश्वरे
परमगुरौसंन्यस्यसमर्प्येश्वरायैवकर्म
त्रपंस्रजनंभृत्यवत्करोमीत्येवंतथाचाग
मेषूपदिष्टम् शिवोभूत्वाशिवंयजेदिति
एतदेवब्रह्मणिकर्मणांसमर्पणम् तथा
विगतज्वरस्त्यक्तशोकोयुध्यस्वस्वकर्मानु
तिष्ठ एतावताध्यायेनप्रायःकर्मयोगोपदे
शःपरिसमाप्तःप्रथमेस्यप्रस्तावनाद्विती
येज्ञानस्वरूपेपरिवदितं तृतीयेतत्संस्कृ
तस्यकर्मणोवश्यानुष्ठेयत्वेत्येवंभूतस्यप
रमरहस्यस्यस्वमतस्यप्रभावमाह २९॥
येमेमतमिदंनित्यमनुतिष्ठंतिमानवाः
श्रद्धावंतोनसूयंतोमुच्यंतेतेपिकर्मभिः ३०
येमानवाइदमनंतरोक्तंमेमतमभिप्राय
सर्वशास्त्रसर्वस्वभूतंनित्यंसर्वकालम
नुतिष्ठंतिकथंविधाःश्रद्धावंतोयथोक्त
फलसंभावनयाऽसूयाश्चनसूयंतोदोषदृ

श्रिमकुर्वतः तएवकर्मभिरपिसंसारदायि
त्वादन्यैरपिमुच्यंते नतुनर्बध्यंते किंच
२७॥ येत्वेतदभ्यसूयंतोनानुतिष्ठंतिमे
मतम् सर्वज्ञानविमूढांस्तान्विद्धिनष्टा
नचेतसः २८ येतुनैतदेवंविषयमत्यंत
मभ्यस्यन्तःकथमात्मनिसमाहितेन
कर्मकर्तुंशक्यमित्येवंरूपेणदोषारोप
णेनविगर्हन्तोनानुतिष्ठंति तांस्त्वेव
हेयोपादेयनिश्चयरूपेषुज्ञानेषुविमू
ढांस्तथाचेतसोविवेकान्नष्टान्मूर्खप्रायो
ष्टान्विद्धिजानीहि इदानीमुक्तार्थदृढ
प्रतिपत्तयेकर्मणस्त्यागानुपपत्तिमाह
२८॥ सदृशंचेष्टतेस्वस्याःप्रकृतेर्ज्ञानवा
नपि प्रकृतिंयांतिभूतानिनिग्रहःकिंक
रिष्यति २९ स्वस्याःअसाध्याभावेनतदनि
मग्नचित्तःसकर्मकुर्यात् नतुज्ञानादस्य
संगराहित्येनैवविशेषइत्येतच्चाहविद्वा
न् अन्यजनतुल्यस्वहृदयसंवेद्यवो
धसमाहितः तदुक्तं परमार्थचमत्कार
मत्तःस्वानुभवंविना अन्यस्यान्योनजा

नातिशीघ्रास्वादमिव द्विज इति तदुक्तं कला
णिवे योगिनो विविधैर्वेशैर्नानागुणोपकारि
णः अमेति पृथिवीमेतामविज्ञातस्वरूपिणः
अलक्ष्याहि यथालोके व्योम्नि चन्द्रार्कयोर्गतिः
नक्षत्राणां ग्रहाणां च तथा हृष्टं न योगिनः इति
नन्वेकरूपया नत्र स्नानमेवोपदेष्टुं युक्तं नेत्याह
२६ ॥ न बुद्धिभेदं जनयेदज्ञानां कर्मसंगिनां
जोषयेत्सर्वकर्माणि विद्वान्युक्तः समाचरन्
२६ विद्वान्बुद्धो युक्तश्चात्मतत्त्वे समाहितः
सन्यथावर्णाश्रमं स्वयं समाचरन्कर्म कुर्वाणः
कर्मसंगिनां फलाभिलाषेण तत्पराणां मज्ञा
नामीश्वरतिरोधानाशक्त्या वा प्रपन्नानां बुद्धेः
प्रज्ञाया आत्मोपदेशेन भेदं तादृशात्संगात्स्वा
वनं जनयेत् किन्तु सर्वकर्माणि जोषयेत्
प्रीत्या सेवयेत् अन्यथा कर्मस्वश्रद्धानिष्ठ
मेर्वोपस्य चानुत्पन्नेस्तेषामुभयभ्रंशः स्यादि
ति भावः तदुक्तम् स्वतस्स्वार्थप्रवृत्तस्य सर्वब्र
ह्मेति यो वदेत् महानिरयजालेषु सतेन
विनियोजित इति नत्र विद्वषापि चेत्कर्मक
र्तव्यं तर्हि विद्वदविदुषोः को भेद इत्यत आह

40

द्वाभ्याम् २६ प्रकृतेः क्रियमाणानि गुणैः क
र्माणि सर्वशः अहंकारविमूढात्मा कर्त्ताह
मिति मन्यते २७ प्रकृतेः सम्बन्धिभिर्गु
णविकारैरधिष्ठानेन तथा कर्त्रेत्यादिना वक्ष्य
माणैरिंद्रियादिभिः सर्वाणि कर्माणि क्रिय
माणानि भवंति अहंकारेण देहादिष्वात्माध्या
सेनाचिज्जडयस्थिरूपेण विमूढात्मा प्रवृत्तस्व
भावतस्तत्कर्त्ताहमिति मन्यते जानाधिष्ठ
रूपं स्वस्वरूपे कर्तृत्वमारोपयतीत्यर्थः वि
द्वांस्तु तथा न मन्यते इत्याह २७ तत्त्ववित्तु महा
बाहो गुणकर्मविभागयोः गुणा गुणेषु वर्तंते
इति मत्वा न सज्जते २८ तद्व्यतिरेके गुणकर्म
विभागयोस्तत्त्वविद्याथात्म्यवित् नाहं गुणा
त्मको न मे कर्माणीत्येवं गुणा गुणकार्याणीं
द्रियादीनि गुणेषु तत्कार्येषु विषयेषु वर्तंते
स्वभावतः प्रवृत्तिं भजंते तथा च श्रुतिः परा
ञ्चि खानि व्यतृणत्स्वयंभूरिति तत्त्वं ज्ञात्वा न स
ज्जतेहंकारममकारौ तेषु तेषु न करोतीत्य
र्थः न बुद्धिभेदं जनयेदित्युक्तमर्थमुपसं
हरति २९ प्रकृतेर्गुणसंमूढाः सज्जन्ते गु

णकर्मसु ॥ नानकृत्स्नविदो मन्दान्कृत्स्न
विन्न विचालयेत् २९ ॥ गुणा याः प्रकृतेर्गु
णसाम्यात्मकस्य स्वरूपविस्मरणरूपस्य जीव
न्ततोः स्वभावस्य सदृशं सत्त्वाद्युद्रेकात्तत्र
पंज्ञानवानपि दृष्टतत्त्वोपि गुणदोषज्ञान
वानपि चेष्टते न्मनोवाक्कायैर्यत्किंचित्क
र्मकरोति तत्त्वकृत्स्नं गुणमेव किं पुनर्व
क्तव्यमत्रास्मि श्चेतश्च तियांति सर्वथा तामेवा
श्रयंते न तत्त्व्यतिरेकेण षष्ठितु स्वदितं
वोत्सृज्य ते अन्यथा ज्ञतत्त्वविदविरहः निग्र
होनेदं स्वजातिविहितं कर्म करिष्यामीत्या
ग्रहः किं करिष्यति ३ कृष्णमा कर्मणो दु
ष्परिहरत्वादिति भावः एवमपि हार्येकर्म
णि योगिनो परमहंस्योपदेशमाह ३३
इंद्रियस्येंद्रियस्यार्थे रागद्वेषौ व्यवस्थितौ
तयोर्न वशमागच्छेत्तौ ह्यस्य परिपंथिनौ
३४ इंद्रियस्येंद्रियस्येति वीप्सा प्रत्येकमिंद्रि
याणां शब्दादौ स्वस्वविषये त्वनुकूले रागः
प्रतिकूले च द्वेष इत्येवं रागद्वेषौ व्यवस्थि
तावेव प्रयंभविनौ तत्र अतदनुरूपा अता

नोपप्रवृत्तिरिति तिनयापि मुमुक्षुस्तयो रागद्वेष
योर्नैव वशवर्ती भवेत् कुतः तावस्य श्रेयोपव
तो मुमुक्षोः परिपन्थिनौ शत्रू स्वरूपाच्छाद
काविति यावत् नत्रागादिनियमे सत्य
पि प्रकृत्यधीनेव चेन्मुकस्य प्रवृत्तिल
ह्निविधिनिषेधशास्त्रवैयर्थ्यं प्रसक्तेर्दुः
खावहयुद्धादिस्वादिचर्यैव श्रेयसीत्यत
आह ३४ श्रेयान्स्वधर्मो विगुणः परध
र्मात्स्वनुष्ठितात् स्वधर्मे निधनं श्रेयः पर
धर्मो भयावहः ३५ स्वनुष्ठितकलांगतं
मत्वीकृतादपि परधर्मात् द्विजातीयधर्मा
त्सकाशात्स्वधर्मो वर्णाश्रमविभागेशा
स्त्रेण विहितो विगुणोपि निकृष्टोप्यथवा
किंचिदंगहीनोपि श्रेयान्प्रशस्यतरः
अत्र हेतुः स्वधर्मे स्थितस्य निधनं मरणम
पि श्रेयः किंपुनर्जीवितं इह लोके कीर्ति
करत्वेन परत्र नरकप्रदत्वेन च भयावहः
अत्र शास्त्रस्य त्याविहेत्वात्परलोके च स्व
र्गादिप्रापकत्वात् परधर्मस्तु इहाकीर्तिरा
जादेवनियामकत्वात् इहलेवत्यान्ननेवय

41

र्थ्यमिति नतु शास्त्रस्यादिष्टमेव न त्याज्यानि
च्छतोपि पुरुषस्य प्रतिषिद्धाचरणे कोहेतु
रित्येवं पिपृच्छिषुरर्जुनउवाच ३५ अथके
न प्रयुक्तोयं पापं चरति पूरुषः अनिच्छन्न
पि वार्ष्णेय बलादिव नियोजितः ३६ अ
थेति प्रश्ने हे वार्ष्णेय वृष्णिवंशावतीर्णोयं पुरु
षोनिच्छन्नपि केन प्रयुक्तः प्रेरितः सन्नपि ने
वमत्यन्तमादिष्टः पापं शास्त्रनिषिद्धमाचर
ति अनुतिष्ठति इति अत्रोत्तरं श्रीभगवानुवा
च ३६ काम एष क्रोध एष रजोगुणस
मुद्भवः महाशनो महापाप्मा विद्ध्येनमिह
वैरिणम् ३७ प्रतिषिद्धाचरणे यस्त्वया पृ
ष्टो हेतुः स एष कामो विषयोन्मुखः संकल्प
रूपोभिलाषः ननु क्रोधोप्यभिचरतो हेतु
र्दृष्ट इत्यत आह क्रोध एष काम एव केनचि
त्प्रतिहतः क्रोधात्मना परिणमते स एष र
जोगुणसमुद्भवः रजोगुणात्संभवतीति
न केवलं प्रतिषिद्धाचरण एव हेतुर्याव
त् विद्ध्येनमिह वैरिणम् इह मोक्षमार्गे
एनं कामं वैरिणमाततायिनं जानीहि

42

नद्धर्मंशिवस्त्वेषु अभिलाषाद्वहिर्गतिः से
वायास्येतिततोयंसमादिभिरुपायैरवश्यंह
न्तव्यः तत्रद्वयोरसम्भवे विशेषणद्वाराह
महाशनोमहदशनंयस्यसनास्योदातेनस
न्यातेशक्यतेइत्यर्थः तथाचस्मृतिः यत्पृथि
व्यांव्रीहियवहिरण्यंपशवःस्त्रियः नालमेक
स्यतत्सर्वमितिमत्वाशमंव्रजेदितिअथवा
महत्स्यात्मवस्यसन्तोषमहत्वरूपस्यात्मस
त्वरूपस्यवाशनोव्यवधायकइतितदुक्तं
यच्चकामसुखंलोकेयच्चदिव्यंमहत्सुखम्
तृष्णाक्षयसुखस्यैतेनार्हतःषोडशीकलामि
तितथानापिसामस्रासन्धातेशक्यः यतोमहा
पाप्मात्युग्रः अस्यैवैरित्वमेवदर्शंतेःस्पष्टय
ति ३७ धूमेनाव्रियतेवह्निर्यथादर्शोम
लेनच यथोल्बेनावृतोगर्भस्तथातेनेद
मावृतम् ३८ यथाधूमेनसहजेनवह्नि
राव्रियतेऽप्रसर्पत्वान्निरुद्धभास्वरशक्तिः
क्रियते नतुधूमावृतोपिवह्निर्दाहादिल
क्षणंस्वकार्यंकरोतीत्यत्राह यथागन्तु
केनमलेननिश्वासादिजन्मनादर्शोव्रिय

नेनिरुद्धप्रतिबिम्बग्रहणलक्षणकार्यं
क्रियते न तु स्वच्छतामात्रतिरोधाने सत्यपि
स्वरूपतस्तादर्शोपलम्भात्तथैवेत्यत्राह य
थोल्बेनोत्पन्नास्यदेहल्वेनजरायुणा गर्भो निरु
द्धक्रियास्तिरोहितस्वरूपश्च क्रियते तथा
नेनकामेनसहजत्वाद्सर्वपर्येणाविषया
वुत्थितत्वाच्चागन्तुकेनमोहनिरोधकत्वाज्ज
त्पन्नास्यदेहेनेदं ज्ञानमावृतं निरुद्धशक्तिक्रि
यास्वरूपंकृतम् तथा तेनेदमावृतमिति वा
क्यं विवृणोति ३८ आवृतं ज्ञानमेतेन ज्ञा
निनो नित्यवैरिणा कामरूपेण कौन्तेय दुष्पू
रेणानलेन च ३९ एतेन कामरूपेणाभिला
षात्मना ज्ञानिनः स्वात्मसंवेदनसुखेज्ञान
वतो नित्यवैरिणा सहजशत्रुणा ज्ञानं स्वस्वभा
वसंवेदनलक्षणं सुख्यं ज्ञानमावृतम्
नतु ज्ञानिनो हन्तव्योप्यज्ञस्य रूपादेयएवेत्य
तआह दुष्पूरेणानलेनचेति चउपमानार्थः
अग्निरिव दुःपूरितमशक्य इत्यर्थः तथा च स्मृ
तिः नजातु कामः कामानामुपभोगेन शा
म्यति हविषा कृष्णवर्त्मेव भूयएवाभिवर्धते

43

इति अथवानलेन च न विद्यते अलंभावो वि
षयेभ्यो निवृत्तिलक्षणा पर्याप्तिर्यस्य तेन अ
नो हन्तव्यः ज्ञाते हि शत्रोरधिष्ठाने सुखेन जे
तुं शक्यत इति तदधिष्ठानमाह ३९ इन्द्रिया
णि मनो बुद्धिरस्याधिष्ठानमुच्यते एतैर्विमो
हयत्येष ज्ञानमावृत्य देहिनम् ४० विषय
दर्शनेन संकल्पेनाध्यवसायेन च कामस्याविर्
भावादित्येतान्यधिष्ठानानि एतैरिन्द्रियादि
भिर्दर्शनादिव्यापारवद्भिराश्रयभूतैरेष कामो ज्ञा
नमावृत्य देहिनं विमोहयति स्वरूपानभि
ज्ञं देहाद्यध्यासादिना मोहेन युनक्ति यद
यमेवंविधः शत्रुस्तत्कथं हन्तव्य इत्याह ४०
तस्मात्त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ
पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनम्
४१ तस्मादधिष्ठानभूतानीन्द्रियाणि मनोबुद्धि
सहितानि बुद्धिकर्मेन्द्रियाण्यादौ मोहनात्पूर्वमे
व नियम्य सत्स्वात्मस्वरूपप्रतिष्ठानकेन मत्यये
न निश्चयेन पापरूपमेनं कामं ज्ञानय कोदृशं
ज्ञानस्य शास्त्रीयस्य विज्ञानस्यात्मसाक्षा
त्कारलक्षणस्य नाशनं तिरस्कारिणम् तथा च

मेऽक्तिः काम जानामि ते मूलं संकल्पात्किल
जायसे न त्वां संकल्पयिष्यामि समूलो न भव
ष्यसीति न तु यथायं सामदानाभ्यामशक्यः
सत्यानं तर्हि केनोपायेनायं प्रतिकार्य इत्या
शंक्याते तेषां परस्परभेदः संहृत एव दंडेन व
ध्य इत्याह द्वाभ्याम् ४१ इंद्रियाणि पराण्या
हुरिंद्रियेभ्यः परं मनः मनसस्तु परा बुद्धि
र्यो बुद्धेः परतस्तु सः ४२ एवं बुद्धेः परं बुद्ध्वा
संस्तभ्यात्मानमात्मना जहि शत्रुं महाबा
हो कामरूपं दुरासदम् ४३ इंद्रियाणि
देहादिविषयादिभ्यः पराणि सूक्ष्मत्वात्प्रकाश
कत्वाच्छ्रेष्ठानि व्यतिरिक्तानि चाहुः प्रणिधान
कुशलाः एवमुत्तरत्र इंद्रियेभ्यः संकल्पात्मकं
मनः परं तत्प्रवर्तकत्वात् मनसस्तु बुद्धि
र्निश्चयात्मिका परा निश्चायकत्वात् यस्तु
बुद्धेः परतस्तत्साक्षित्वेनावस्थितः सर्वांतरः
स आत्मा विमोहयति देहिनमिति देहशब्दो
क्त आत्मा स इति परामृश्यते एवं यथोक्त
प्रकारेण बुद्धेः परमात्मानं बुद्ध्वात्मनैवात्म
निरपेक्षेणैव स्वस्वरूपेणात्मानं स्वभावं सं

टि॰ गी॰
४४

स्तभ्यात्मानं तया वष्टभ्य परामृश्य तु रामदं स
माधानं दुःखेन सादनीयं दुःखेनासादनी
यं दुर्विज्ञेयगतिकामरूपं शत्रुं स्वात्मपरा
मर्शरूपेण दंडेन जहि मारय एवं भगवता
त्रियोचितेनैव प्रकारेणार्जुनमुद्दिश्य का
मनिवर्हणे तत्साद्धूपदिष्टः इत्याम् अव
द्वारेणनासक्तास्वसत्तामर्शी परिच्छिनत्तिम्
कर्मयोगमवोचद्यं लेवन्तेहूक्तमव्ययम्
इति श्रीभगवद्गीताटीकायां तत्त्वप्रकाशि
काख्यायां राजानकलक्ष्मीरामविरचिता
यां कर्मयोगो नाम तृतीयोऽध्यायः ३
एवमस्याध्यायस्य कर्मयोगलक्षणमभिधे
यं परमात्मसमापत्तिलक्षणं प्रयोजनं च प्र
तिपाद्य समासाभिवविवक्षितमर्थमन्वानः
सम्बन्धविषयौ विवक्षयार्जुनस्यात्मनिरु
ढत्वमात्रप्रतिपत्तिव्यामोहध्वंसाय पर
मकारणतामाविष्कुर्वन्नमिति त्रिभिः श्री
भगवानुवाच इमं विवस्वते योगं प्रोक्तवा
नहमव्ययम् विवस्वान्मनवे प्राह मनुरि
क्ष्वाकवेऽब्रवीत् १ इममध्यायद्वयेनोक्तं यो

गं विवस्वते सवित्रेहं परमेश्वर एव कस्मिंश्चि
त्काले लीलागृहीततनुः प्रोक्तवानुपदिष्टवा
न् कीदृशमव्ययं परमकारणे वदत्वयं स
नातनमव्ययफलत्वाद्वाव्ययम् विवस्वान्म
नवे मनुसंज्ञाय स्वपुत्राया दिराजाय प्रोवाच
सोपि मनुरिक्ष्वाकुसंज्ञाय स्वपुत्रायाब्रवीत्
एवं परमकारणादेव प्रवृत्तिर्योगस्येति संब
धउक्तः १ एवं परम्परा प्राप्तमिमं राजर्ष
यो विदुः स कालेनेह महता योगो नष्टः परं
तप २ एवं परमेश्वरात्प्रभृति पुत्र शिष्य
प्रशि
ष्यादि परम्परया प्राप्तमिमं योगं राजर्षयो रा
जानश्चते राज्य लक्षणे कर्मणि क्षत्रिया अपि
योक्तज्ञान निष्ठत्वादृषयश्च निमिजनक
प्रमुखो विदुर्विदांचक्रुः अयततनाना मज्ञा
नेकारणमाह स इह परन्तप शत्रुतापन स योगो
महता कालेन युगसहस्रादिसंख्येनेह
लोके लोकस्य क्रमापचीयमान प्रज्ञादिबा
हुल्यान्नष्टो न्तर्वीनमागतः परमकारण एवावस्थि
तः एतेनास्य योगस्य दुर्लभतागौरवं च
प्रदर्शितम् २ स एवायं मयाद्य योगः

प्रोक्तः पुरातनः भक्तोसि मे सखा चेति रहस्यं ह्ये
तदुत्तमम् ३ अयं विच्छिन्ने संप्रदाये सति
स एव वाद्य इह त्वत्तुभ्योयं योगः पुरातनो नित्यो
मया परमेश्वरेणातिस्निग्धेन ते तुभ्यं प्रोक्तः
न त्वन्यस्मै कस्मैचित् यतो मम भक्तोसि स
खा चासि शोभनात्वा च येन भक्तेः प्राधान्यद्यो
तकः इति शास्त्रीहेतो ऽतोन्यस्मै नोच्यते तस्मा
द्धि यस्मादेतद्रहस्यानामुत्तमं मे श्रेष्ठं रह
स्यमतिगोप्यम् एवंविधयोक्तः भगवत्स
त्रूपं जानन्नपि लोके स्फुटीकर्तुमर्जुन उवाच
अपरं भवतो जन्म परं जन्म विवस्वतः कथ
मेतद्विजानीयां त्वमादौ प्रोक्तवानिति ४
भवतो जन्म वसुदेवगृहे शरीरग्रहणमप
रमिदानीन्तनमपकृष्टं च मनुष्यत्वात् विव
स्वतो जन्म परं प्राक्कालीनं सर्गादिभावत्वा
त् उत्कृष्टं च देवत्वात् अत्रात्मनो जन्माभ
वस्य प्राक्प्रतिपादितत्वाद्देहाभिप्रायेणैव
प्रश्नः अतः कथमेतद्विरुद्धार्थं विजानीयाम्
किमिति त्वमिदानीन्तनो मनुष्यः सर्गादा
वादित्याय प्रोक्तवानिति रूपान्तरेणोप

45

रिष्टवानित्यभिप्रायेणोत्तरं श्रीभगवानुवा
च ॥ बहूनि मे व्यतीतानि जन्मानि तव चार्जु
न तान्यहं वेद सर्वाणि न त्वं वेत्थ परंतप ॥
मे मम बहूनि जन्मानि व्यतीतानि तव च ता
नि स्मसत्तानि तव चास्मनस्माहं जानामिल
मविद्याशक्तित्वात् त्वंतु न जानीषे तिरोभू
तज्ञानशक्तित्वात् स्वीयान्यपि न किं पुनः
परकीयाणि ननु तवेश्वरस्य जन्मकारण
पुण्यपापविहीनत्वात्कथं जीववज्जन्मपरि
ग्रहइत्यत आह ॥ अजोपि सन्नव्ययात्माभू
तानामीश्वरोपि सन् प्रकृतिं स्वामधिष्ठाय
संभवाम्यात्ममायया ॥ नित्यत्वाज्जन्मवि
नाशरहितोपि तथाभूतानां स्थावरजंगमा
त्मकानामीश्वरोपि सर्गादिषु यथेष्टकर्तृक
त्वात्प्रभुरपि सन् एतेन कर्मादिपारतंत्र्य
निवारितम् स्वांपेश्वरीं नतु भूतसम्बन्धि
नीं प्रकृतिं स्वरूपगोपनरूपां त्रिगुणसाम्यात्मि
कामधिष्ठायात्मनीकृत्य संभवामि सम्यग
प्रच्युतज्ञानबलवीर्यादिरेव देवानिव जा
तइव भवामि ननु तथापि षोडशकलात्म

कलिंगशून्यस्यतवकुतोजन्मइत्यतउक्तम्
स्वमाययेतिस्वयास्वाधीनययाहेतावभास
नमात्रश्राणेनशक्तिविशेषेणकदासंभव
मीत्यपेक्षायामाह ॥ यदायदाहिधर्मस्य
ग्लानिर्भवतिभारत अभ्युत्थानमधर्मस्य
तदात्मानंसृजाम्यहम् ॥ यदायदायस्मि
न्यस्मिन्कालेवर्णाश्रमविभागेनवेदोक्तस्यनि
श्रेयसाभ्युदयकारणस्यसदाचारस्यग्लानिर्भ
वति तदातदात्मानंनस्वमेवांशरूपंसृजामि
स्थूलदेहेनसंयोजयामि किमर्थमित्यपेक्षा
यामाह ॥ परित्राणायसाधूनांविनाशायच
दुष्कृताम् धर्मसंस्थापनार्थायसंभवामि
युगेयुगे ॥ साधूनांस्वधर्मवर्तिनांतत्क्रिया
विघातहेतुभ्योरक्षणायदुष्कृतंशास्त्रीयनि
यमातिक्रमात्रिजगत्स्थितिविघ्नायैवदुष्ट
कर्मकारिणांविनाशायच अतएवधर्मसं
स्थापनार्थायधर्मस्थिरीकर्तुंयुगेयुगेतत्त
दवसरेसंभवाम्युत्पत्तिमत्तांदर्शयामि न
तुवस्तुतोहंजन्मादिविकारकलंकस्पर्श
मनुभवामि नचैवंदुष्टनिग्रहंकुर्वतोपि

नैर्घृण्यंशंकनीयम् यदाहुः लालनेताड ·श्री·टि
नेमातुर्नाकारुण्यंयथार्भके तद्वदेवमहे ८४
शस्यनियंतुर्गुणदोषयोरितियतएवंततः॥
जन्मकर्मचमेदिव्यमेवंयोवेत्तितत्वतः
त्यक्त्वादेहंपुनर्जन्मनेतिमामेतिसोर्जुन॥
जन्मदिव्यपरानुग्रहार्थंदिव्यमलौकिकं
परतःस्वभावादप्रच्युतत्वात्तथाशक्यारव्य
त्वाद्भनत्वकर्मभिःतथाकर्मचधर्मपालना
दिरूपंदिव्यंफलदानासमर्थत्वात् एवंत
त्वतःपरमार्थतोयोवेत्तिआत्मन्यप्येवमेव
मन्यतेसतत्ववेत्तानादेहंदेहमावंत्य
क्त्वापुनर्जन्मनेतिकिन्तुमामेवमत्स्वभाव
मेवैतिप्राप्नोतिमुच्यतेइत्यर्थःतस्वतरस्मा
स्माव्याख्येयम् नकेवलमिदानीमेवत
त्वतोजन्मकर्मज्ञानेनमुच्यंते किंतुपुरापि
मुक्ताएवेत्याह॥ वीतरागभयक्रोधामन्म
यामामुपाश्रिताः बहवोज्ञानतपसापूता
मद्भावमागताः॥ रागोविषयेष्वभिलाषः
भयंतद्विघातहेतुभ्योशक्यप्रतीकारेभ्य
त्रासःतथाशक्यप्रतीकारेषुक्रोधःइत्येते

विगता येषां ते तथा मन्मया मदेकस्वभावा
मामेव प्रत्यगात्मानमभेदेन साक्षात्कृतवं
तः तथा मां परमेश्वरमेवोपाश्रिताः शरण
मागताः अत एव मत्प्रसादलब्धेनाद्वैतलक्ष
णज्ञानरूपेण तपसा पूताः क्षीणविकल्पक
लंकाः क्षीणकल्मषा वा निरस्ताज्ञानतत्का
र्यमला वा बहवो मद्भावं मत्सायुज्यमागताः
न त्वधुनैव प्रवृत्तोऽयं मद्भक्तिमार्ग इत्यर्थः
तदेवं तान्यहं वेद सर्वाणीत्यादिना विद्या
विद्योपाधिभ्यां तत्त्वंपदार्थावीश्वरजीवौ प्रद
र्श्येश्वरस्य च विवेकभावेन नित्यशुद्धताजी
वस्य चेश्वरप्रसादलब्धज्ञानेनाज्ञाननिवृत्तेः
शुद्धस्य सतश्चिदंशेन तदैकात्म्यमिति द
र्शितम् ननु किं तर्हि त्वय्यपि वैषम्यमस्ति
यत एवं त्वदेकशरणानामेवात्मभावं ददा
सि नान्येषां कामाकुलचित्तानामित्यत आ
ह ॥ ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्य
हम् मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ स
र्वशः ॥ यथा येन प्रकारेण मुक्तीच्छया
कामाभिलाषेण वा ये जिज्ञासवो ज्ञानिनो

आर्त्ताः अर्थार्थिनो वा मां भजंति तानहं तथै
व तदपेक्षितफलदानेन भजाम्यनुगृह्णामि
न तु तथापि स्वभक्तानामेव फलं ददस्य नत्व
न्यदेवतो वर्त्म भजनमार्गं सर्वशः सर्वैः प्रका
रैरिन्द्रादिसेवका अपि अनुवर्तन्ते इन्द्रादिरू
पेणापि ममैव सेव्यत्वात् न हि ज्योतिष्टोमादि
रन्यो मार्गो मदीय एव स्मात् तथेच्छा न तु त्वामेव
भगवन्तं किमिति न सर्वे प्रपद्यन्ते इति तत्रा
ह ॥ कांक्षंतः कर्मणां सिद्धिं यजंत इह देव
ताः क्षिप्रं हि मानुषे लोके सिद्धिर्भवति कर्म
जा ॥ आ यशः कर्मणां इष्टार्थरूपं फलसि
द्धिं कांक्षंत इह मनुष्यलोके इंद्रादिदेवता भजं
ते न तु साक्षान्मामेव कुतः हि यस्मादिंद्रादि
देवयाजिनां कर्मजा फलसिद्धिः शीघ्रमेव
भवति न तु ज्ञानफलं कैवल्यं दुष्प्रापत्वा
ज्ञानस्य शारीरारम्भकगुणवैषम्यादपि न स
र्वे समस्वभावा इत्याह ॥ चातुर्वर्ण्यं मया
सृष्टं गुणकर्मविभागशः तस्य कर्तारमपि
मां विद्ध्यकर्तारमव्ययम् ॥ चत्वारो वर्णाश्चा
तुर्वर्ण्यं स्वार्थे ष्यञ् सत्वप्रधाना ब्राह्मणा

गी·टी·
४८

48

तेषां च शमदमादीनि कर्माणि सत्त्वरजःप्रधा
नाक्षत्रियास्तेषां च कृषिवाणिज्यादीनि कर्मा
णि रजस्तमःप्रधाना वैश्यास्तेषां च कृषिवा
णिज्यादीनि कर्माणि तमःप्रधानाः शूद्रास्ते
षां च त्रैवर्णिकशुश्रूषादीनि कर्माणि इत्येवं
गुणानां कर्मणां च विभागेन चातुर्वर्ण्यं मयैवे
श्वरेण सृष्टमुत्पादितम् एवमपि विषमस्वभा
वत्त्वस्य तेन वैषम्यं दुर्वारमित्याशंकनेत्याह
तस्य विषमस्वभावस्य चातुर्वर्ण्यस्य लोकदृ
ष्ट्या कर्तारमपि वस्तुदृष्ट्या कर्तारमेव मां वि
द्धि अत्र हेतुगर्भे विशेषणमव्ययमिति स्वस्व
भावज्जीववन्नच्यामिन्नपगच्छामि ततश्च ॥
न मां कर्माणि लिंपंति न मे कर्मफले स्पृहा
इति मां योऽभिजानाति कर्मभिर्न स बध्यते ॥
कर्माणि विश्वसृष्ट्यादीनि मामीश्वरं स्वरूपाद
प्रच्युतत्वेन न लिंपंति कर्तृत्वाभिमानरूपेण
सुखदुःखादिफलरूपेण च कलंकेन न म
लिनयंति यतो न मे कर्मफले स्पृहा आप्तका
मस्य कामस्पृहेति श्रुतेः एतेन कर्तृत्वं भोक्तृ
त्वं च निराकृतम् एवमन्योऽपि यो मामकर्ता

रमभोक्तारं चात्मत्वेनाभिजानाति कर्मभिः
क्रियमाणैरपि समहत्त्वबध्यते न क्लेशपा
शनियन्त्रितः क्रियते अत एव ॥ एवं ज्ञात्वा
कृतं कर्म पूर्वैरपि मुमुक्षुभिः कुरु कर्मैव तस्
मात्त्वं पूर्वैः पूर्वतरं कृतम् ॥ एवं स्वस्वभावा
दप्रच्युत्या फलानभिलाषेण च कृतं कर्म बन्ध
कं न भवतीत्येवं ज्ञात्वा पूर्वैर्मनुजनकादिभि
रपि मुमुक्षुभिः कर्म कृतमनुष्ठितम् तस्मात्त्व
मपि यथोक्तबोधनिष्ठत्वेन कर्मैव स्वजातिवि
हितं युद्धादिव्यापारमेवानुष्ठित पूर्वैरतीतवि
प्रकृष्टकालजन्मभिस्तैः पूर्वतरं मादितरं यु
गांतरेष्वपि वर्तमानं कृतम् तस्मात्त्वं विद्भिः स
हविचार्य कर्तव्यं न लोकपरम्परामात्रेणेत्या
ह ॥ किं कर्म किमकर्मेति कवयोऽप्यत्र मो
हिताः तत्ते कर्म प्रवक्ष्यामि यज्ज्ञात्वा मोक्ष्यसे
शुभात् ॥ किं कर्मानुष्ठेयं किं चाकर्म परि
हार्यमित्यत्र प्रविभागज्ञाने कवयो विवेकि
नोऽपि मोहिताः तस्मादकर्म परिहारेण तदनु
ष्ठेयं किं कर्म तत्सम्यं प्रकर्षेण वक्ष्यामि यज्ज्ञा
शुभात्संसारात्मोक्ष्यसे मुक्तो भविष्यसि तत्र

लोकप्रसिद्धमेवकर्मदेहादिव्यापारात्मकम
कर्मचतदव्यापारात्मकमतःकथमुच्यते
कवयोप्यत्रमोहिताइतितत्राह ॥ कर्मणोह्य
पिबोद्धव्यंबोद्धव्यंचविकर्मणः अकर्मणश्च
बोद्धव्यंगहनाकर्मणोगतिः ॥ कर्मणोत्रहि
यतयोपदिष्टस्यकर्मणोबोद्धव्यंविशेषात्मकं
वस्त्वस्ति यथालौकिकेविहितेकर्मण्यपिमध्ये
दुष्टंकर्मास्ति अग्निष्टोमइवपशुवधःविकर्म
णोविरुद्धस्यापिकर्मणस्तत्त्वंबोद्धव्यमस्ति य
थाविरुद्धेपिलौकिकेकर्मणिशुभमस्तिकर्महिं
सयाणिबोद्धव्यंतत्त्वमस्तियथालौकिकेकरणे
पिशुभाशुभमस्तिवाअज्ञानसक्तानांकर्मण
मवश्यंभावित्वात् तेषांज्ञानमंतरेणदुष्परि
हरत्वात् यतःकर्मणोगतिर्व्यामिर्गहनादु
रवधारनत्वात्कुशलैरपिगहनत्वात्कर्मनज्ञाय
ते तस्मात्तत्त्वमार्गेणविज्ञानचक्षुरेवावश्यंस
कलशुभाशुभकर्मन्धनप्लोषसमर्थःशरण
तेनान्वेष्यइतिभगवतोपिप्रायः कर्मणइत्यु
पलक्षणार्थंकर्माकर्मविकर्मणांतत्त्वंदुर्वि
ज्ञेयम् तदेवोद्बोधयितुमाह ॥ कर्मण्यकर्म

यः पश्येदकर्मणि च कर्म यः स बुद्धिमान्म
नुष्येषु स युक्तः कृत्स्नकर्मकृत ॥ विहितत
या स्वभावतो वा कर्मणि देहेन्द्रियक्रियाया
मनुष्ठीयमानायामपि यो कस्वस्वभावनि
ष्ठतया कर्मस्वात्मनि निष्क्रियत्वं श्रोत्रादीनि
शब्दादिषु वर्तन्ते वागादीनि च वचनादौ मम
किमायातमित्येवं नैव किंचित्करोमीति वद्य
माणया युक्त्या यः पश्येत् ज्ञानदृष्ट्या निश्चि
नोति तथा कर्माणि कर्मेन्द्रियाणि संयम्येत्युक्त
दृष्ट्या ज्ञानरहितैः कर्मत्यागी यः कर्म पश्येत्
ज्ञानमंतरेणामानसानां कर्मणामपरिहार्य
नया तथा रागादिदोषस्पडकृच्छेदतया च बं
धकत्वात्कर्मकार्यकारणकर्मत्वं यो निश्चि
नोति स एव मनुष्येषु मध्ये तत्वतो बुद्धिमान्
प्रत्यगात्मबोधयुक्तः स एव युक्तः प्रत्यगात्म
निसमाहितः स एव कृत्स्नकर्मकृत् कृत्स्न
नि कर्माणि कर्तुं जानातीति स एव कृत्स्नानि
कर्माणि करोतीति च सर्वकर्मकर्तृणोऽपि
आत्मनिष्ठतया मद्व्यानमम स्वनाकिंचित्क
रोम्यहं कारणाभावात् अस्मात्कृत्स्नदशायाम्

गी·टी·
५०

आत्मबोधशुक्लपवनसमाहितेनमेघेनरहस्यो
पदेशंतत्वतोजानातिनान्योदेहाभिमानति
रोहितः अथयोगारूढावस्थायाम् अक
र्माणिचपरैःप्रमातृभिःकृतेकर्माणिस्वज्ञा
नेकर्मक्रियांजानातिएतेकर्तारःसर्वेहमे
वेतिदृष्टाप्रज्ञैरभिदेनसदाप्रजेतिप्रज्ञन
मितिसिद्धभाषाप्रामाण्यात् सएवमनुष्ये
षुमध्येबुद्धिमानित्यादिननुपरकृतेकर्माणि
कथंस्वकीयकर्मदर्शनमितिचेत् निखिलानि
कमविज्ञानशालिनोज्ञानिनो यथायएवा
हंघटादीन्वेद्मि सएवपटादीनितिप्रमाया
न्तरगतमनुसन्धानमस्ति एवंचैवमेवादि
प्रमात्रन्तरविषयेऽनुसन्धानादितिक्रमः
तदुक्तम् ब्रह्मविष्णुमहेन्द्राद्यायस्तत्वंवेत्ति
सर्वतः नदेहंचिहृषः सर्वंकर्मभवतीत्येत
त्सर्वंश्रुक्रमपिदृष्टप्रतिपत्तयेस्माभिरभिह
णेति ॥ यस्यसर्वेसमारंभाः कामसंकल्प
वर्जिताः ज्ञानाग्निदग्धकर्माणंतमाहुःपं
डितंबुधाः ॥ यस्यसमारभ्यंतेइतिसमारं
भाःसर्वाणिकर्माणिदृष्टानुश्रविकविष

50

यनिष्टानि काम्यन्ते इति कामः फलं तत्संकल्पे
नवर्जिता भवंति नन्वेवं चेत्किंतन्मनवः फला
नभिसंधिना कर्म करोतीत्याशंक्याह ज्ञानाग्नीति
कथयिष्यमाणोद्देनलक्षणज्ञानाग्निना दग्धा
निसंसारांकुरप्रसवसामर्थ्यहरणेन भस्मीकृता
नि कर्मलक्षणानि बीजानि येन तं तादृशं पंडित
उच्यते न तु भ्रांत इत्यर्थः सर्वोकर्मवोपोद्दल
यति ॥ त्यक्त्वाकर्मफलासंगं नित्यतृप्तोनिरा
श्रयः कर्मण्यभिप्रवृत्तोपिनैवकिंचित्करोति
सः ॥ कर्मस्वहंत्वाभिनिवेशं फलेषु येषु निरा
कांक्ष इत्यर्थः निराश्रयो योगक्षेमार्थमाश्रय
णीयरहितः स एवं विधो योगी स्वाभाविके वि
हितेवा कर्मण्यभिप्रवृत्तोपि प्रवृत्त्यशान व्यव
सितोपिनैवकिंचित्करोति सदात्मनिष्ठत्वाक
र्मा कर्मतामापद्यते इत्यर्थः किंच ॥ निराशी
र्यतचित्तात्मात्यक्तसर्वपरिग्रहः शारीरं केव
लं कर्म कुर्वन्नाप्नोति किल्बिषम् ॥ निर्गताशीः
कामना यस्मात् यतं संयतं चित्तमशॆनति
यतं चित्तं येन तादृश आत्मा स्वरूपं यस्य त्य
क्ताः सर्वेपरिग्रहा येन स ईदृशो योगी गाढ़ः के

वलंविहितंकर्मविनाकृतंकर्तृत्वाभिमानरहि
तंवाशारीरंशरीरनिर्वाहमात्रंअपियोगीस्वभा
विकंकर्मभिक्षाटनादिकुर्वन्नपिकिल्बिषं
विहिताकर्मनिमित्तंदोषंनप्राप्नोति किंच ॥
यदृच्छालाभसंतुष्टोद्वंद्वातीतोविमत्सरः
समःसिद्धावसिद्धौचकृत्वापिननिबध्यते ॥
अप्रार्थितोपस्थितलाभोयदृच्छालाभस्तेन
संतुष्टः तदधिकतृष्णारहितः द्वंद्वानिशीतो
ष्णादीन्यतीतोतिक्रांतः । विमत्सरोनिर्वैरः यदृ
च्छालाभस्यसिद्धावसिद्धौचसमोहर्षविषाद
रहितः यएवंभूतोयोगारूढःसपूर्वोक्तभूमि
कयोर्यथायथंविहितंस्वाभाविकंवाकर्मकृ
त्वापिबंधनंप्राप्नोतिकर्मकर्तरिप्रयोगःकिं
च ॥ गतसंगस्यमुक्तस्यज्ञानावस्थितचेत
सः यज्ञायाचरतःकर्मसमग्रंप्रविलीयते ॥
ज्ञानेवास्थितचेतसःप्रतिलब्धप्रतिष्ठस्या
तएवजीवन्मुक्तस्यदेहाद्यात्मप्रत्ययरूपबं
धनान्निष्क्रांतस्यातएवगतसंगस्यनिवृत्तवि
षयासंगस्ययज्ञायवक्ष्यमाणलक्षणा
ययज्ञसंरक्षणार्थंवाकर्मकायिकवाचिक

मानसिककर्मभेदेनत्रिविधमाचरतोपिसमग्रं सर्वासनंकर्मप्रविलीयते कर्मभावमापाद्य तेनश्यतीत्यर्थः कथंक्रियमाणमेवकर्मप्रवि लीयते इतिसमाधिसिद्धिंनांतरीयिकाब्रह्मा द्वैतसिद्धिंकर्मप्रविलयकारणभूतां प्रतिपा दयन्नाह ॥ ब्रह्मार्पणंब्रह्महविर्ब्रह्माग्नौ ब्रह्मणाहुतम् ब्रह्मैवतेनगंतव्यंब्रह्मकर्म समाधिना ॥ तेनैवगतसंगादिविशेषणवि शिष्टेनयोगिनाब्रह्मगंतव्यमतःसमग्रंकर्म तस्यप्रविलीयतेइतिसंबंधः तेनैवयोगिनाब्र ह्मनिरूपाधिकंपरमार्थतत्वंसंप्रदानत्वेनेष्टंगंत व्यंप्राप्तंशक्यंयोग्यंवाकीदृशेनज्ञानात्मकचक्षु रुन्मीलनेनब्रह्मैवकर्मब्रह्माभेदेनप्रथमान कर्मतस्मिन्समाधिनिरुत्तरोयोगोयस्यतेनत्र नःकीदृशेनब्रह्मणाब्रह्माभिन्नस्वरूपेणाय नमानात्मकेनकीदृशंब्रह्मब्रह्मार्पणंब्रह्म रूपतयाप्रतीयमानमर्पणंस्रुक्स्रुवादियत्र तत् तथाब्रह्मन्हविर्ब्रह्मत्वेनभासमानंहवि राज्यादिद्रव्यंयत्रतत् तथाब्रह्माग्नौब्रह्मत्व पतयाप्रतिपन्नेग्नौहुतंतर्पितम् इदमनेनप्र

निपातम् यद्यदस्त्ययथाप्रकाशतेतत्प्रकाश
मानत्वात्प्रकाशादभिन्नस्वरूपंप्रकाशाद्व्यतिरि
क्तंपरमार्थतःपदार्थजातंनकिंचित्संभवती
तितदुक्तम् कालिकाक्रमेतत्स्वरूपतयाज्ञानं
वहिरंतःप्रकाशते ज्ञानादृतेनार्थसत्ताज्ञान
रूपंततोजगत् नहिज्ञानादृतेभावाःकेनचि
द्विषयीकृताः ज्ञानंतदात्मतांयातमेतस्मादव
सीयते इतितथाश्रीप्रत्यभिज्ञायाम् प्रागिवा
र्थोप्रकाशःस्यात्प्रकाशात्मतयाविना नचप्र
काशोभिन्नस्स्यादात्मार्थस्यप्रकाशिता भिन्ने
प्रकाशेचाभिन्नेसंकरोविषयस्यतत् प्रकाशा
त्माप्रकाश्योर्थोनाप्रकाशश्चसिध्यतिइति ए
वंविरुद्धसिद्धवत्कुत्रचिदन्यैवंतत्वविद्भिर्व्यवस्था
पितोयमद्वयनयोनयस्यकस्यचिदीश्वरानु
ग्रहेणविनाप्रतिपत्तिगोचरतामुपैति तदुक्त
मागमेषु यन्नास्तिसर्वलोकस्यतदस्तीतिवि
रूप्यते निगद्यतेयदादेविविरुद्धयेनप्ररोहति
तत्स्मात्कारणाद्देविदेवताभिःप्रगोपितम्
तेनसिद्धेनदेवेशिकिंनसिध्यतिभूतलेइति
यदिकस्यचिदीश्वरानुग्रहात्तत्वविद्गुरूपदेशा

52

नोपलब्धदेहात्मविवेकस्य तत उक्तोपपत्त्या
प्रत्यगात्मसमाधानपरिशीलनतारतम्येन तस्य र
सोऽद्वैतलक्षणज्ञानद्वारमपावृतम् भव
ति स योगी न तल्लब्धप्रवेशोऽस्मिन्ब्रह्मार्पण
विधानेऽधिकृतो भवति तेनैव च ब्रह्म गंतव्य
मित्युक्तम् अनेन चाहं ब्रह्मास्मीति तत्त्वमस्या
दिवाक्यजन्यब्रह्मसाक्षात्कारेण ज्ञानेन तत्का
र्यनिवृत्तिलक्षणः प्रत्यक्तत्त्वावबोधश्च विवक्षितः
न तु शास्त्रीयो यौगिको वा बाधः पंडितंमन्या
भिमतः अयमेव सर्वत्र ब्रह्मदर्शनलक्षणो ज्ञा
नयज्ञः सर्वयज्ञोपायप्राप्यत्वात्सर्वयज्ञेभ्यः
श्रेष्ठ इत्येवं स्तुतमधिकारिभेदेन ज्ञानोपायभू
तान्यज्ञान्यज्ञान्प्रतिपादयति ॥ दैवमेवापरे
यज्ञं योगिनः पर्युपासते ब्रह्माग्नावपरे य
ज्ञं यज्ञेनैवोपजुह्वति ॥ अपरे केचिद्योगि
नोऽनुत्पन्नब्रह्मात्मैक्यज्ञानत्वात्क्रियमाणेऽपि क
र्मण्यात्मसमाहिता दैवं देवानामिंद्रादीनां प्रा
धान्येनेज्यमानत्वाद्देवसंबंधिनं यागं पर्यु
पासनत्वात्सोपकरणेन श्रद्धयानुतिष्ठंति
अन्ये तत्त्वविदो नेति नेतीति निरस्तसमस्तवि

गी॰टी॰
५३

शेषं सच्चिदानंदरूपं तत्पदार्थभूतं ब्रह्मतदे
व परमप्रकाशात्मकत्वात्सर्वकर्मफलवास
नादिदाहकत्वादग्निस्तस्मिन्ब्रह्माग्नौ यज्ञे
नैव ब्रह्मार्पणमित्युक्तप्रकारेणानमुपक
रणाभावावस्थितात्मभावनामयेन यज्ञं त्वंप
दार्थं प्रत्यगात्मानमुपजुह्वति ब्रह्माभेदमा
पादयंति एतदुक्तं भवति ब्रह्मार्पणविधा
नविदो देवमेव यज्ञं कृत्वा न यज्ञत्वमापादयं
तीति यज्ञशब्द आत्मा नामसु यास्केन पठि
तः ॥ श्रोत्रादीनीन्द्रियाण्यन्ये संयमाग्निषु
जुह्वति शब्दादीन्विषयानन्य इंद्रियाग्निषु जु
ह्वति ॥ अन्ये योगिनः श्रोत्रादिकं ज्ञानेंद्रिय
ग्रामं संयमाग्निषु संयमाग्निषु संयमो युगप
दक्रमेणैव कूर्मांगप्रवेशवत्सामसमये प्र
वेशवच्च विषयेभ्यः प्रत्याहृत्यांकुंचनमंतर्मु
खीकरणं स एवाग्निस्तस्मिंजुह्वति आत्मनो
भिमुखं प्रवर्तयंतीत्यर्थः यथोक्तं तदपो
ह्यते नित्यास्थितिरिति श्रुत्यर्थः तेभ्य इंद्रियवि
षयेभ्यो मनसि विहृडेस्मति नित्यस्वरूपे
स्थितिर्भवति तथान्ये योगिनः इंद्रियाणे

वाग्नयस्तेषुशास्त्रादिकं विषयोद्यमक्रमेक
गित्येव सकलकरणचक्रविस्फारणप्रसा
जकृति उयेत्रताद्रूपस्वस्वभावासनायनि
मज्जयंतीत्यर्थः यदुक्तं कक्ष्यास्तोत्रे सर्वाः
शक्तीश्चेतसा दर्शनाभ्याः स्वेस्वेवेद्येयोग
पद्येन विश्वक्रांतिस्माम ध्येस्फाटकल्पम्भ
नस्तिष्ठन्विश्वाकारएकेवभासीति तथाशि
वसूत्रेषु उद्यमो भैरवइति यद्वाऽन्ये प्रत्या
भ्यंतरे प्रत्युंडरीकादौ संयमः सम्याक्तिनम्म
निवंधस्त्ताराः पराः श्रोत्रादीनि ज्ञानेंद्रियाणि
संयमाग्निषुभ्यंतरेनसंयमाप्ववानयस्तेषुज्ज
कृति विक्षेपपरिहारेण धारणाध्यानसमा
धिस्तित्रयर्थं स्वस्वविषये प्रत्याहरंतीत्यर्थः
स्वस्वविषयासंप्रयोगे चित्तरूपानुकार
वेंद्रियाणां परिहार इति विषयेभ्यो निरु
द्धानींद्रियाणि चित्तरूपाण्येव भवंति त
तश्चविक्षेपाभावाच्चित्तं धारणादिकं निर्व
हतीत्यर्थः प्रत्युंडरीकादौ संयमस्याभिध
मानत्वाद्रूढवचनम् तदुक्तं तत्प्रतिषेधा
र्थमेकतत्त्वाभ्यास इति विशोका वा ज्योति

54

मतीतिच तदिति विशेषपरामर्शः तथाशिवो
पनिषदि लयाकामेनिलीनात्सः पद्मसंपुटमध्य
गः अनन्यचेताः समभोगपरं सोभाग्यमाप्नुयादि
ति अन्येतुअंगयोगैकदेशसेविनः शब्दादीन्विष
यान्मदंगशब्दप्रदीपादीन्वाद्यान्ध्येयत्वेनाल
क्षितांश्चिमैकाग्र्यार्थमिंद्रियाग्निषुजुह्वति श्रो
त्रादिभिर्यथोक्तविषयग्रहणं स्वस्वभावप्रका
शनाशेमं मन्यंतेइत्यर्थः तदुक्तं तत्रैव गीता
दिविषयात्साद्गमसौख्यैकतात्मनः योगिन
स्तन्मयत्वेनमतोरूढेस्तदात्मतेति ॥ सर्वाणीं
द्रियकर्माणि प्राणकर्माणिचापरे आत्मसंय
मयोगाग्नौजुह्वतिज्ञानदीपिते ॥ अन्येध्यान
निष्ठाः बुद्धीन्द्रियाणां श्रोत्रादीनां कर्माणि श्र
वणदर्शनादीनि कर्मेन्द्रियाणां वाक्पाण्यादी
नां कर्माणि वचनोपादानादीनि प्राणानां दशा
नां कर्माणि प्राणस्य बहिर्गमनमपानस्याधो
गमनं समानस्याशितपीतानां सम्यङ्नयनमु
दानस्योर्ध्वनयनं व्यानस्य व्यानयनमाकुंचन
प्रसारणादीनिच उद्गारेनागआख्यातः कूर्मउ
न्मीलनेस्मृतः कृकरः क्षुतेज्ञेयोदेवदत्तोवि

जृम्भतेनजहातिमनतंचापिसर्वव्यापीयत्नं
जयइत्येवंरूपाणिध्येयविषयेनसम्यग्विवे
केनज्ञानेनदीपितेप्रज्वालितेआत्मसंयमयो
गाग्नौआत्मनिसंयमोधारणाध्यानंसमाधि
रितित्रयमात्मविषयं तदुक्तं त्रयमेकत्रसंय
मइतिसएवयोगःसमाहितत्वंसएवाग्निस्त
स्मिञ्जुह्वतिध्येयमात्मानंदेहात्सम्यग्विविच्य
तस्मिन्मनःसंयम्यतानिसर्वाणिकर्माणिउपर
मयंतीत्यर्थःतत्रैवमनसःस्थिरकालंस्थापनं
धारणातत्रैवधृतस्यचित्तस्यतदाकारप्रत्यय
प्रवाहोध्यानंसएवविजातीयप्रत्ययानन्तरि
तःसमाधिरिति एषैवावस्थासर्वैर्गुरुभिरत्रश्रू
यमानास्तितिव्यजेनाविकृता यथायत्रसोल्ल
सयमेतिविवस्वांश्चंद्रमःप्रभृतिभिःसहसर्वैः
कापिसाविजयतेशिवराङ्गिःस्वप्रभाप्रसर
भास्वद्रूपेति यथाश्रमभेदेनयज्ञविशेषा
न्व्यतिपादयति ॥ द्रव्ययज्ञास्तपोयज्ञायोगय
ज्ञास्तथापरे स्वाध्यायज्ञानयज्ञाश्चयतयः
संशितव्रताः ॥ द्रव्येणहविरादिनायज्ञोया
गविधिर्येषांतेनत्रदेवतायागक्रियायज्ञायि

नः ते भवंतीति शेषः अत्र प्रायेण गृहस्थ
आश्रमिणो विवक्षिताः तपः कृच्छ्रचांद्रायणादि
यज्ञो येषां ते प्रायेण वानप्रस्थाश्रमिणः स्व
धर्मवत्तपोनिष्ठत्वात् योगो यमनियमा
द्यंगनिर्वर्त्यश्चित्तवृत्तिनिरोधलक्षणः स एव
यज्ञो येषां ते प्रायेण चतुर्थाश्रमिणः स्वाध्या
यो वेदवेदांगस्मृतीतिहासपुराणतर्कोप
निषदादेर्यथास्वस्वशाखस्याध्ययनमावर्त
नम् तथा ज्ञानं च स एव यज्ञो येषां ते तत्र प्रा
येण ब्रह्मचर्याश्रमिणो विवक्षिताः यतयः प्र
यत्नशीलाः संशितव्रताः सम्यक्छितानि ती
क्ष्णीकृतानि व्रतान्युक्तलक्षणानि येषां ते ॥
अथ प्राणायामयज्ञस्य सर्वसाधारणत्वात्स्व
रूपं प्रतिपादयति ॥ अपाने जुह्वति प्रा
णं प्राणेऽपानं तथापरे ॥ अपरे प्राणायाम
पराः अपाने पूरकवृत्तौ प्राणं रेचकवृत्तिं जुह्व
ति हृदयपवनापानावसानसमये एव सहसा
स्तम्भनप्रयोगेणोदयोन्मुखवश्यर्थं जुह्वति प्राण
मस्तंगमयंतीत्यर्थः तदुक्तं योगवासिष्ठे
प्राणे रेचकमूलस्थमपानापूरकोदितम्

55

स्वस्थंकुंभकेमभ्यस्यनभूयःपतिनस्यतेइति
तथाप्राणेरेचकहृत्वापानस्पूरकेसतिकुंभक
तिद्वादशांतेप्राणहृत्सुपरमसमयेयवाज्ञ
मेवस्वंभनताश्रयणेनोदयोन्मुखेमध्यहृतिम
पानस्यपरमयंतीत्यर्थः तदुक्तंतत्रैवस्थलंग
तवतिप्राणोपानेस्फुरदयोन्मुखेवहिःकुंभ
कमालम्ब्यचिरंभूयोनशोच्यतेइति एतदुक्तं
भवतिद्वादशांतेहृदयेवाप्राणापानयोरव
सानवेलायांचिदात्मनोभिव्यंजनायसमा
हितोभवंतीत्यर्थः तदुक्तंशिवोपनिषदि
मरुतोन्तर्बहिर्वापिवियद्युग्मानिवर्तनात
भैरवंभैरवस्येत्थंभैरवंव्यज्यतेवपुरिति तथा
महार्थमंजर्याम् यदिनिजहृदयोल्लासंनिर्णे
तेनित्यनिष्कलामिच्छामथ्यतदिस्मदितवा
श्लेषगतयोःसोमसूर्ययोस्संहीतिमोदोपा
येषुचप्राणत्त्वयपदांतस्यमपाल्लयकोटिगम
अपानप्राणयोर्मध्यंचिदात्मानमुपास्महेइति
तथायोगशास्त्रेवाह्याभ्यंतरस्तंभवृत्तिर्देश
कालसंख्याभिःपरिदृष्टोदीर्घसूक्ष्मइति ॥
एवंप्राणापानोदयास्तमयसंधिसमाहितवे

गी·टी·
५९

56

नपरमात्मसमापत्तिहेतुत्वंयज्ञत्वंप्रतिपादकुंभ
कवृत्तिरूपंयज्ञमाह ॥ प्राणापानगतीरु
द्ध्वाप्राणायामपरायणाः अपरेनियताहा
राः प्राणान्प्राणेषुजुह्वति ॥ अपरेरेचकपू
रकौ गडुकुंभकाभ्यसनशीलानियता
हाराआत्माकालावच्छिन्नहितपावित्राशिनः
संतः प्राणायामपरायणाः प्राणोनामायामे
रेचकपूरकहृत्याहेपरोणपरायणारताः प्रा
णापानगतीरुद्ध्वाकुंभयित्वेत्यर्थः प्राणात्प्राणा
नांडीवायुमर्मध्यमेषुप्राणेषुजुह्वतिनवलीन
कुर्वंतेएतत्कुंभभवति रेचकपूरककुंभका
भ्यासतारतम्येनभूमिजयाद्वाराणस्थैर्यायप
मध्यमप्राणाह्वयबलान्विनाक्लिष्टंतीयत्कुं
भकरे अपसव्येनपर्यंतसव्येनवर्तरेचये
त् नाडीनांशोधनं ऐतन्मोक्षमार्गेणयस्यच
तिरेचनात्प्राणाद्विधात्प्राणायामाद्विविधाःस्व
तः सामान्याबाह्येरेतेतत्पुनस्याभ्यंतरेत्रयः अ
भ्यंतरेणारब्धेनपूर्येताभ्यंतरेणतत् तिस्रं
कुंभकेकृत्वाकार्यास्याभ्यंतरात्मयइति तदु
क्तंयोगशास्त्रे बाह्याभ्यंतरविषयाक्षेपीचतु

र्थइति एवंकेषांचिद्यज्ञानांयोगांगत्वेनाव
वस्थितानामपिदृष्टफलत्वंचनकेवलानामेव
यज्ञविशेषत्वप्रतिपादनार्थंवेदितव्यम् ए
वमनुष्ठातृभेदेनयज्ञभेदानुक्त्वासर्वेषामप
वर्गफलत्वमाह ॥ सर्वेप्येतेयज्ञविदोयज्ञ
क्षपितकल्मषाः यज्ञशिष्टामृतभुजोयांति
ब्रह्मसनातनम् ॥ एतेयथोक्तविविधयज्ञा
नुष्ठातारःसर्वेपियज्ञक्षपितकल्मषाउक्तवि
धैर्यज्ञैःक्षपितंनाशितंकल्मषंयेषांतेतथाय
ज्ञान्कृत्वावशिष्टेकालेमृतरूपमानंदंभुंजा
नाउपभोक्तारःअथवामृतरूपमन्नंभुंजानाः
यज्ञविदःप्रत्यगात्मवेदिनःसंतोयथायथं
सत्वशुद्धिज्ञानोत्कर्षद्वारेणसनातनंनित्यंब्र
ह्मयांतिसंसारान्मुच्यंतेइत्यर्थः एवमन्वये
गुणमुक्त्वाव्यतिरेकेदोषमाह ॥ नायंलोको
स्त्ययज्ञस्यकुतोन्यःकुरुसत्तम ॥ उक्तानां
यज्ञानांमध्येन्यतमोपियज्ञोयस्यनास्तिसो
यज्ञःतस्यायमल्पसुखोपिमनुष्यलोकोना
स्तिसर्वनिन्द्यत्वात् कुतोन्योविशिष्टसाध
नसाध्यःपरलोकःअतःस्वाधिकारानुसारे

णान्यतमोयज्ञः सर्वथानुष्ठेयइतिएवमेतेषां
यज्ञानमनुष्ठाक्रमेणैवफलासिद्धिर्नतुके
वलेनावगममात्रेणेत्याह ॥ एवंबहुविधा
यज्ञाविततात्रह्मणोमुखे कर्मजान्विद्धि
तान्सर्वानेवंज्ञात्वाविमोक्ष्यसे ॥ एवंयथोक्ते
नक्रमेणाश्वरिप्रकारायज्ञाब्रह्मणोमुखेपरि
ज्ञानहेतोर्मुखेभूतायाःशक्तेःप्रत्यभिज्ञानि
मित्तं तदुक्तंशिवोपनिषदि शक्तावस्थाप्र
विष्टस्यनिर्विभागेनभावना तदासौशिव
रूपीस्याच्छैवीमुखमिहोच्यतेइति यथाहि
मुखेनैवायमितिप्रत्यभिज्ञायतेतथाशक्त्या
ब्रह्मज्ञायते तथोक्तंतत्रैव यथालोकेनदी
पस्याकिरणैर्भास्करस्यवा ज्ञायतेदिग्विभा
गादितद्वच्छक्त्याशिवस्यचेति ब्रह्मवावेदा
देःशास्त्रस्यमुखेनद्वारेणेत्यर्थः वितताब्रह्म
णोमुखेभूतायाःपरामर्शरूपायाःशक्तेरूप
लंभार्थमुपायत्वेनविस्तारिताःतदुक्तं केव
लज्ञानसमायांप्रारंभोयंप्रवेशनेइति तान्स
र्वान्कर्मजान्कर्मणानुष्ठानेनाभ्यासानुरोधि
नाजानीहितत्तत्फलासिद्ध्यनुमुखेणान्वि

द्विजानीहि तत्त्वतुष्टिनादोद्बोधमात्रात् तदु
क्तं अपि विज्ञाततत्त्वेनत्वयाभ्यस्यमिदंसदा
नेनाममात्राकृतकफलमस्तु प्रसादकमिति
अन्यत्रापि आगोपबालवनितंभगवंस्वामि
त्वंज्ञातोप्युपायविरहात्ततस्तु किंदोसिनांतः
स्थितंभवतियेनतुषपलत्वं त्वलीनंतोदवस्तुनः
म्यवस्त्वारतःस्यादिति यथायदिवाचंनिकाङ्क्षा
नान्मुक्तिःस्याद्भावनांविना शारीरमानसैर्दुः
खैर्मुच्येरन्सर्वजंतवइति नन्वेतेषुयत्तेषुक
तमास्मिन्यत्तेहमधिकृतइत्यतआहरूपवस्तुक
विधयावहुविधेषुयत्नेष्वन्यतमयत्नानुष्ठान
हारेणज्ञात्वाहेतलक्षणत्वानयत्नानिष्ठःस
संसारादिमुक्तोभविष्यसि तेचवहुविधाय
ताःशिवोपदिष्टानिताःतथाहि कपालांत
र्मनोन्यस्यतिष्ठन्मीलितलोचनः क्रमेणमन
सोदार्ढ्याल्लक्षयेल्लक्ष्यमुत्तमम् १ अनाहतेपा
त्रकर्णोभग्नशब्देसरिद्रुते शब्दब्रह्मणिनिष्णा
तः परंब्रह्माधिगच्छति २ निजदेहेसर्ववित्
कैवल्यमनाख्
केषुगपद्भावयेद्धियत् निर्विकल्पमनाख्यं
सर्वविधयत्सर्वंप्रवर्तते ३ सर्वंदेहगतंद्रव्यं

वियद्ध्यासंमनोहत्ता विभावयेत्ततस्यभा
वनासास्थिराभवेत् ४ देहांतरेत्वग्विभागंभि
त्तिभूतंविचिंतयेत् नकिंचिदंतरेतस्यध्यायन्न
ध्येयभाग्भवेत् ५ कालाग्निनाकालपदादु
त्थितेनस्वकंपुरम् प्लुष्टंविचिंतयेदंतेशांता
भासःप्रजायते ६ एवमेवजगत्सर्वंदग्धं
ध्यात्वाविकल्पतः अनन्यचेतसःपुंसःपुंभा
वःपरमोभवेत् ७ यदादिभजनेदृष्टिंनिमी
ल्यकायेविनिक्षिपेत् तल्लयंतत्क्षणाद्गत्वात
ल्लयानंमयोभवेत् ८ निर्वृक्षगिरिभित्त्या
दिदेशेदृष्टिंविनिक्षिपेत् विलीनेमानसेभा
वेवृत्तिक्षीणःप्रजायते ९ उभयोर्भावयोर्ज्ञा
नेध्यात्वामध्यंसमाश्रयेत् युगपच्चद्वयंत्यक्त्वा
मध्येतत्वंप्रकाशते १० शक्तिसंगमसंक्षुब्ध
शक्त्यावेशावसानिकम् यत्सुखंब्रह्मतत्वस्य
तत्सुखंस्वाक्यमुच्यते ११ लेहनामंथनाकोटैः
स्त्रीसुखस्यभरात्स्मृतेः शक्त्यभावेपिदेवेशि
भवेदानंदसंप्लवः १२ आनंदेमहतिप्राप्तेदृष्टे
वाबांधवेचिरात् आनन्दमुद्गतंध्यात्वातन्म
नास्तल्लयोभवेत् १३ यत्रयत्रमनस्तुष्टिर्मन

लोत्रैवधारयेत् तत्रतत्स्वपरानन्दस्वरूपंसप्र
काशते १४ अनागतायांनिद्रायांप्रणष्टेवा
ह्यगोचरे सावस्थामनसागम्यापरादेवीप्र
काशते १५ मज्जासनेस्फिजेकेनहस्तपादौनि
राश्रयम् विधायतत्प्रसंगेनपरापूर्णामतिर्भ
वेत् १६ उपविश्यासनेसम्यग्बाहूकृत्वावक्रौ
चितौ कक्षव्योम्निमनःकुर्वन्शममायातितल्ल
यात् १७ आसनेशयनेस्थित्वानिराधारंविभाव
येत् १८ चलासनेस्थितस्याथशनैर्वादेहचा
लनात् प्रशांतेमानसेभावेदेविदिव्यौघमाप्नु
यात् १९ एवमेवडात्रिंशायांकृत्सपताणमेचि
रम् तेभिरंभावयेद्रूपंभैरवंरूपमिच्छति २०
व्योमाकारंस्वमात्मानंध्यायेद्दिग्भिरनावृतम्
निराश्रयाचितिशक्तिःस्वरूपंदर्शयेत्तदा २१
किंचिदंगंविभिद्यादौतीक्ष्णसूच्यादिनाततः
तत्रैवचेतनांयुक्त्वाभैरवीनिर्मलगतिः २२ इद
जालमयंविश्वंव्यस्तंवचित्रकर्मवत् भ्रमद्वा
ध्यायतःसर्वंपश्यतश्चसुखोद्गमः २३ विश्व
यनिजदेहस्यसर्वमस्मीतिभावयेत् द्दृष्टेन
मनसाद्दृष्टमानान्यद्दितिणोसुखीभवेत् २४

स्ववदन्यशरीरेऽपि संविन्तिमत्तु भावयेत् अपे
तांस्वशरीरस्यत्यक्त्वाव्यापीदिनैर्भवेत् २५ आं
त्वाथांत्वाशरीराणित्वरितंभुविपातनात् होम
शक्तिविरामेणपरासंजायतेदशा २६ कूपा
दिकेमहागर्तेस्थितोपरिनिरीक्षणात् अवि
कल्पमतेसम्यक्कायाच्चित्तलयःस्फुटम् २७
भक्ष्यादेकाद्विरकस्ययादृशीजायतेमतिः सा
शक्तिःशांकरीनित्यंभावयेत्तांमनःशिवः २८
नेदंवंभावयेत्क्वापिनरागंभावयेत्क्वचित्
रागद्वेषविनिर्मुक्तमध्येब्रह्मप्रसर्पति २९
इत्यादिना अथज्ञानयज्ञंस्तौति ॥ श्रेयान्द्रव्य
मयाद्यज्ञाज्ज्ञानयज्ञःपरंतप सर्वंकर्माखिलं
पार्थज्ञानेपरिसमाप्यते ॥ द्रव्ययज्ञग्रहणंसर्व
यज्ञोपलक्षणार्थम् तेनसर्वेभ्योयज्ञेभ्योभ्यास
क्रमेणमोक्षसाधनेभ्योज्ञानयज्ञःसर्वत्रब्रह्म
दर्शनलक्षणः श्रेयान्प्रशस्यतरःसाक्षान्निर्वि
लम्बंमोक्षप्रदत्वात् कस्मादेवमुच्यते यतःस
र्वश्रौतंस्मार्तंस्वाभाविकंचकर्माखिलंसवासनं
ज्ञानेहेतुलक्षणेपरिसमाप्तिंभजतेहुतमपि
दग्धबीजवत्प्रविलयंगच्छतीत्यर्थः नान्येषु

यज्ञेषुतत्त्ववासनाद्वारेणकर्मणांसन्न्यासात्
नतुकेवलमज्ञस्यआत्मबोधःकथमद्वैतल
क्षणोज्ञानयज्ञोपिहृतइत्याह ॥ तद्विद्धिप्रणि
पातेनपरिप्रश्नेनसेवया उपदेक्ष्यंतितेज्ञा
नंज्ञानिनस्तत्वदर्शिनः ॥ तद्वैतल्लक्षणंज्ञा
नंतत्वदर्शिनःपरमार्थस्यस्वसंवेदनेनद्रष्टा
रोगुरवोनकेवलंतत्वदर्शिनएवयावत् ज्ञा
निनोहितल्लक्षणंज्ञानयुक्तास्तेतुभ्यमुपदेक्ष्यं
तिउपदेशेनसंपादयिष्यंति केनहेतुनेत्य
त्राह प्रणिपातेनसर्वात्मनाप्रह्वत्वेन परि
प्रश्नेनप्रार्थनापूर्वंसंशयच्छेदार्थमनुयोगेन
सेवयासर्वस्वसमर्पणशुश्रूषया निर्व्याजभ
क्तिश्रद्धाराधितागुरवएवंविधंमहोदयमुपदि
शंतीतिविद्धिजानीहि स्वयंभगवत्युपदेष्टरि
सत्यप्यन्येज्ञानिनउपदिशंतीत्युक्तिरन्येपिलो
काःप्रणिपातादिनाज्ञानिभ्योज्ञानंगृह्णीयुर्न
यथाकथंचिदितिसमयप्रतिपादनार्था तदु
क्तंशिवसूत्रेषुगुरुरुपायइति तथाचश्रुतिः
तद्विज्ञानार्थंसगुरुमेवाभिगच्छेत्समित्पाणिः
श्रोत्रियंब्रह्मनिष्ठमिति तदुक्तंकुलार्णवे

ग्रहेतंद्विशिवेप्रोक्तंक्रियायामविवर्जितम्
गुरुवक्त्रेणोल्लभ्येतनाधीतागमकोटिभिः गुर
वोबहवःसंतिशिष्यवित्तापहारकाः गुरु
र्दुर्लभोदेविशिष्यसंतापहारकइतिकीदृशं
तज्ज्ञानमितिज्ञानस्वरूपमाह ॥ यज्ज्ञात्वानपुन
र्मोहमेवंयास्यसिपांडव येनभूतान्यशेषेण
द्रक्ष्यस्यात्मन्यथोमयि ॥ यज्ज्ञातेज्ञातासम्य
क्प्राप्तिपर्यन्तपुनस्तुनरकालमेवमोहंबंधुव
धादिनिमित्तशोकलक्षणंनप्राप्स्यसि येनज्ञा
नेनकारणभूतेनसर्वाणिभूतानिचराचरात्म
कानिमयिपरमकारणेआत्मनिस्वात्माभिन्ने
द्रक्ष्यसिस्वात्माभेदेनसाक्षात्करिष्यसि मय्या
त्मनीतिसामानाधिकरण्यंमयोग्राह्यःपादस्म
रणे यतोस्यज्ञानस्यायंप्रभावः ॥ अपिचेदसि
पापेभ्यःसर्वेभ्यःपापकृत्तमः सर्वंज्ञानप्लवेने
ववृजिनंसंतरिष्यसि ॥ अपिचेदितिसंभाव
नाभ्युपगमेनिपातौ यद्यपित्वंसर्वेभ्यःपातकि
भ्योज्ञात्यादिवधकारित्वात्पापकृत्तमःतथापि
सर्वपापसमुद्रंज्ञानलक्षणेनपोतेनैवसम्य
गनायासेनतरिष्यसि वृजिनशब्देनात्रपर्मा

60

धर्मरूपं कर्माभिप्रेतं मुमुक्षोः पापवत्तस्याप्यस्या
प्यनिष्टत्वात् ननु समुद्रास्थितस्यैव पापस्या
तिलंगनमात्रेण तन्नाश इति दृष्टांतेन वारयन्ना
ह ॥ यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जु
न ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा
॥ यथैधांसि काष्ठानि प्रदीप्तोऽग्निर्भस्मसात्कु
रुते भस्मभावं नयति तथा ज्ञानाग्निः सर्वाणि
संचितक्रियमाणात्मकानि कर्माणि धर्माधर्म
रूपाणि प्रारब्धफलभिन्नानि भस्मीकरोतीत्य
र्थः तथा च श्रुतिः भिद्यते हृदयग्रंथिश्छिद्यंते
सर्वसंशयाः क्षीयंते चास्य कर्माणि तस्मिन्दृष्टे
परावरे इति तदधिगम उत्तरपूर्वाघयोरश्लेषवि
नाशौ तद्व्यपदेशादिति इतरस्याप्यसंश्लेषः पाते
त्विति सूत्रे च विस्तरेण प्रतिपादितम् अनारब्धे
कार्ये एव पापेन श्लेषः तथा च सूत्रम्
अनारब्धकार्ये एव तु पूर्वे तदवधेरिति ज्ञानो
त्पादकदेहारंभाणां तु देहांतरे वोपभोगेन वि
नाशः तथा च श्रुतिः तस्य तावदेव चिरं यावन्न
विमोक्ष्येऽथ संपत्स्य इति तत्र हेतुमाह ॥ न
हि ज्ञानेन सदृशं पवित्रमिह विद्यते तत्स्वयं

योगसंसिद्धः कालेनात्मनि विन्दति ॥ हि य
स्मात् ज्ञानेन तुल्यमिह तपोयोगादिषु मध्ये प
वित्रं शोधकं वासनारूपाणां कलेवानां समू
लोन्मूलकं न स्म भवति तच्च पवित्रं योगसंसि
द्धः योगेन यथोक्तेन कर्मसमाधिना संसिद्धः
सम्यक् ज्ञानं योग्यतां प्राप्तो योगी कालेनाभ्यासक्रमा
नुसारिणा शीघ्रेण चिरेण वात्मनि स्वस्वरूपे प
व स्वयमनायासेन विन्दति लभते सप्रवृद्धता
याम् तदुक्तं तपस्तीर्थजपो दानं पवित्राणीत
राणि च नालं कुर्वन्ति तां सिद्धिं या ज्ञानकलया
कृतेति तस्यैवं प्रभावस्य लाभक्रममाह ॥
श्रद्धावांल्लभते ज्ञानं तत्परः संयतेन्द्रियः ज्ञानं
लब्ध्वा परां शान्तिमचिरेणाधिगच्छति ॥ गु
रूपदिष्टेर्थे श्रद्धावानास्तिकः गुरुविषयभक्त्यु
द्रेकेण हि तेनात दर्शितार्थे विश्वासयुक्तः तदुक्तं
श्रुतिः यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः इति
तत्परो नान्यचेतस्तया उपदिष्टेर्थे यत्नवान् सं
यतेन्द्रियः सर्वाक्षवृत्त्या वशीकृताक्षवर्ग एव
विधः पुरुषो यथोक्तं ज्ञानं लभते प्रणिपाता

61

विलंबास्तोपायोमायावितादिसंभवादनेकां
तिकेपि श्रद्धावतादिषैकांतिक उपाय इति
ईदृशेनोपायेन तज्ज्ञानं प्राप्याल्पीयसैव काले
न परां शांतिमविद्यातत्कार्यनिवृत्तिरूपां मोक्षा
ख्यां प्राप्नोति एतद्गुणविहीनस्तु ॥ अज्ञश्चा
श्रद्दधानश्च संशयात्मा विनश्यति नायं लोको
ऽस्ति न परो न सुखं संशयात्मनः ॥ अज्ञो गुरूप
दिष्टार्थानभिज्ञः कथंचिज्ज्ञानेपि ज्ञाते अश्रद्दधा
नश्च विश्वासहीनश्च जातायामपि श्रद्धायां म
मेदं सिध्येन्न वेति संशयात्मा सर्वथा नश्यति
अतस्तस्यायं दृष्टो लोको धर्मस्यानिष्पत्तेर्न च सुखं
संशयेनैव भोगस्याप्यसंभवात् अथ सकलाध्या
यविस्फारितोर्थः श्लोकद्वयेन संक्षिप्योच्यते ॥
योगसंन्यस्तकर्माणं ज्ञानसंछिन्नसंशयम्
आत्मवंतं न कर्माणि निबध्नंति धनंजय ॥
हे धनंजय धर्माधर्मात्मकानि कर्माणीदृशं पुरु
षं न निबध्नंति अनिष्टमिष्टं मिश्रं वा शरीरं नांत
रे कीदृशं तमात्मवंतमात्मन्यवहितं सदाप्रमत्तं
ततो योगेनोक्तरूपेण संन्यस्तानीश्वराय समर्पि
तानि कर्माणि येन तम् ततज्ज्ञानेनात्मैव

रैकत्वदर्शनलक्षणेनसंछिन्नः सम्यक्संस्कार
स्यापिनाशेनाच्छिन्नः संशयो देहाद्यहमिति
प्रत्ययं यस्य तम् आत्मवन्तम् ॥ तस्मादज्ञानसं
भूतं हृत्स्थं ज्ञानासिनात्मनः छित्वैनं संशयं यो
गमातिष्ठोत्तिष्ठ भारत ॥ तस्मादात्मनो ज्ञानाद
विवेकात्संभूतं हृदि स्थितमेनमनुभूयमानं संश
यं देहाद्यहमिति प्रत्ययं ज्ञानासिना उक्तलक्ष
णज्ञानखड्गेन छित्वा योगं कर्मसमाधिलक्ष
णमातिष्ठाश्रय हे भारत उत्तिष्ठस्व कर्मणि उद्यु
क्तो भव इत्यर्थः फलाभिसंधिरहिते कर्मण्य
त्मावमर्शनम् कर्मसंन्यासयोगाख्यं प्राहुय
स्तेत्वमोऽहरिम् ॥ इति श्रीभगवद्गीताटीका
यां तत्त्वप्रकाशिकायां राजानकलक्ष्मीराम
विरचितायां कर्मसंन्यासयोगो नाम चतुर्थो
ध्यायः ४ ॥ ॐ एवं यस्मात्तरतिरेवस्मादि
नाशवौतिकं कर्मणो नावश्यकत्वं संन्यासशास्त्रा
र्थमन्वानस्तथा योगमातिष्ठेति कर्मयोगम
प्युक्तवांस्तदेतयोरेकात्र श्रोत्रविषययोः संन्या
सकर्मयोगयोः परस्परं विरोधं मन्यमानस्तप
वसन्दिग्धचेता अर्जुन उवाच ॥ संन्यासंक

र्मणां कृष्णपुनर्योगं च शंससि । यच्छ्रेय एतयो
रेकं तन्मे ब्रूहि सुनिश्चितम् ॥ हे कृष्ण कर्मणां
संन्यासं त्यागं यस्त्वात्मरतिरेव स्यादित्यादिना
च पुनस्तेषां योगमनुष्ठानेन स्वीकारं च योगमा
तिष्ठेत्यादिना कथयसि तदेतयोः कर्मसंन्या
सयोगयोः विरुद्धस्वभावयोरेकस्य यौगपद्ये
नानुष्ठानासंभवः अत एव तयोर्मध्याद्यदेवा
नुष्ठेयं तया श्रेयः प्रशस्यतरं तथा सुनिश्चितं
तवाभिप्रेतं तन्मे ब्रूह्युपदिश यस्त्वात्म
बोधमात्रस्तस्य ज्ञानयोगाधिरोहासिद्धये या
वद्विकल्पसंभवं कर्मयोगोवश्यानुष्ठेयः स ए
व वृत्तज्ञानयोगाधिरूढः कर्मफलभूतविकल्प
त्वये स्वयमेव संन्यासाधिकारमनायासेनोप
गत इत्याशयेनोत्तरं श्रीभगवानुवाच ॥
संन्यासः कर्मयोगश्च निःश्रेयसकरावुभौ
तयोस्तु कर्मसंन्यासात्कर्मयोगो विशिष्यते ॥
चः समुच्चये संन्यासः कर्मणामावश्यकतया
ननुष्ठानं कर्मयोगश्च कर्मणां योगः सस्वरूपप्र
त्यवमर्शाविनाभावेनानुष्ठानमेतावुभावपि
निःश्रेयसकरौ क्रमेण मोक्षसाधकौ तथापि

गी॰टी॰
६३

63

रिके किंतु तयोर्मध्ये कर्मसंन्यासात्काशात्कर्म
योगो विशिष्यते योगेन विना संन्यासो न भवती
ति वक्ष्यमाणयोपपत्त्या श्रेष्ठो भवति नतु ताव
त्तीणविकल्पस्य संन्यासाधिकारिणः स्वरूपमा
ह ॥ ज्ञेयः स नित्यसंन्यासी यो न द्वेष्टि न कांक्ष
ति निर्द्वन्द्वो हि महाबाहो सुखं बंधात्प्रमुच्यते ॥
स योगी कर्मद्विषेः कर्म कुर्वन्नपि नित्यसंन्यासी
सार्वकालिकसंन्यासी कर्मी वोपवाः कोसौ यो दुः
खतत्साधनेन द्वेष्टि तथा सुखतत्साधनेन कां
क्षति सर्वदा स्वस्वरूपप्रतिष्ठितं प्रज्ञतया निर्वि
कल्पत्वात् हि यस्मात् हे महाबाहो निर्द्वन्द्वः सु
खदुःखरागद्वेषादिद्वंद्वसंकल्पनाविमुक्तो
योगी सुखमनायासेन बंधात्संसारलक्षणात्प्र
मुच्यते स्वयमेव मोक्षमाप्नोति एतदिति रिक्तो
यः कश्चित्कर्मपरिहारेणात्मनः संन्यासित्वमभि
मन्यमानो रागादिद्वंद्वानुच्छेदात्सर्वकोपपत्त्या
कर्मकृदेव तदुक्तम् प्रसादिनो बहिश्चिह्नाः
पिशुनाः कलहोत्सुकाः संन्यासिनो प्रदृश्यंते
देवसंदूषिताशया इति एतेन लोकेन तु रु
बन्दि : संन्यासयोगस्य लक्षणमुक्तमिति

ज्ञानंयोगेनविनायोगोपितेनविनासंभवति ·भ·गी·
एतौह्निनित्यसंवद्धावितिपृथक्त्वमेवस्मारय ८२
ति॥ सांख्ययोगौपृथग्बालाःप्रवदंतिनपं
डिताः एकमप्यास्थितःसम्यगुभयोर्विन्दते
फलम्॥ सांख्यंकर्मणोक्रियमाणोपिदेहा
त्मविवेकवत्वंयोगश्चात्मन्यप्रमत्तयाकर्मानु
ष्ठानम् एतौबालास्तत्वज्ञानशुन्यातिम्नस्याः
पृथग्भिन्नफलावनुष्ठेयतयाविविक्तावस्था
नाकथयंति नतुपंडितास्तत्वविदः यतोन
योरेकमन्यतममप्यसम्यगास्थितःप्रमानु
भयोरपिफलंकैवल्यंलभते एतदृढयितु
माह॥ यत्सांख्यैःप्राप्यतेस्थानंतद्योगैरपि
गम्यते एकंसांख्यंचयोगंचयःपश्यतिसप
श्यति॥ सांख्यैर्यथोक्तज्ञानवद्भिर्यत्स्थानं
विश्रांतिपदंयोगभूमिकाधिरोहेणप्राप्य
ते तदेवयोगैरपिस्वस्वभावावस्थिततया
कर्मानुष्ठातृभिर्गम्यतेवाप्यतेअतःसांख्ययो
गंचैकफलत्वेनैकंयःपश्यतिसएवोन्मी
लितत्वदृष्टिःसम्यक्पश्यतिनान्यःयोगी
रित्यत्रार्शआदित्वान्मीलितंदृष्टीयोच यह

64

कं कर्मयोगोविशिष्यतइतितमेवविशेषमाह
॥ संन्यासस्तुमहाबाहोदुःखमाप्तुमयोगतः
योगयुक्तोमुनिर्ब्रह्मनचिरेणाधिगच्छति ॥
तुरवधारणे हेमहाबाहो अयोगतउक्तरीत्या
कर्मानुष्ठानसमाधानाद्विनासंन्यासोविकल्प्या
स्करणेनकर्मत्यागःप्राप्तुंदुःखमेवाशक्यमे
वनाप्यतेइत्यर्थः सर्वसंकल्पदाहकंज्ञानधा
राधियोहंविनाप्रवृत्त्याकर्मणोदुःसंन्यास
त्वात् अतोयोगेकर्मसमाधानेयुक्तःसंवद्धो
मुनिर्मननशीलःसदाप्रमत्तोब्रह्मनिरुपाधि
कंपरंतत्वंनाचिरेणशीघ्रमेवाधिगच्छत्यात्म
तयासमासादयति अतःकर्मयोगोविशिष्य
तेप्रथमोपायभूतत्वात् कस्माद्योगयुक्तस्यै
वब्रह्मप्राप्तिरित्यतआह ॥ योगयुक्तोवि
शुद्धात्माविजितात्माजितेंद्रियः सर्वभूता
त्मभूतात्माकुर्वन्नपिनलिप्यते ॥ योगेक
र्मानुष्ठानेयुक्तोनित्यमात्मनिसमाहितोत
एवविजितोवशीकृतआत्मास्वस्वभावेये
नसएवजितेंद्रियोवशीकृतान्हवर्गो
तएवविशुद्धात्मादेहाद्यहमितिप्रत्यक्

स्यआत्मा स्वस्वभावो यस्य स्वस्वरूपप्रतिष्ठ
तियावत् ततः सर्वभूतात्मभूतात्माभ्यासक्र
मेण सर्वेषां भूतानां स्थावरजंगमानामात्मभू
तः स्वरूपत्वमात्मस्यात्मा स्वस्वभावो यस्य सए
वंविधो योगी कर्म कुर्वन्नपि न लिप्यते पुण्य
पापादिकलंकितवासनया न मलिनीक्रिय
ते ब्रह्मभावापन्नत्वात् कर्म कुर्वन्नपि न लि
प्यते इत्येतद्विरुद्धमित्याशंक्य कर्तृत्वाभिमा
नाभावान्न विरुद्धमित्याह ॥ नैव किंचित्क
रोमीति युक्तो मन्येत तत्त्ववित् पश्यञ्छृण्वन्
स्पृशञ्जिघ्रन्नश्नन्गच्छन्स्वपञ्श्वसन् प्रलप
न्विसृजन्गृह्णन्नुन्मिषन्निमिषन्नपि इंद्रिया
णींद्रियार्थेषु वर्तंत इति धारयन् ॥ युक्तः क
र्मणि क्रियमाणेप्यात्मनि समाहितस्ततोभ्या
सक्रमेण तत्त्वविद्भूताविर्भूताद्वैतस्ततः सन्क
र्म कुर्वाणोपि नैव किंचित्करोमीति मन्यतेति
स्थितेनाति कीदृशः तत्त्वदर्शित्वादिज्ञानेंद्रि
य कर्मेंद्रियांतःकरणप्राणवृत्तिभिः कर्म कु
र्वन्नपि न चेंद्रियाणींद्रियादीनि स्वस्वविषये
षु वर्तंते हलिंभजंते नाहमित्येवं धारयन्मन्य

भिजानन् अतो नकिंचिदहं करोमीति तद्वक्तं
कुर्लाणि वै स्वकार्येषु प्रवर्त्तंते करणानीति
चिंतयेत् अहम्भावमपास्येव यतः कुर्यात्सन
लिप्यते इति नन्वेवंविधस्य ज्ञानयारायिब्र
ब्रह्मभावमापन्नस्याभिमानाभावात्कर्मलोपो
मास्तु यस्तु सत्त्वबोधमात्रः कर्मयोगाधिकृ
तः सलिप्यत एवाभिमानस्य सर्वथाविगलना
दित्याशंक्याह ॥ ब्रह्मण्याधाय कर्माणि संग
त्यक्त्वा करोति यः लिप्यते न स पापेन पद्मपत्र
मिवाम्भसा ॥ यस्तु सत्त्वबोधो ब्रह्मणि परमे
श्वरे कर्माण्याधायोमकुत्तास समर्प्य संगं तानि
मच्चित्तत्वेन त्यक्त्वा करोतीति असौ पापेन बंध
हेतुतया पापिष्ठेन पुण्यपापात्मकेन कर्मणा
न लिप्यते न कलुषीक्रियते प्रत्युतोक्तोपपत्त्या
देहाभिमानस्य क्रमापचीयमानतया विशु
द्धीक्रियते यथा पद्मपत्रमम्भसि स्थितम
प्यम्भसा न लिप्यते तद्वत् तदेव विशुद्धिहे
तुत्वं विवृणोति ॥ कायेन मनसा बुद्ध्या के
वलैरिंद्रियैरपि योगिनः कर्म कुर्वंति संगं
त्यक्त्वात्मशुद्धये ॥ योगिनः आत्मतत्त्वे समा

ह्निताः संगं कर्मणि लीनचित्तं त्यक्त्वा देहेन
मनसा बुद्ध्या बुद्धिकर्मेंद्रियैरपि केवलैरहंत
यात्त्ववह्नाढपरामृष्टैः कर्म कुर्वंत्येव किमर्थ
मित्याह आत्मशुद्धये आत्मनः स्वस्वभावस्य शु
द्धये केवल्याय देहाद्यभिमानमलशोधनाय
नेदं कर्म कल्याणीवे कर्मणोदीरितं ज्ञानं ज्ञाने
नाशिवतां व्रजेत् । शिवाक्यमेव शक्तिः स्यात्त
स्मात्कर्म समाचरेदिति संगत्यागलक्षणं यो
गवासिष्ठे अनास्थयेति भावनां यदभावन
मंतरम् नाहं कर्ता न भोक्तेति सामान्योसाव
संगमः इति संगत्यागपूर्वसंन्यासेन कर्मत्या
गः कर्मफलत्यागात्संभवतीत्याह ॥ युक्तः
कर्मफलं त्यक्त्वा शांतिमाप्नोति नैष्ठिकीम्
अयुक्तः कामकारेण फले सक्तो निबध्यते ॥
युक्त आत्मनिष्ठः कर्मफलमनभिसंधानेन त्य
क्त्वा निष्ठायां परस्यां काष्ठायां स्थितां नैष्ठिकीम
पुनरावर्तिनीं शांतिं द्वैतप्रशमयत्नोभोपरतिमा
प्नोत्यां कर्मणाप्नोति अयुक्तो वाथ स्त्न्योवहि
र्मुखः कामकारेण कामतोभिलाषेण प्रवृत्या
फले सक्तो लीनचित्तो निबध्यते संसारबंधं

प्राप्नोति एवम्भक्तस्यात्मानुशील्यमानः कर्म
योगो न केवलं देहाहंभावमेव प्रतनूकरोति
यावद्देहममतामपीत्याह ॥ सर्वकर्माणि म
नसा संन्यस्यास्ते सुखं वशी नवद्वारे पुरे देही
नैव कुर्वन्न कारयन् ॥ वशी स्वीकृतस्वभा
वः सर्वाणि कायवाङ्मनसा निवर्त्यानि स्वभा
वाविकानि वेदिकानि च कर्माणि मनसात्म
मनिनात्मकेनांतःकरणेन संन्यस्येश्वरायस
मर्प्य सुखं यथा भवत्येवमास्ते क्वास्ते इत्यत
आह नवद्वारे नेत्रे नासिके कर्णौ मुखं च सम
शिरोरंध्राणि अधः पायूपस्थद्वे इत्येवं नव
द्वाराणि यस्मिंस्तस्मिंश्छिद्रगवाते नवकालं
कृते पुरे देहगेहे देही देहाभिमात्मदर्शी अज्ञो
हि देहतादात्म्याद्देहस्थ एव तथा देहेऽहंकारा
भावान्नैव कुर्वन् ममकाराभावाच्च न कारय
न् अतः सुखमास्ते इत्यर्थः यद्यथा वेश्मांत
र्गतस्य पुंसो न गृहगते जीर्णत्वादिभिर्योग ए
वं देहगेहगतस्य परमात्मसमापन्नस्य न त
द्धर्मयोगः तदुक्तं श्रेष्ठसंगलक्षणे योग
वासिष्ठे अनिमज्जनमर्थेषु भावनाभावने

णादि अवेदनं सुखादीनामसंसंगपरं विदु
रिति अतः परमात्मस्वरूपं स्मारयन्नाह ॥
न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः
न कर्मफलसंयोगं स्वभावस्तु प्रवर्तते ॥
प्रभुः स्वामी परमात्मा लोकस्य जीवलोकस्य
कर्तृत्वं तत्तत्क्रियानुष्ठातृत्वं न सृजति न च
पुण्यपापात्मकानीप्सिततमानि कर्माणि न
च कर्मफलैः सुखदुःखात्मकैः संबंधं वास्तवेन
रूपेण सृजन्नुत्पादयति अतस्तत्स्वरूपस
मापन्नः कर्मयोगी तादृश एव भवति यदि
किंचित्स्वतो न कारयति न करोति चात्मा क
स्तर्हि कारयन्कुर्वंश्च वर्तते इति तत्राह स्वभा
वो जीवस्याविद्यैव प्रवर्तते अनाद्यविद्याका
मवशात्प्रवृत्तिस्वभावो जीवलोकः कर्तृत्वा
दिकं कल्पयतीत्यर्थः किंच ॥ नादत्ते कस्य
चित्पापं न चैव सुकृतं विभुः अज्ञानेनावृतं
ज्ञानं तेन मुह्यंति जंतवः ॥ विभुः परमात्मा
कस्यचिज्जीवस्य परमार्थतः पापं पुण्यं वा ना
दत्ते निर्लेपत्वात् अतस्तत्स्वरूपसमा
पन्नस्य योगिनो न पुण्यपापसंबंधः नतु जी

वस्यैवचयदयंकर्तृत्वादिकंचेपश्यस्तर्हिकिंकार
णकइत्यतआह अज्ञानेनावरणशक्त्यात्मके
नस्वरूपापकवेनज्ञानंस्वस्वभावप्रत्यभिज्ञा
लक्षणमावृतमाच्छादितंविस्मृतिपथमुप
नीतमितियावत् तेनकारणेनजंतवो
जीवाभ्रमान्मुह्यंतिदेहाद्यभिमानपूर्वकं क
र्तृत्वादिकंस्वात्मन्यारोपयंतीत्यर्थः व्यतिरेके
परमार्थलाभइत्याह ॥ ज्ञानेनतुतदज्ञानंये
षांनाशितमात्मनः तेषामादित्यवज्ज्ञानंप्रका
शयतितत्परम् ॥ तुर्व्यतिरेके आत्मनोज्ञाने
नप्रत्यभिज्ञालक्षणेनयेषांतदज्ञानंस्वरूपा
पकवरूपंनाशितमपध्वंसितम् तेषामुपा
यंतरानपेक्षकंस्वप्रकाशंज्ञानमुक्तलक्षणं
तत्परंप्रकृष्टमुपेयंपरमात्मस्वरूपलक्षणं
वस्तुप्रकाशयत्यत्रदृष्टांतः आदित्यवदिति
यथानिःसहायआदित्यःप्रभामात्रेणान्ध
कारंपर्यवसन्नशेषंवस्तुप्रकटीकरोतितत
वत् तदेवंभूतपरमात्मज्ञानाभ्यासफल
माह ॥ तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्प
रायणाः गच्छंत्यपुनरावृत्तिंज्ञाननिर्धूत

कल्मषः ॥ तदुदयः समाध्यारंभसमयेनासि
न्परमात्मन्येवबुद्धिरंतःकरणवृत्तिरूपावोप
शान्तिर्येषांते ततःसमाधौतदात्मतःसएवप्र
त्यगात्मास्वस्वभावोयेषांते तथातन्निष्ठाःसमा
ध्युपरमसमयेतस्यैवनिष्ठापरमानन्दचम
त्कारसंस्काररूपोनिश्चयोयेषांते तथातत्प
रायणाव्युत्थानकालेपरामर्शात्यागेनात्मनि
रताश्चवहितःएवमभ्यासक्रमेणव्युत्थानेपि
समाध्यनुवेधःसंपत्स्यति तदुक्तं समाधिसंस्का
रवतिव्युत्थानेप्ययोग्ययाश्चिदेवामर्शानित्यो
दितसमाधिलाभइति ततईश्वरप्रसादलब्धे
नोद्भूतज्ञानेननिर्धूतंध्वस्तंकल्मषंपुण्यपापद्व
यंकर्मयैस्तएवंविधायोगिनोपुनरावृत्तिंमु
क्तिंप्राप्नुवंति तथाचश्रुतिः एकएवात्मामं
तव्योजाग्रत्स्वप्नसुषुप्तिषु स्थानत्रयव्यती
तस्यपुनर्जन्मनविद्यतेइति एवंदेहपातादू
र्ध्वंविदेहकैवल्यरूपंज्ञानफलमुक्ता प्रारब्ध
कर्मवशात्तत्रापिदेहेजीवन्मुक्तिरूपंतत्फल
माह ॥ विद्याविनयसंपन्नेब्राह्मणेगविह
स्तिनि शुनिचैवश्वपाकेचपंडिताःसमदर्शि

68

नः॥ पंडिताउत्पन्नयथोक्ततत्त्वज्ञानाः सम्यग्ज्ञा
वियाविनसंपन्ने ब्राह्मणे विद्याशास्त्रं विनयस्त
दर्थानुष्ठाननियमस्ताभ्यां संपन्ने ब्राह्मणे सा
त्विके सर्वोत्तमेन घ्यागवि राजस्यां पावनत्वा
दिधर्मयुक्तायां हस्तिनि ग्रथ्यादीयीस्थाने श्व
न्यपवित्रत्वादियुक्ताश्रये श्वपाके पापित्वादि
शक्तिपालिविषये पतेष्वेतासमेषु च सत्वादिसं
स्कारे रसंस्पृष्टः समदर्शिनः ससंविशेषं ब्र
ह्मद्रष्टुं शीलं येषां ते इति समं पश्यंति ननु व्य
वहरेति तदुक्तं चिद्धर्मी सर्वदेहेषु विशेषो
नास्ति कुत्रचित् अतश्चतन्मयं सर्वं भावयन्भ
वजनयति यथा गंगातोये न तागेहरायां
सूत्रे च प्रतिबिंबितस्यादित्यस्य न तद्गुणदोष
संबन्धस्तथा ब्रह्मणोपि चिदाभासद्वारा प्रति
बिंबितस्य नोपाधिगततद्गुणदोषसंबंध इत्य
तःसन्त्थानाः सर्वत्र समदृश्येव परमानन्दस्फू
र्त्तीजीवन्मुक्तिमनुभवंतीत्यर्थः इत्यद्वैतज्ञा
नस्यैवेयं धारोक्ता ननु समासमाभ्यां विषम
समे पूजातःस्यात्रमभोज्यमिति श्रीगौत
मोक्तेर्विषमेषु समदर्शिनं निषिद्धं कुर्वतः

कथं ते पंडिता इत्यत आह ॥ इहैव तैर्जितः स
र्गो येषां साम्ये स्थितं मनः निर्दोषं हि समं ब्रह्म
तस्माद्ब्रह्मणि ते स्थिताः ॥ तैर्वेदय चरणैः स
मदर्शिभिर्जीवन्मुक्तैः इहैव जीवद्दशायामेव
सर्गः संसारो जन्मापरपर्यायो जितो अतिक्रान्तो
देहपातादूर्ध्वपतिक्रमत इति किं वक
व्यम् कैः येषां साम्ये ब्रह्मणः समभावे मनोम
ननात्मकमन्तःकरणं स्थितं निश्चलीभूतमत्र
हेतुः हि यस्मात् ब्रह्म सर्वत्र समं निर्दोषम्
पाधिदोषरहितं च तस्मात्ते समदर्शिनो ब्र
ह्मण्येव स्थिता ब्रह्मभावं प्राप्ता इत्यर्थः गौत
मो हि कृत्स्नदोषो ब्रह्मभावप्राप्तेः पूर्वमेव शुद्धात्
मनः ... ब्रह्मभावं प्राप्नोति ... धनाद्धर्मा ... ही
इति प्रज्ञकावस्थाश्रवणात् ... ब्रह्मभावं प्राप्तस्य
यतेः ... तत्स्य उपसंहाराच्च अथ ब्रह्मभावं प्राप्तस्य
लक्षणमाह ॥ न प्रहृष्येत्प्रियं प्राप्य नोद्विजे
त्प्राप्य चाप्रियं स्थिरबुद्धिरसंमूढो ब्रह्मवि
द्ब्रह्मणि स्थितः ॥ योगागमतो गुरूपदेशतो वा
ब्रह्मविद्ब्रह्मणि स्थितः ॥ स्थिरबुद्धिः स्थिरा विक
ल्पविद्धा ... विदेही स्थिरबुद्धिः ... संम
ल्पोरविकम्पा बुद्धिर्ब्रह्मबुद्धिर्यस्य सः असंमूढ
... ब्रह्मणि स्थितः सतत परिशील
... मबुद्धः स ब्रह्मणि स्थितः

नाद्ब्रह्मण्येव विश्रांतः एवंविधो ब्रह्मवित्प्रियं
प्राप्य न हृष्यत्यप्रियं प्राप्य नाविषीदति सुखम
स्यजडीभूतस्यापि प्रियाप्रियप्राप्त्या हर्षविषा
दराहित्यं न स्यादुत्पर्थकमसंमूढ इति
नन्वीदृशी ब्रह्मभावावस्था यां कस्यापि स्यादिति
रित्यत आह ॥ बाह्यस्पर्शेष्वसक्तात्मा विन्द
त्यात्मनि यत्सुखम् स ब्रह्मयोगयुक्तात्मा सु
खमक्षयमश्नुते ॥ यो योगी बाह्यस्पर्शेष्विंद्रि
यार्थेषु विषयेष्वसक्तात्मा नासक्तनिहतया
तिमद्यांतःकरण आत्मनि प्रत्यगात्मनि यदनि
र्वाच्यं सुखमानंदं विंदन्नुपलभते स एव
योगयुक्तात्मा वहिंतांतःकरणः सुखमक्लेशे
नाभ्यासतारंभ्येनाक्षयमव्ययं ब्रह्मपरमका
रणमश्नुते स्वात्मनया व्याप्नोति अथवाक्षयं
सुखमिति ब्रह्मविशेषणम् ननु दृष्टे विषय
भोगसुखे संप्रेप्सुः कृतो दृष्टमात्मसुखे परित्या
गमित्याशंक्याह ॥ ये हि संस्पर्शजा भोगा दुः
खयोनय एव ते आद्यंतवंतः कौंतेय न तेषु रम
ते बुधः ॥ हि यस्मात् संस्पर्शजा विषयसंपर्कजा
ता ये भोगा आदिमत्वादंतवत्वाच्चानित्यास्ते दुः

खयो

खेयो न य एव स्पर्शेषु प्रार्थनादुःखमाध्यमिवा
राश्च दुःखस्यैव जनकाः अतस्तेषु भोगेषु बुद्ध
उत्पन्नात्मलाभो यस्य कर्मयोगाद्बहिस्तस्माद्विरक्तता
त्मानन्दस्य चलत्वान्माह ॥ शक्नोतीहैव यः
सोढुं प्राक्शरीरविमोक्षणात् कामक्रोधोद्भ
वं वेगं स युक्तः स सुखी नरः ॥ यो योगीहैव जी
वन्नेव शरीरपातात्प्रागेव कामात्क्रो
धाच्चोत्पन्नं वेगं संरंभं मनोनेत्रलोमादिलक्षणं
यमात्मकं निश्चलतया सोढुमवधीरयितुं शक्नो
ति स युक्तः युक्त्यानेऽपि समाहितः स एव सुखी नि
रोधकाले निरुत्तरानन्दरूपसमाधिफलभा
क् नान्यः तदुक्तम् प्राणे गते यथा देहः सुखं
दुःखं न विन्दति येन विषयेभ्यः पलायनप
रा योगमभ्यस्यंति ते वा दुर्लभो योगस्तत्फलं
चेति अस्यैव योगिनोऽभ्यासक्रमेण ज्ञानका
ष्ठाधिरोहमाह ॥ योऽन्तःसुखोऽन्तरारामस्तथां
तर्ज्योतिरेव यः स योगी ब्रह्मनिर्वाणं ब्रह्मभू
तोऽधिगच्छति ॥ सुखं बुद्धिग्राह्मिसंवेद्यं आ
रामश्च तस्मात्तो रमणं मनोवृत्तिः ज्योतिश्चैनें
द्रियवृत्तिर्यस्यैतान्यंतराण्येव न विषयेषु

गी॰टी॰
७॰

एवमभ्यासक्रमेण ब्रह्मभूतो जीवन्नेव ब्रह्मात्म
भावं प्राप्तः सन् ब्रह्मणि निर्वाणं लयं प्राप्नोति यु
च्यत इत्यर्थः नतु द्वियोगाद्यन्यतमनिष्ठोमि
त योगी तथा च श्रुतिः ब्रह्मैव सन्ब्रह्माप्येती
ति न केवलमागमसिद्धः पुरातनोयमर्थः किं
तु वर्तमानकाले प्रत्यक्षसिद्धोपीत्याह ॥ लभंते
ब्रह्मनिर्वाणमृषयः क्षीणकल्मषाः छिन्नद्वै
धा यतात्मानः सर्वभूतहितेरताः ॥ ऋषयो व
हवः सम्यग्दर्शिनः सर्वभूतहितेरता मैत्र्यादि
संस्कारसंपन्नाः तदुक्तम् मैत्रीकरुणामुदितो
पेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भाव
नातश्चित्तप्रसादनमिति अत एव यतात्मानः
परामर्शेन स्वीकृतस्वभावास्ततश्च छिन्नद्वैधा
ब्रह्मभावास्याद्वेति द्वैतभ्रान्त्या अत एव क्षी
णकल्मषा विनष्टबंधहेतुकर्माण एवंविधा
श्र्यापि ब्रह्मनिर्वाणं ब्रह्मणि लयं लभंते न
दुक्तं नारदसंग्रहे यथा सुभर्जितं बीजं नेह
भूयः प्ररोहति विकल्पक्षीणचित्तस्य तथा
भूयो न संसृतिरिति न केवलमीदृशां महात्मा
नां विदेहमुक्तिरेव यावज्जीवन्मुक्तिरपीत्या
ह ॥ कामक्रोधवियुक्तानां यतीनां यतचे

70

तस्मात् अभितो ब्रह्मनिर्वाणं वर्त्तते विदि

तात्मनाम् ॥ यतीनां ध्यानयोगाभ्यासपाट

वेन प्रयत्नशीलानां विदितात्मनां विज्ञात

परमार्थानां यतचेतसां मृत्यानेपि आत्मप्र

त्यवमर्शेन नियमितांतःकरणानामतएव

कामक्रोधवियुक्तानामभितो जीवतां मृता

नां वा ब्रह्मनिर्वाणं वर्त्तते जीवंन एव मुक्ता इ

त्यर्थः अथ सम्यग्दर्शनांतरंगस्य ध्यानयोग

स्य षष्ठे ध्याये विस्तरेण विवक्षयाम् त्रस्यानी

यमध्यर्वस्लोकमुपदिशति ॥ स्पर्शान्कृत्वा

बहिर्वाह्यांश्चक्षुश्चैवांतरे भ्रुवोः प्राणापानौ

समौ कृत्वा नासाभ्यंतरचारिणौ यतेंद्रियम

नो बुद्धिर्मुनिर्मोक्षपरायणः ॥ वाह्याः स्पर्शा

श्रूपरसादयो विषया श्चिंतिताः संतोंतः प्रवि

श्चिंतिताः संतोंतः प्रविश्चिंति तांश्च चिंतात्या

गेन बहिरेव कृत्वा चक्षुश्च भ्रुवोर्मध्ये कृत्वा

त्यंतेन त्रयोर्निमीलनेन मनो लीयते उन्मीलने च

बहिः प्रसरतीति तदुभयदोषपरिहारार्थं देहा

द्धंभा निमज्जनेन स्वस्वभावोन्मज्जनार्थं च भ्रू

मध्ये दृष्टिं संस्तम्भ्य तदुक्तं संप्रदायामिमं

मद्देशेण सम्यग्वदामि ते केवलं जायते स
द्योनेत्रयोः स्तब्धमात्रयोरिति नासायाः स
सापसव्यानाडीहृदयात्मस्य भ्रुवोर्वयस्याभ्यं
तरे चरंतौ संतौ प्राणापानासमौ कृत्वा ध्यान
योगबलेन विशुद्धवृत्तिं लब्धितौ कृत्वा यच्छ्री
मान्येन स्तनेच श्रीश्रीधामावाखिलजगतः
कारणंतो मयूरैः सर्गादाने सृजाति भगव
न् कासहाद्रिक्रमेण नावेवांतर्विश्ववति
समोज्जकतामात्मव कौदावप्यस्तेनयासि
युगपन्मुक्तये भक्तिभाजाम् एवमनेनपा
येन यतेंद्रियमनोबुद्धिर्मुत्यानेपि मननशी
लो योगी मोक्षपरायणः मोक्षे परमे नितरा
स्तिका मोनन्त श्रुक्तइत्यर्थः प्राणापानयोर्न
सिकाह्रितोः मतयोगिनां भ्रूमध्यवर्तिब्रह्म
द्वारसत्वेनोद्धाटनेन तास्यवाहिनोरित्यतो
नासाभ्यंतरचारिणावित्युक्तदितम् तथा
ध्याननिष्ठस्य समाधिं प्रवेक्ष्यतो योगिनः
प्राणापानयोर्मध्यनाड्याप्रशममापन्न
मानयोर्योनिरिंद्रप्रदेशेतद्दिमात्रं विश्रांति
विश्रवस्तंतासेवसमतयेहमगावतोविव

हितानन्तक्रमकम् अथास्माकमेयोगि
नःसकाशाद्ब्रह्मभूतस्यविशेषंप्रतिपाद
यति ॥ विगतेच्छाभयक्रोधोयःसदामु
क्तएवसः ॥ यस्याविच्छाभयक्रोधाद्विन
दोषाःसर्वदानिर्गताविशेषेणगताःप्रध
स्ताःसतादृशोब्रह्मभूतोमुक्तएवेत्यर्थः अ
स्यध्यानयोगस्यब्रह्मभावस्यचमूलकारण
माह ॥ भोक्तारंयज्ञतपसांसर्वलोकमहेश्व
रम् सुहृदंसर्वभूतानांज्ञात्वामांशांतिमृ
च्छति ॥ मामहंतांप्रत्यंचंपरमात्मानंज्ञात्वा
त्मत्वेनप्रतिपद्यशांतिंनिःशेषविकल्पोप
शमरूपांनिर्वृतिमृच्छतिप्राप्नोतिमत्स्वरूप
तादेवमुच्यतइत्यर्थः तथाचश्रुतिः तमेव
विदित्वातिमृत्युमेतिनान्यःपन्थाविद्यतेय
नायेतित्वंसाक्षात् पश्यन्नपिकिंनाहंमु
क्तइत्याशंकानिराकरणाय तथाचकुला
र्णवे नवेदाध्ययनान्मुक्तिर्नशास्त्रपठना
दपि ज्ञानादेवहिकैवल्यंनान्यथावीरवं
दितेइति विशेषणान्याह सर्वेषांयज्ञानां
तपसांचभोक्तारंपालकमितिवा तथास

वैदांलोकानांमहांतमीश्वरंहिरण्यगर्भादी
नामपिनियंतारम् सर्वेषांभूतानांसुहृद
मंतर्यामिणमित्योम् आत्मन्येवैकतानत्वा
द्वन्द्वातिक्रममब्रवीत् संन्यासयोगरूपंय
त्नवंतेश्चार्थयेचतम् इतिश्रीभगवद्गीताटी
कायांतत्त्वप्रकाशिकाख्यायांराजानकल
क्ष्मीरामविरचितायांसंन्यासयोगोनामपं
चमोध्यायः ५ ॥ एवंकर्मयोगेनापिध्या
नयोगंविनाशुद्धिमावहज्ज्ञानकाष्ठाधिरो
हेनस्यादित्यतःषष्ठोध्यायआरभ्यते तत्रप्रा
क्तनेनाध्यायगणेनसाधितमर्थंश्लोकद्वये
नश्रीभगवानुवाच ॥ अनाश्रितःकर्मफ
लंकार्यंकर्मकरोतियः ससंन्यासीचयोगी
चननिरग्निर्नचाक्रियः ॥ यःकर्मफलमन
भिसंधानादनाश्रितःकार्यमवश्यकर्तव्यं
शास्त्रीयंस्वाभाविकंवाकर्मकरोतिसएव
फलानभिलाषेणसंन्यासीसएवस्वस्वभा
वावहितत्वाद्योगीचोच्यतेइतिशेषःतदु
क्तंकुलार्णवे सर्वकर्माणिसंत्यक्तंनश
क्यंदेहधारिणा त्यजेत्कर्मफलंयोवासंन्या

गीत्यभिधीयते अग्निशब्दः शास्त्रविहितक
र्मोपलक्षकः क्रियाशब्दः स्वाभाविककर्मो
पलक्षकः तेन निरग्निः शास्त्रीयकर्मत्यागी
संन्यासी योगी वा न मन्तव्यः न चाक्रियः स्वाभा
विककर्मत्यागी उक्तगुणः संन्यासी योगी
वा मन्तव्यः न निरग्निरित्यादिना यमर्थो विधी
यते निरग्निश्च न भवति निष्क्रियश्च न भव
त्यथ च संन्यासीत्यद्भुतम् संन्यासयोगशब्दौ
वन्योन्यपर्यायो न तथाच योगमन्तरेण संन्या
सेनोपपद्यते एवं संकल्पसंन्यासं विना यो
गो न युज्यते तस्मात्तत्तत्संबद्धो योगसंन्या
सावित्याह ॥ यं संन्यासमिति प्राहुर्योगं तं
विद्धि पाण्डव न ह्यसंन्यस्तसंकल्पो योगी भव
ति कश्चन ॥ ज्ञानमात्रवादिनो यमर्थं नैष्क
र्म्यरूपं न्यासएवातिरेचयतीत्यादिश्रुतिवे
द्यमाश्रित्य संन्याससंज्ञया कथयंति योगमा
रुक्षुत्वा कर्मानुष्ठानमेव तं संन्यासं जानीहि
न तु गुणसादृश्यादध्यारोपो त्र च किं सादृश्य
मित्याह न हीति न ह्यसंन्यस्तः कर्मफलयोः
संकल्पो येन सो ऽसंन्यस्तसंकल्पो योगी न हि

गी॰टी॰ भवति यएवसर्वदात्मनिप्रबुद्धोऽहंप्रत्यय
७२ तयात्यक्तकर्मफलसंकल्पःसएवयोगी
कार्यकर्मणोऽत्समाधानवान् नान्यःक
र्मत्यागीअकृत्स्नाकर्माविरहात् तस्मात्सं
कल्पत्यागेनचित्तविक्षेपाभावायोगस्या
पिसंन्यासत्वम् तदुक्तंकुलार्णवे उत्पन्नस
हजानंदस्तत्त्वज्ञानरतःप्रिये सर्वसंकल्प
संत्यक्तःसविद्वान्कर्मसंत्यजेत् अमृतंप्राप्य
यथाहृतःपत्रंत्यजतिनिस्पृहम् तत्वंप्रा
प्यतथायोगीत्यजेत्कर्मपरिग्रहम् इति य
यपिहृतमसिंहासनंराज्यमितिवत्त्रिक्रि
यस्यसंन्यासित्वंप्रसिद्धंतथापि ॥ आरुरु
क्षोर्मुनेर्योगंकर्मकारणमुच्यते योगारूढ
स्यतस्यैवशमःकारणमुच्यते ॥ मुनेर्ध्या
नेपिमननशीलस्ययोगंवक्ष्यमाणंमुख्यंयो
गमारोढुमिच्छतस्तत्रावस्थानमसमर्थस्यैव
रुरुक्षोरित्यर्थः कर्मोक्तंयुक्ताकर्मानुष्ठानं
कारणंयोगारोहहेतुरुच्यतेमया तस्यैव
मुख्ययोगकारणभूतंकर्मोज्झत एवयो
गारूढस्यपरमात्मसमापन्नस्यशमःसंकल्प

73

विकल्पत्रूपत्वोभत्तयकारणंनिमित्तमुच्यते
वेदादिश्रुतिनमयाध्यानयोगनिष्ठस्यतस्यैव
सर्वविकल्पोपरतिःपरमात्मासमापत्तेःप्रयो
जिकेत्यर्थः अथवातस्यैयोगारूढस्ययोगीम
अयोगीश्वारूढस्यलब्धप्रतिष्ठस्यशमःकार
णंलक्षणमुच्यते एवपवार्थःप्रकाश्यते ॥
यदाहिनेन्द्रियार्थेषुनकर्मस्वनुषज्जते सर्व
संकल्पसंन्यासीयोगारूढस्तदोच्यते ॥
यदायस्यामवस्थायांविषयेषुइन्द्रियैःस्पृश्य
मानेष्वपितदर्थेषुकर्मस्वचाक्रियमाणेष्वपि
नानुषज्जते आसक्तिंनभजते केवलंपवन
इवभावजातंस्पृशन्नपिस्वभावव्योमप्रतिष्ठ
एवभवति अत्रहेतुगर्भविशेषणंसर्वानिति
वैषांकर्मणांफलानांचसंकल्पसन्न्यसनेशी
लंयस्यसतदायोगारूढउच्यतेयोगसमाधा
वारूढोलब्धप्रतिष्ठइति अस्यांउद्धावश्यमे
वावधेयमित्याह ॥ उद्धरेदात्मनात्मानंनात्मा
नमवसादयेत् आत्मैवह्यात्मनोबंधुरात्मै
वरिपुरात्मनः ॥ आत्मानंस्वस्वभावमात्म
नेवयथोक्तोपदेशप्रत्युदितोत्साहेनोउद्धरेत्

सारात् नत्वेवं विस्मृतस्वबलतयोपेक्षयावसा
दयेन्मज्जयेत् पुरुषस्यात्मन आत्मैव स्वस्य रिपु
रपकारकः नान्यः कश्चित् यदुक्तं आत्मैव य
दि नात्मानमहितेभ्यो निवारयेत् कोन्यो हि
तकरस्तस्यापथ्यं निवारयिष्यतीति कस्यात्मै
व बंधुः कस्य चात्मैव रिपुरित्यपेक्षायामाह ॥
बंधुरात्मात्मनस्तस्य येनात्मैवात्मना जितः
अनात्मनस्तु शत्रुत्वे वर्तेतात्मैव शत्रुवत् ॥
येन पुरुषेणात्मा स्वस्वभाव आत्मनैव शमाभ्या
सलब्धबलेन जितः अत्यवमर्शगोचरापादना
नाद्वशीकृतः तस्यात्मैवात्मनो बंधुः अनात्मनः
प्रमापरतयोपेक्षितात्मनः पुरुषस्यात्मैव श
त्रुत्वे वर्तते वाह्यशत्रुवत् तथा चोक्तम् नत
त्कुर्यादसिस्तीक्ष्णः सर्पो वा व्याघ्रो वि चोल्बणः
अरिर्वा नित्यसंक्रुद्धो यदात्मा दुरधिष्ठित इति
यथोक्तस्यात्मजयस्य फलमाह ॥ जितात्म
नः प्रशांतस्य परमात्मा समाहितः शीतोष्ण
सुखदुःखेषु तथा मानापमानयोः ॥ जितउ
क्ताविषया वशीकृत आत्मा येन तस्यात एव
प्रशांतस्य परमात्मा समापत्तिविशान्निवृत्त

74

विकल्पस्य शीतोष्णसुखदुःखेषु तथापि मा
नापमानयोः सतोरपि परमात्मा समाहितः
स्वात्मनिष्ठो भवति साक्षादात्मभावेन वर्त्त
त इत्यर्थः विकारहेतुषु सत्स्वपि स्वात्मन्यव
स्थानं लोकवन्न विक्षिप्यते इति एवंविध
स्य योगारूढस्य लक्षणमुपसंहरति ॥ ज्ञा
नविज्ञानतृप्तात्मा कूटस्थो विजितेंद्रियः
युक्त इत्युच्यते योगी समलोष्टाश्मकांचनः ॥
ज्ञानमौपदेशिकं विज्ञानमपरोक्षानुभव
स्ताभ्यां तृप्तो निराकांक्षः आत्मा स्वभावो य
स्य सः अतएव कूटस्थो निर्विकारः एतो विजि
तेंद्रियः वशीकृताबाह्यांतःकरणो न तद्व
शः अतएव समानि हेयोपादेयबुद्धिशून्यत
या लोष्टादीनि यस्य सः एवंविधो युक्तो योगा
रूढ इत्युच्यते किंच सुहृन्मित्रार्युदासीन
मध्यस्थद्वेष्यबंधुषु साधुष्वपि च पापेषु स
मबुद्धिर्विशिष्यते ॥ सुहृत्स्वभावेन हिता
शंसी मित्रं स्नेहवशेनोपकारकं अरिर्घात
कः उदासीनो विवदमानयोरुभयोरपि हि
ताशंसी द्वेष्यो द्वेषविषयः बंधुः संबंधी सा

यवः सदाचाराः पापा दुराचारा एतेषु समानि
र्विशेषैकदर्शित्वादेकरूपा रागद्वेषशून्या वा
बुद्धिर्यस्य स तु विशिष्टः यस्तु तदा तु गुणापान्वी
क्षिते तस्य द्वेषमित्राभ्यां रागद्वेषव्यतिक्रमे मि
थ्याचारत्वमेव अथ कर्मयोगिनश्चित्तवृ
त्तिनिरोधलक्षणं ध्यानयोगमारुरुक्षोरित
रक्रियावदहोरात्रमध्ये व्यवस्थितस्यासका
लं विशिष्टेतिकर्तव्यतान्वितमपि योगीत्या
दिना स योगी परमो मत इत्यन्तेन ग्रन्थेनोप
दिशति ॥ योगी युंजीत सततमात्मानं रह
सि स्थितः एकाकी यतचित्तात्मा निराशीरप
रिग्रहः ॥ योगी उक्तविध यानित्यं समाहितः
आत्मानं सततं प्रत्यहमवस्थापितनियत
कालानतिक्रमेण युंजीत समाहितं कुर्या
त् प्रत्यवमर्शेत् कीदृशः रहितस्यपेकाग्र
बाधकरहिते एकान्ते देशे स्थितः एकाकी अ
सहायः तथा यतचित्तात्मा यतं नियमितं
चित्तं मन आत्मा शरीरं च येन सः निराशीर्नि
राकांक्षोऽपरिग्रहो ममताशून्यः साक्षित्वा
दिवत्त्यागपरमफलो युंजीतेत्यनेन कर्मयो

गत्समाधानाश्रमसेनायंयोगोभ्यसनीयउ
त्क्रमम् एकाकित्वादिभस्तत्वेनयुज्यतेना
मध्यात्रस्येदानींपरिकर्माभिधीयतेकिंक
त्वायुंज्यादित्याह ॥ शुचौदेशेप्रतिष्ठाप्य
स्थिरमासनमात्मनः नात्युच्छ्रितंनातिनी
चंचैलाजिनकुशोत्तरं ॥ स्वभावतः संस्का
रतोवाशुद्धेस्थानेश्चात्मनश्चासनमासनेतत
स्मिन्नित्यासनंप्रतिष्ठाप्यस्थापयित्वाकीदृ
शंस्थिरोर्थेनातीवमोतंनचानीचंस्थिरंनिश्च
लंतथाचैलाजिनेकुशेभ्यउत्तरेयत्रतत्
कुशमयहस्तुपरिमृदुचर्मतदुपरिमृदुव
स्त्रमास्तीर्येत्यर्थः स्थिरमितिनोकादिव्या
तात्पर्यम् तदुक्तं स्थिरमासनमिति एवंस
ति ॥ तत्रैकाग्रंमनःकृत्वायतचित्तेंद्रिय
क्रियः उपविश्यासनेयुंज्याद्योगमात्मवि
शुद्धये ॥ तत्रतस्मिन्नासनेउपविश्यनतु
शयानस्तिष्ठन्वाआसीनःसंभवादितिन्या
यात् यतचित्तेंद्रियक्रियःपुरुषःयताउ
परमतानानिगृहीताःचित्तक्रियाःसंक
ल्पात्मानंइंद्रियक्रियाश्चयेनसमनोमन

नात्मकमंतःकरणमेकाग्रंध्येयएवकृत्वानिरु
ध्वायोगंयुंज्यात्समाधिरूपंयुंज्यादभ्यसेत्
किमर्थमात्मविशुद्धये आत्मनः स्वस्वभाव
स्य विशुद्धये कैवल्याय देहं भावनिमज्ज
नायेत्यर्थः आसनस्थैर्यात्कालस्थैर्यं चित्त
स्थैर्यमित्युक्तमासनस्थैर्यं यच्चित्तैकाग्र्योप
योगि देहसंस्थामाह ॥ समं कायशिरोग्री
वं धारयन्नचलं स्थिरः संप्रेक्ष्य नासिकाग्रं
स्वं दिशश्चानवलोकयन् ॥ इतस्ततो दि
शो प्रेक्षमाणः स्वीयं नासिकाग्रं संप्रेक्ष्य अर्ध
निमीलितनेत्र इत्यर्थः दिक्षु दृष्टिविक्षेपपरि
हारार्थं नासाग्रावलोकनम् न तु तद्देवल
क्ष्यमित्यर्थः तथा कायो देहमध्यभागो विव
क्षितः कायश्च शिरश्च ग्रीवा च कायशिरोग्री
वं मूलाधारादारभ्य मूर्धान्तपर्यन्तं समं निश्च
लत्वतया नात्यवनतं नातिनम्रं यथा भवति
तथा धारयन् आसने उपविष्टः उडुके प्र
यत्नशैथिल्यानंत्यसमापत्तिभ्यामिति की
दृशमचलं चित्तविक्षेपकारणांगमेजय
त्वादिरहितम् एवं स्थिरो भूत्वा एवं विधं

संस्थानेनत्यार्थमितिनातिक्रामन् योगं
युंज्यादिति सर्वेण संबंधः एवंबद्धपरिकर
स्य समाध्युपयोगी निर्विशेषणमाह ॥ प्र
शांतात्मा विगतभीर्ब्रह्मचारिव्रते स्थितः
मनः संयम्य मच्चित्तो युक्त आसीत मत्परः ॥
प्रशांतो रागादिकलंकशून्य आत्मांतःकर
णं यस्य सः अत एव विगतभीर्निर्भयः ब्रह्म
चारिव्रते ब्रह्मचर्यादौ स्थितः ब्रह्मचारिव्र
तेत्युपलक्षणेन यमादयोपि गृह्यंते तदुक्तं अ
हिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमा
इति मच्चित्तो मयि प्रत्यगात्मनि श्रुत्याने
चित्तं यस्य सः कर्मयोगी मत्परो मां परमेश्वरं
भक्त्या समाश्रितो मनो मननात्मकमंतः
करणं संयम्य सम्यग्वृत्तिशून्यतया निरु
ध्य युक्तः समस्वमशनासीत तिष्ठेत् एवं
ध्यानयोगाभ्यासफलमाह ॥ युंजन्नेवं
सदात्मानं योगी नियतमानसः शांतिं नि
र्वाणपरमां मत्संस्थामधिगच्छति ॥
योगी उक्तोपपत्यानित्यासमाहितः कर्म
योगी नियतमानसः नियतं प्रत्याहृत्या

गी॰टी॰
७७

त्मनि निरुद्धमानसं येन सः एवमुक्तविध
या सदा प्रत्यक्स्वमात्मानं प्रत्यगात्मानं युंजन्न
त्यवमत्संस्थां शांतिं सर्वविकल्पोपशमे प्राप्नोति
ननु सुषुप्तमोहादावपि विकल्पोपरतिरस्ती
त्यत आह मत्संस्थां मद्रूपेणाहंतया सम्यक्
स्थिताम् एवंविधायाः शांतेः फलमाह
निर्वाणपरमाम् निर्वाणं मोक्षः परमं प्राप्य
पर्यंतकाष्ठा यस्यास्ताम् अथ ध्यानयोग
निष्ठस्याहारादिनियममाह ॥ नात्यश्न
तस्तु योगोस्ति न चैकांतमनश्नतः न चा
ति स्वप्नशीलस्य जाग्रतो नैव चार्जुन ॥
अत्यश्नतः सौहित्यपर्याप्तादात्मसम्मिताद
मादपिकं भुंजानस्य तथैकांतमभुंजान
स्यापि यथोक्तो योगः समाधिर्नास्ति तथाति
स्वप्नशीलस्य नित्यं निद्रारतस्य तथैव जाग्र
तोऽनिद्रस्यापि न भवति तर्हि कथंभूतस्य
योगो भवतीत्यत आह ॥ युक्ताहारविहारस्य युक्त
चेष्टस्य कर्मसु युक्तस्वप्नावबोधस्य योगो भ
वति दुःखहा ॥ युक्तो नियतमात्राकालावच्छि
न्नत्वादुपपन्न आहारो भोजनं विहारश्चंक्रम

77

णादिर्यस्य तथा कार्येषु कर्मसु युक्ताचित
शरीरानवस्मादिनी चेष्टा यस्य तथा युक्तौ यथा
कालभावित्वात्स्वप्नो निद्राजागरौ यस्य ईदृश
स्य योगिन एष योगो दुःखहा भवति अभ्यस्य
मानः क्लेशं हन्ति सर्वदुःखविनं संपद्यतेत्यर्थः आहा
रादिसमाधिसिद्धिं यज्ञाद्यान तथा योगिनास्व
यं परीक्षितव्यं नात्र कष्टं यावद्विशेषेण नियमा
नियंत्रितं इत्यर्थः सामान्यो नोक्तं सर्वत्र युक्त
त्वम् तथा च श्रुतिः यदुक्तात्मसाक्षितमनंत
द्भवति तन्नहि नास्ति यद्भ्योक्ति नास्ति तदा कनी
यो नद्भवतीति अथ सिद्धयोगस्य लक्षणमाह
॥ यदा विनियतं चित्तमात्मन्येवावतिष्ठते
निस्पृहः सर्वकामेभ्यो युक्त इत्युच्यते तदा ॥
यदास्य योगिनश्चित्तं विनियतं विशेषेण नि
रुद्धं सदात्मन्येव प्रतीच्येवावतिष्ठते प्रतिष्ठां
लभते तदा सो युक्तः प्राप्तसमाधिरित्युच्यते
कीदृशो भूत्वा निःस्पृहः सर्वकामेभ्य इति
अथ निरुद्धं सर्वं चित्तं हन्ति कस्मात् निसमाहि
तस्य योगिन उपमानमाह ॥ यथा दीपो
निवातस्थो नेंगते सोपमा स्मृता योगिनो

यतचित्तस्य युंजतो योगमात्मनः ॥ यथा व
तशून्ये देशे स्थितो दीपो नेंगते न कम्पते तथात्म
नो योगं समाधिमभ्यस्यतो यतचित्तस्योपर
चित्तस्य योगिनः सोपमा दृष्टान्तः उक्तः तत्वज्ञैः
तद्वद्योगी निश्चलः स्वप्रकाशश्च तिष्ठतीत्य
र्थः अथ समाधिरूपस्य सुखस्य योगस्य लक्ष
णमाह षड्भिः ॥ यत्रोपरमते चित्तं निरु
द्धं योगसेवया यत्र चैवात्मनात्मानं पश्यन्ना
त्मनि तुष्यति ॥ यत्र यस्मिन्नवस्थाविशेषे यो
गस्य प्रत्यवमर्शीस्य समाधानस्य सेवयाभ्या
सेन निरुद्धं निरस्तबहिश्चारतया सर्वतो
नियमितं सच्चित्तं तप्तशिलागलितजलबिंदु
वत् स्वयमेवोपरमते निस्तलव्यापारं भवति
विकल्पात्मकं स्वस्वरूपं जहातीत्यर्थः तदानी
हि चित्तं विकल्परूपतां विहायात्मरूपं संपद्य
ते अत एव यत्र चात्मनैव स्वसंवेदनेनैव स्वस्व
भावपश्यन्नात्मानं कुर्वन्नात्मन्येव स्वस्वरूप एव
तुष्यति प्रीतिं भजते तं योगसंज्ञितं विद्यादि
ति चतुर्थेनान्वयः आत्मन्येव तोषे हेतुमा
ह ॥ सुखमात्यन्तिकं यत्तद्बुद्धिग्राह्यमती

द्रियं वेत्तियत्रनचैवायंस्थितश्चलतितत्त्व
तः ॥ यत्रावस्थाविशेषेयंयोगीअतीन्द्रियमि
न्द्रियैरग्राह्यंबुद्ध्याग्राह्यंतात्कालिकयाबोधरू
पात्मशक्त्यासंवेद्यमात्यन्तिकमनन्तंयत्तत्किम
प्यनिर्वाच्यंसुखमानन्दंवेत्त्यात्मतयोपलभते
तथाचश्रुतिः समाधिनिर्धूतमलस्यचेतसोनि
वेशितस्यात्मनियत्सुखंभवेत् नशक्यतेवर्ण
यितुंगिरातदास्वयंतदन्तःकरणेनगृह्यते त
दुक्तम् चिन्मात्रत्वंप्रयातस्यतीर्णमृत्योःसचे
तसः योभवेत्परमानन्दःकेनासावुपमेयतेइ
ति तथायत्रस्थितःकदाचिदप्यविश्रान्तिःस
न्नयंयोगी तत्त्वतःपरमार्थतत्त्वान्नैवचलति
नच्यवतेअस्मान्नेविपरीतभावनांनभजतेइ
त्यर्थः अतीन्द्रियमितिविषयसुखस्याहनि
त्सेन्द्रियसंयोगजन्यत्वात् किंच ॥ यंलब्ध्वा
चापरंलाभंमन्यतेनाधिकंततः यस्मिन्स्थि
तोनदुःखेनगुरुणापिविचाल्यते ॥ यंयोल
ब्ध्वासायतनतोधिकमुत्कृष्टमन्यंलाभमिष्टप्रा
प्तिंनमन्यतेन्यत्रसर्वेधीर्निवर्ततेइतिवस्तुस
भावोयम् यस्मिंश्चयोगस्थितेविश्रान्तोमह

79

नापिशीतोष्णादिदुःखेनायंयोगीनविचाल्य
तेनच्युत्याप्यतेकिंपुनस्तद्वेष्णा यएवंभूतोव
स्थाविशेषस्तमाहसार्धेन ॥ तंविद्याद्दुःखसं
योगंवियोगंयोगसंज्ञितं सनिश्चयेनयोक्त
व्योयोगोनिर्विण्णचेतसा ॥ तमुक्तविशेषण
मर्थंयोगसंज्ञितंयोगशब्दवाच्यंविद्याज्जानी
यात् कीदृशंदुःखेनत्रिविधेनतापेनक्लेशे
नसंयोगःसंसारदशायांसंबंधस्तस्यवियोगो
विश्लेषोयस्मात्तम् वियोगएवयोगइतिविरोध
च्छाया परमात्मनाक्षेत्रज्ञस्ययोजनंयोगइत्यभि
योगशब्दस्याभिधाव्यापारःयत्तएवंवियोगम
हाफलोयंयोगःततःसयोगःपरःसमाधिर्नि
श्चयेनशास्त्राचार्योपदेशजनितेनयोक्तव्यो
अभ्यसनीयःकेनानिर्विण्णचेतसापुरुषेणय
द्यपिशीघ्रंनसिध्यति तथापिनिर्विण्णमनु
द्विग्नमुपेयपराभोदयतंसुखवादुःखवद्धले
संसारंप्रतिनिर्विण्णंविरक्तंचेतोयस्यतेन ए
वंउक्त्वायोगलक्षणमुक्त्वासर्वशास्त्रसारभूत
मुपदेशसर्वस्वंउक्त्वायोगप्राप्त्युपायंसंक्षिप्य
श्लोकद्वयेनाह ॥ संकल्पप्रभवान्कामांस्त्य

कामान्सर्वानशेषतः मनसैवेंद्रियग्रामेविनि
यम्यसमंततः ॥ बाह्या विषयाइंद्रियनिरो
यन्यक्ताप्यवसंकल्पान्भिनहति:प्रभवोयोनि
र्येषां तान्सर्वान्कामान्विषयानशेषतः संस्का
रस्याप्यभावेनसवासनास्त्यक्त्वानथेंद्रिय
ग्रामंकरणवर्गसमंततः सर्वेभ्योविषयेभ्यो
मनसैवात्मामननात्मकेनविनियम्यनिरु
ध्य आत्ममननमेवेंद्रियनिग्रहः शनैःशनैःम
यत्नैरपिबुःशाकःप्रवेसति ॥ शनैःशनैरु
परमेद्बुद्ध्याधृतगृहीतया आत्मसंस्थंमनः
कृत्वानकिंचिदपिचिंतयेत् ॥ धृतिर्धारणा
ध्येयविषयंदार्ढ्यंतयातयागृहीतयोपल
ब्धयाबुद्ध्यात्मबोधेनमननात्मकमंतःकर
णमात्मसंस्थमात्मन्यहंताप्रत्ययेसम्यग्दृ
ढाधाभिमानकलुष्यतानवतारतम्येनास्थि
तेविश्रांतंकृत्वाशनैःशनैर्मनसःसम्यग्वि
श्रांत्यनुसारेणनतुसहसाविश्रांत्यारंभात्तु
परमेवउपरमेत् उपरमस्वरूपमाह नकिं
चिदपिचिंतयेदिति आत्मानंदाविर्भावा
र्थमात्मनिमनःसंस्थाप्यतत्संधानमापन्नक

यादित्यर्थः तदुक्तं श्रीकुलार्णवे नाकिंचिच्चिं
तनादेव स्वयं तत्त्वं प्रकाशते स्वयं प्रकाशि
ते तत्त्वे तत्क्षणात्तन्मयो भवेदिति एतदुक्तं भ
वति धारणया देहात्मभ्याविवेकेनात्मानं
बुद्ध्वा तस्मिन्देहाद्यभ्यासविस्मरणपूर्वं मनः
प्रतिष्ठाप्य न तत्स्वत्यातिष्ठापनानुसंधानमपि
न विदधीतेत्येषनुक्रमो योगस्य परमो विधिः
संकल्पप्रभवानित्यादिश्लोकद्वयतात्पर्यं
श्रीदेव्याः पंचस्तव्यामंगंतरेण कदाचित्तस्य
प्रलीनेशाश्रेयेन दत्तविरते विंदुविभवे तत
स्तत्त्वे चाष्टधनिवस्करूपाधिन्त्युपरते श्रितेशा
क्ते पर्वणेनकलितचिन्मात्रगगनोऽसौ संवि
त्तिं योगी रसयति शिवाख्यो परतनुमिति श्रा
भ्यासलोकाभ्यामात्मसंयमरूपस्य ध्यानयोग
स्य लक्षणमुपदिष्टमंतव्यामिति अन्ये योग
भूता इति न नु मनसश्चाचल्यादात्मविश्रांति
र्दुर्लभेत्यत आह ॥ यतो यतो निश्चरति म
नश्चंचलमस्थिरम् ततस्ततो नियम्यैत
दात्मन्येव वशं नयेत् ॥ मनो विमर्शात्मकं
यतो यतः शब्दादिभ्यो वा निद्रायामभिमुख्ये

नश्चरति संकल्पनद्रूपो स्वाकृतिं भजते य
तश्चंचल विषयप्रवणामास्थिरंस्तयपाव
शंच एतन्मनस्ततः शब्दादेर्विषयान्नि
ह्यात्म नियम्य सत्यावत्मात्मन्येव प्रतीच्य
वशंनयेत्स्वानिष्ठापयेत् नथावस्थातिः
तावदेवनिरोद्धव्यंयावद्धृदिगतंक्षयम्
एतज्ज्ञानंचध्यानंचशेषोन्यायग्रन्थविस्तरइति
एवमात्मनिलयस्थैर्येमनसितदनुसंधा
नशून्यस्यततः किंस्यादित्यतआह ॥ प्रशां
तमनसंह्येनंयोगिनंसुखमुत्तमम् उपैतिशां
तरजसंब्रह्मभूतमकल्मषम् ॥ हिरवपार
णप्रकर्षेणशांतिसंस्कारस्याप्यभावेनशांतिं
हेतिपंचकशून्यंमनोयस्यतंप्रशांतमन
समेवंसंतमेनंयथोक्तसमाध्यनुशीलनप
रंयोगिनंकर्मभूतमुत्तमंसुखमलौकिक
आनंदःस्वयमेवोपैत्यात्मत्वेनआप्नोति एव
एवमुक्तोयोगः अतचोत्तमसुखस्योपाय
नैसातंत्रेणोविवक्षयायोगिनस्ताक्रिया
प्याप्यताविवक्षयाचैकालिकानंदरूप
स्यरसास्वादस्यनिरासः एषैवावस्थाश्रीम

गी॰टी॰
८१

81

सुजिद्धहारकेनिरुक्तानाहमस्मिनचान्योस्ति
ध्येयंचात्रनविद्यते आनंदपदसंलीनंमनः
समरसीगतमिति एवंसमाधिसिद्धुनेतस्मे
वनिरायासेनब्रह्मभावस्यभावितयाभूतमि
वमन्यमानोभगवान्विशेषणान्याह समाध्य
नुशीलनेनशांतंनिवृत्तंरजोबहिर्मुखताप्रवृ
त्तिहेतुर्गुणोयस्यतमतएवब्रह्मभूतंब्रह्मत्व
प्राप्तमतएवाकल्मषंप्रक्षीणधर्माधर्मरूपक
र्माणम् एतदेवस्फुटंप्रतिपादयति ॥ युंज
न्नेवंसदात्मानंयोगीविगतकल्मषः सुखेन
ब्रह्मसंस्पर्शमत्यंतंसुखमश्नुते ॥ एवंसक
लप्रभवान्कामान्त्यक्त्वाउक्तक्रमेणसदाप्र
त्यहंनियतेषुप्रातरादिसमयेषुचसर्वा
स्ववस्थासुपश्यञ्छृण्वन्नित्यादिष्वात्मानं
युंजन्समादधानोयोगीअतएवविगतक
ल्मषःसंसारहेतुधर्माधर्मरहितःसुखेना
सनप्रत्याहारधारणादिक्लेशाभावादना
यासेनब्रह्मसंस्पर्शंकस्यचिद्व्यापनेनाव
यवसंघट्टमश्नुतेप्राप्नोति किमत्यंतंसु
खंपरिच्छेदातिक्रांतमानन्दरूपम् यदुक्तं

श्रीस्वच्छन्दे पाशावलोकनं त्यक्त्वा स्वरू
पालोकनेहि यत् आत्मव्याप्तिर्भवत्येषाशि
वव्याप्तिस्ततोन्यथा सर्वज्ञादिगुणा येषां
व्यापकान्भावयेद्यदि शिवव्याप्तिर्भवेदेषा
चैतन्यहेतुत्वादि पाणीति उक्तं सर्वप्रशान्तेम
नसिआविर्भूतस्योत्तमसुखस्य समाधिका
ले देहेप्यवस्थानादेशतः कालतश्चात्यविच्छि
न्नतामित्येतेन्येनामित्युक्तात्मसुखोदेतद्य
वच्छिन्नम् ब्रह्मणोप्याकाशस्येवनिरंश
स्यापिमायाकल्पितमवयवद्वयं चेतनव
र्गोजडवर्गश्चेति तत्र चेतनवर्गव्याप्त्यापर
मयोगित्वं जडवर्गस्यापिव्याप्त्यासात्ताद्ध
स्तनयाजीवन्मुक्तत्वमेवतदुक्तम् देहादि
ष्वचेत्यमानेष्वपि चिदैकात्म्यप्रतिपत्तिदा
र्ढ्यं जीवन्मुक्तिरिति एवं सर्वदासिद्धसमा
धेः कर्मयोगिनश्चेतनवर्गव्याप्तिलक्षणं
ब्रह्मसंस्पर्शमाहवतभिः ॥ सर्वभूतस्थ
मात्मानं सर्वभूतानि चात्मनि ईक्षते योग
युक्तात्मा सर्वत्र समदर्शनः ॥ योगेनय
त्रोपरमतेचित्तमित्याद्युक्तलक्षणेनस्

क्षेमेन युक्तात्मा वहित स्वभावो एव सर्वत्र भू
तमात्रे समं निर्विशेषं ब्रह्मैव पश्यतीति स
मदर्शनः स आत्मानं मद्रूपं चिन्मात्रैकर
सं सर्वेषु भूतेषु परस्परं भिन्नेभिन्नेषु ब्रह्मा
दिस्थावरांतेषु तथात्मस्वरूपे स्वात्मनि सर्वा
णि भूतानीतरेतरभेदेन साक्षात्करोति सर्व
त्र चेतनवर्गे स्वात्माभेदमेव पश्यतीत्यर्थः
सर्वेषु भूतेष्वात्मानं अहंकर्तयानुप्रविशं
तं भावयेत् आत्मनि च प्राप्त्यात्मज्ञानद्वारे
ण सर्वाणि भूतान्येकीकुर्यादेतत्सर्वसमद
र्शनत्वं जायते इति अथ सिद्धसमाधेः सका
शाद्ब्रह्मभूतस्य विशेषमाह ॥ यो मां पश्य
ति सर्वत्र सर्वं च मयि पश्यति तस्याहं न प्र
णश्यामि स च मे न प्रणश्यति ॥ यो योगी
सर्वत्र भूतमात्रे मामुक्तलक्षणमद्वैतस्वरू
पमात्मानं पश्यति संवेदयति तथा सर्वं
च प्राणिजातं मयि पश्यति तस्याहं न प्रणश्या
मिमित योगिन इवादृश्यो न भवामि स्वत्व
ध्यानाभावात् स च ममेश्वरस्यादृश्यो न भ
वति स्वरूपभूतत्वात् नचैवं वियोवियिकिं

करोयोगभ्रष्टोस्मादित्याह ॥ सर्वभूतस्थि
तंयोमांभजत्येकत्वमास्थितः सर्वथावर्त
मानोपिसयोगीमयिवर्तते ॥ सर्वेषुभूते
मामभेदेनयोभजतेसयोगीसर्वथाकर्म
त्यागेनवर्तमानोपि मय्येववर्ततेनतभ्र
श्यतीत्यर्थः किंच ॥ आत्मौपम्येनसर्वत्र
समंपश्यतियोर्जुन सुखंवायदिवादुःखं
सयोगीपरमोमतः ॥ योयोगीसर्वत्रप्राणि
जातेसुखंदुःखंवासंवाकंवित्याणिधर्म
मात्मौपम्येनात्मतुल्यतयास्वानुभववदि
त्यर्थः समंनिर्विशेषंकिंचिन्मात्रमपिनवि
पर्यस्तंपश्यतिसाक्षात्करोति सयोगीस
र्वयोगिषुमध्येश्रेष्ठोमतः एवमस्यस्वरूप
मेतदनूदितंनपुनरेवोश्वोविधिः तदुक्तं
कुलार्णवे जनःस्वदेहकंडूतिंविजाना
तियथातथा परंब्रह्मस्वरूपेचवेत्तिविश्व
विचेष्टितमिति योगित्वनिर्देशेनास्याहेत
ल्लक्षणज्ञानिसकाशाद्व्यतिरेकउक्तः एवं
सर्वत्रसमतयासुखादिसंवेदनरूपस्य
योगस्यानन्तभूतत्वादसंभाव्यतोमन्यमा

नोऽर्जुनउवाच ॥ योयंयोगस्त्वयाप्रोक्तः
साम्येनमधुसूदन एतस्याहंनपश्यामि
चंचलत्वात्स्थितिंस्थिराम् ॥ योयमितिप
रोक्षप्रत्यक्षवाचकाभ्यामेवसूच्यते भवद
भिहितानेनरोधायपरम्परयास्फुटंप्रत्यक्ष
निर्दिश्यमानत्वाभावात्परोक्षतायमागतोयो
यंयोगःसाम्येनसर्वत्रात्मतुल्यतयासर्वा
यत्रुभवद्रूपेणत्वयासर्वज्ञेनप्रोक्तःएत
स्ययोगस्यमनसःचंचलतयास्थिरांदीर्घ
कालानुवर्त्तिनींस्थितिंनपश्यामिनतर्क
यामि कुतइत्यतआह ॥ चंचलंहिमनः
कृष्णप्रमाथिबलवद्दृढम् तस्याहंनिग्र
हंमन्येवायोरिवसुदुष्करम् ॥ हेकृष्णय
स्मात्तस्मादयंमनःप्रकृतिचपलमतएव
प्रमाथिप्रमथनशीलंक्षुभ्यायकंबलव
दुर्वारमतएवदृढंविषयवासनानुविद्ध
तयादुर्भेदंअतोयथाकाशेदोधूयमान
स्यवायोःकुंभादिषुनिरोधनमशक्यंतथा
तस्यमनसोपिनिग्रहंनिरोधंदुष्करंसर्व
थाकर्त्तुमशक्यंमन्ये अथैतदभ्युपगम

सुदुष्करं ॥ श्रीभगवानुवाच ॥ असंशयं टि.गि
महाबाहो मनो दुर्निग्रहं चलम् अभ्यासे ४२
नतु कौंतेय वैराग्येण च गृह्यते ॥ हे महा
बाहो मनश्चलमतएव दुर्निग्रहं दुःखेन
सर्ववृत्तिशून्यतया निरोद्धुं शक्यते इत्यत्र
नास्ति संशयः किंत्वेतन्मनोऽभ्यासेन शनैः
शनैरित्याद्युक्तया परमात्माकारप्रत्ययाह
त्या वैराग्येण विषयवैतृष्ण्येन च गृह्यते
सर्ववृत्तिशून्यं क्रियते अभ्यासेन लयप्र
तिबंधैराग्येण च विक्षेपप्रतिबंधादुपर
शांतिकं सत्परमात्माकारतया परिणतं भ
वतीत्यर्थः तदुक्तम् अभ्यासवैराग्याभ्यां
तन्निरोध इति च सूत्रकृद्भिरुक्तं चात्र भवता
भाष्यकृता उभयाधीनश्चित्तवृत्तिनिरोध
इति किंच ॥ असंयतात्मना योगो दु
ष्प्राप इति मे मतिः वश्यात्मना तु यतता
शक्योऽवाप्तुमुपायतः ॥ अभ्यासवैराग्या
भ्यां न संयतः धारणाध्यानसमाधिविष
यीकृत आत्मा येनांतःकरणं येन तेन दु
र्वेणांवं योगो समदर्शनलक्षणः दुष्प्रा

योदुर्लभः तदवधारणेवश्यात्मनाविधेयांतः
करणेनवैराग्यवतेत्यर्थः यतताभ्यासेनैवाने
नोपायेनवशीकर्तुंशक्यः ननुध्यानयोगेनल
ब्धेनयत्नसमाधिरपिबुद्धियोगादारभ्यात्मनो
नुभूतनयाश्रद्धात्मशक्तिप्रदमहैतलत्त
णांज्ञानोत्कर्षमप्राप्तोजन्मप्रदसंसारासक्ते
रभावाच्चकांगतिंप्राप्स्यतीतिसंदिहानोर्ज्जु
नउवाच ॥ अयतिःश्रद्धयोपेतोयोगाच्च
लितमानसः अप्राप्ययोगसंसिद्धिंकांगतिं
कृष्णगच्छति ॥ अयतिरल्पयत्नः यथाय
थंसमाधानरूपपरमात्माकारप्रत्ययावृत्ति
रूपाभ्यासरहितः तथाश्रद्धयोपेतः प्रामात
योगाद्बुद्धियोगादेर्वृत्त्येसमाधिरूपाभिव्यो
माश्चलितंच्युतंभ्रान्तिंचमानसंयस्यसः
योगस्यसंसिद्धिमहैतरूपांज्ञानयारामप्राप
प्यकृष्णोऽहंकृष्णदेवकृष्णस्यकांगतिंसुग
तिंदुर्गतिंवाप्राप्नोति अत्रविकल्पोत्तरमा
ह ॥ कच्चिन्नोभयविभ्रष्टश्छिन्नाभ्रमिवन
श्यति अप्रतिष्ठोमहाबाहोविमूढोब्रह्म
णःपथि ॥ कच्चिदितिकामाभिलाषप्रश्ने

हेमहाबाहो उभयस्मात्संसारमार्गाद्विभ्र
ष्टश्च्युतः अनासक्ततया वासनानादानात्
ज्ञानमार्गाच्च्युतोधारानधिरोहात् कश्चि
दपिनामनन पश्यति आत्यंतिकमभावं
प्राप्नोति यतः संसारानासक्ततया प्रतिष्ठ
निरवलम्बः तथा निरुपाधिकस्य ब्रह्मण
प्राप्तिज्ञानमार्गे विमूढेन सहप्रवृत्तः यथा
पूर्वस्मान्मेघाच्छिन्नउत्तरंमेघंचाप्राप्तोमेघ
खंडोनश्यति तद्वत् त्वमेव सर्वज्ञोभगवानेता
दृशसन्देहनिवर्तकोनान्यइत्याह ॥ ए
तन्मेसंशयंकृष्णछेत्तुमर्हस्यशेषतः त्वद
न्यः संशयस्यास्यछेत्तानह्युपपद्यते ॥ त्वत्तः
सर्वसंसारिगतिवेदिनः सर्वज्ञादन्योस्यसंश
यस्यछेत्तानिवर्तकोनोपपद्यतेनसंभाव्य
ते तदुक्तम् उत्पत्तिंचविनाशंचभूतानामा
गतिंगतिम् वेत्तिविद्यामविद्यांचसवाच्यो
भगवानिति अनंतरंश्रीभगवानुवाच ॥
पार्थनैवेहनामुत्रविनाशस्तस्यविद्यते
नहिकल्याणकृत्कश्चिद्दुर्गतिंतातगच्छ
ति ॥ हेपार्थइहलोकेसंसारेपरत्रलोकेस्व

गोदीवासनत्वस्ययोगभ्रष्टस्यमारणानांसक्त
तयाविरक्तत्वात्मसक्तोयो विनाशमाप्स्यति
कोभावः प्रकृतिलयइतियावत्तमनिविद्यते
तदुक्तं वैराग्यात्प्रकृतिलयइतिइत्यंतिमप्रश्न
स्योत्तरमभावव्याहत्यर्थंपूर्वमेवोक्तम् नतु
मास्त्वभावः सुगतिर्दुर्गतिर्वापरन्त्यतमागतिःस्या
देवेत्यतआह नहीति हिरवधारणेनातेति
लोकरीत्यापलायनंबोधयतिकश्चिदपिशु
भकारीदुर्गतिंसर्वस्माद्धीनजन्मप्राप्तिंदेहपा
तादूर्ध्वंनैवप्राप्नोति अयंचशुभकारीश्रद्धया
योगप्रवृत्तत्वात् तदुक्तंकुलार्णवे ध्यायतः
क्षणमात्रंवाश्रद्धयापरमेश्वरः यद्भवेत्सुम
हत्पुण्यंतस्यांतेनैवगण्यते शिवोस्म्यहम
स्मीतियःकुर्यादात्मचिंतनम् तत्सर्वंपात
कंहन्यात्तमःसूर्योदयेयथा ब्रह्मकृततप
स्तीर्थसलिलेसर्वापिदत्तावनिर्यज्ञानांचकृतं
सहस्रमखिलादेवाश्चसंपूजिताःसंचितर
स्त्रैलोक्यसस्योप्यतोयस्यब्रह्मविचारणेक्ष
णमपिस्थैर्यंमनोगच्छतीति तर्हिक्वगच्छ
तीत्यपेक्षायामाह ॥ प्राप्यपुण्यकृतांलोका

उषित्वा शाश्वतीः समाः शुचीनां श्रीमतां गे
हे योगभ्रष्टोभिजायते ॥ पुण्यकृतां यज्ञदा
नतपआदिशुभकारिणां लोकांल्लभकर्मोचि
तभोगाधिकरणभुवनानि प्राप्यतत्र च शाश्व
तीः समाः सहस्रसंख्याकान्संवत्सरानुषित्वात
स्मिंवाससुखमनुभूय ततः शुचीनां शुद्धाभि
जनकर्मणां श्रीमतां लक्ष्मीवतां महाराजच
क्रवर्तिनां गेहे जातशत्रुजनकादिवद्योग
भ्रष्टोभिजायते जन्म लभते तदुक्तं योगवासि
ष्ठे योगभूमिकयोत्क्रान्तजीवितस्य शरीरिणः
भूमिकांशानुसारेण क्षीयते पूर्वदुष्कृतम्
ततः कतिपये काले शेषदुष्कृतकर्मणाम्
शम्भासस्कृतभोगाय याति पुण्यवदास्पदम्
योगभूमिगता ये ये म्रियन्ते पुरुषोत्तमाः ते
क्षीणदुष्कृता मत्तारमन्ते स्वरसद्मविति प
वेमल्पकालाभ्यस्तयोगभ्रंशे तु पतन्तमाह
॥ अथवा योगिनामेव कुले भवति धीमतां
एतद्धि दुर्लभतरं लोके जन्म यदीदृशम् ॥
योगिनां योगनिष्ठानां दरिद्राणां धीमतां वि
द्यावतां कुले गेहे भवति जायते शुकादिवत्

एतज्जन्मलोकेति हियस्मात् ईदृशंयज्जन्म एत
द्धिलोकेदुर्लभादपिदुर्लभम् श्रीमतांगेहेज
न्मदुर्लभम् एतादृशजन्मद्वयस्यदुर्लभत्व
कुतोऽत्राह ॥ तत्रतंबुद्धिसंयोगंलभतेपौ
र्वदेहिकम् यततेचततोभूयः संसिद्धौकुरु
नंदनः ॥ तत्रद्विप्रकारेजन्मनिपूर्वदेहेभवं
पौर्वदेहिकम् तेनतादृशमेवसंस्कारात्मना
स्थितंबुद्धिसंयोगंतुआत्मबोधेनसंयोगंसं
बंधंलभते ततोबोधलाभानंतरेसंसिद्धौ
ज्ञानोत्कर्षशास्त्रार्थेभूयोधिकंपुनरपिवाय
ततेप्रयत्नंकरोतिपरमात्माकारसमाधान
मावर्तते इत्यर्थः तदुक्तं तस्यचपरमार्थ
मयींधारामगतस्यमध्यविश्रांतेः तस्यद
लाभोत्सुकचेतसोपिमरणंकदाचित्स्यात्
योगभ्रष्टःप्रागेवकथितोसौचित्तभोगभुव
नपतिः विश्रांतिस्थानवशाद्भवाजन्मांतरे
शिवीभवतीति तत्रहेतुः ॥ पूर्वाभ्यासेन
तेनैवह्रियतेह्यवशोपिसः जिज्ञासुरपियो
गस्यशब्दब्रह्मातिवर्तते ॥ कुतश्चिदंत
रायादवशोप्यनिच्छन्नपिसन् तेनैवतादृ

शेनैव मनागप्यनुष्ठितेन पूर्वाभ्यासेन सं
स्कारात्मना स्थितेन पूर्वदेहकृताभ्यासेना
वजन्मन्यभिव्यक्तेन संयोगभ्रष्टोक्रियते
आत्मसात्क्रियते नतु कृतोस्य योगाभ्यास
स्येह शंबलवत्त्वं यदन्तरायसद्भावेपि क्रिय
ते इत्यतोस्य प्रभावमाह जिज्ञासुरपि यो
गस्य जिज्ञासुरपि योगस्वरूपं ज्ञातुकामोपि
शब्दब्रह्म वेदमस्योन्तरायभूतकर्मणोक्त
वेदप्रतिपादकर्माभिवर्तते निक्रामति यो
गोन्तरायभूतकर्मपरवशो न भवतीत्यर्थः
किमुत प्राप्तयोगः एवं मन्दप्रयत्नोपि योगी
विघ्नानुपमर्द्याभ्यासक्रमेण परांगतिं प्रा
प्नोतियत्तु ॥ प्रयत्नाद्यतमानस्तु योगी सं
शुद्धकिल्बिषः अनेकजन्मसंसिद्धस्ततो
याति परांगतिम् ॥ तद्व्यतिरेके यस्तु योगी प्र
यत्नादुत्तरमधिकं यतमानः परमात्मसमा
धानमावर्तयमानो न एव संशुद्धकिल्बिषो
विगतकर्मबंधनोनेकजन्मसंसिद्धोनेके
ज्जन्मसूपचितेन योगेन संसिद्धः सम्य
ग्देहतलक्षणाज्ञानोत्कर्षप्राप्तः सन् ततः

87

संसिद्धिनन्तरमेव परांगतिं मोक्षाख्यां प्राप्नो
तिन पुनरभ्यासक्रममपेक्षत इत्यर्थः तदुक्तं
यथाग्निपोश्रंज्वलनोहूतंसछेत्यप्रयाया
च्छनकैर्नसंशयः अज्ञानपंकेनतथानिरस्त
कालेनकैवल्यमुपैतिदीक्षीति अथयोगि
नंप्रशंसति ॥ तपस्विभ्योधिकोयोगीज्ञा
निभ्योपिमतोधिकः कर्मिभ्यश्चाधिकोयो
गीतस्माद्योगीभवार्जुन ॥ तपस्विभ्यः कृ
च्छ्रचान्द्रायणादितपोनिष्ठेभ्योज्ञानिभ्यः
परोक्षज्ञानेशास्त्रज्ञानवद्भ्योपिकर्मिभ्यइ
ष्टापूर्तकारिभ्योपिपरमात्मनासंयतस्ययो
जनंयोगः इतियोगशब्दस्यमुख्योव्यापारः
तदुक्तंकुलार्णवे ऐक्यंजीवात्मनोराहुर्यो
गंयोगविशारदाः इति अस्यचबुद्धियोगादौ
गोण्यात्मस्यप्रयोगः सविशेतस्यातियोगी
अनन्तफलत्वादपरोक्षज्ञानवत्वात्मोक्षा
र्हत्वाच्चश्रेष्ठोमतस्तस्मात्त्वंयोगीआत्मस्थ
प्रसक्तोभवेत्यर्थः योगिष्वपिमध्येविशेषो
स्तीत्याह ॥ योगिनामपिसर्वेषांमद्गतेनां
तरात्मना श्रद्धावान्भजतेयोमांसमेयुक्त

तमो मतः ॥ परमात्मा देवज्ञस्य योजनं
योग इत्युक्तम् स चाधिकारिभूमिकाभे
देन षोढा तत्र प्रथम बुद्धियोगः कर्मस्वक्रि
यमाणेष्वप्यात्मबोधे समाधानम् द्वितीयः
कर्मयोगस्त्वारुरुक्षा विषयः कर्मस्वाक्रिय
माणेष्वप्यात्मनि समाहितत्वम् तृतीयो
ध्यानयोगः सर्वाश्चित्तवृत्तीर्निरुध्यात्मन्ये
वैकतानता चतुर्थो भक्त्यो योगः आनन्द
प्रादुर्भावपूर्वः सं परमात्मना समापत्तिः स
माधिरूपः पंचमो ज्ञानयोगो यत्राद्वैतं प्रति
भासते स च द्विविधश्चेतनवर्धव्याप्त्या चेतन
व्याप्त्या च षष्ठो भक्तियोग ईश्वरं भजताश्चि
त्यस्यात्मनि समाहितत्वम् कर्मसंन्यासयो
गस्य विकल्पानामभावेन शबलतयाद्व
एकल्पाविषयस्य कर्मयोगेन भावः एवं
सर्वेषां योगिनां योगभूमिकानिष्ठानाम
ध्ये यो योगी श्रद्धावाईश्वराप्तिविषयकः स
न् ननु केवलेऽवेश्वरमपलपञ्चरूपमात्र
पर्यवसितः मयि प्रत्यगात्मनि स्थितेनान्त
रात्मना मनसा मामीश्वरं भजते प्रमातिश

यास्यदंकुरुते सयोगिषुमध्ये परमः श्रे
ष्ठ इतिमतोजीवन्मुक्तिपदभाजनत्वात् त
दुक्तं समाधिसिद्धिरीश्वरप्रणिधानादिति
क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुष
विशेष ईश्वर इति च सेश्वरस्य ज्ञानस्य स
र्वप्राधान्यमुक्तम् यत्सर्वेश्रुतिभिः स्तुतं च
भवद्भक्त्यमतात्सारादेयस्य स्यात्परापिया
दशासामाश्रुतिसामिमांसा च स्यैव सूक्ते
ति एवमेतावता ग्रन्थेनेतत्फलितम् सां
ख्येन विना बुद्धियोगो न सिध्यति बुद्धियोगं
विना कर्मयोगो न सिध्यत्येवं तं विना ध्यान
योगं स्तं विना अभ्यासयोगस्तं विना ज्ञानयोगः
भक्तियोगस्तु सर्वत्र कृतपद इति सर्वस्य
कारणत्वमुत्तरस्य च नान्तरीयकत्वं द्रष्टव्य
मिति अत एव योगाभ्यासिकामे देवशैवैः
सत्प्रमाणारोध्यवस्थापिताः तदुक्तम् म
न्त्रं मंत्रेशमंत्रेशमंत्राः शिवपरोगमाः श्री
कण्ठोसकलश्चेति शिवस्यैता विभूतयः
ति चित्तवृत्तिनिरोधोपकारणं यः समाध
ये सवेज्ञानयोगं तं वन्दे नित्यं समाहिते

इति श्रीभगवद्गीताटीकायां तत्त्वप्रकाशि
काख्यायां राजानकलक्ष्मीरामविरचितायां
मात्मसंयोगो नाम षष्ठोऽध्यायः ६ ॥ ॥
एवं प्रथमाध्यायषट्केन त्वंपदलक्ष्यस्य यो
गप्रकारं बोधयन्नभिधायप्राक्प्रतिपादित
प्राप्यं तत्पदार्थं तया ज्ञेयमैश्वर्यरूपं भजनी
यजीवन्मुक्तिपदात्मये मध्यमाध्यायषट्के
न विवक्षुः श्रीभगवानुवाच ॥ मय्यासक्त
मनाः पार्थ योगं युंजन्मदाश्रयः असंशयं
समग्रं मां यथा ज्ञास्यसि तच्छृणु ॥ मयि
प्रत्यगात्मन्यासक्तं ध्यानेसम्यङ्निविष्टंम
नो मननात्मकं यस्य सः तथा योगमुख्यं यो
गं समाधिरूपं युंजन्नभ्यस्यंस्तथा मदाश्र
यः सन् अहमीश्वर एवाश्रयः शरणं यस्य
स मत्तो मां समाश्रित इत्यर्थः सन्देहरहितं य
था ज्ञास्यसि सर्वात्मतया प्रत्यभिजानासि त
दिदानीं वक्ष्यमाणं शृणु अथ वक्ष्यमाणं ज्ञा
नं स्तौति ॥ ज्ञानं तेऽहं सविज्ञानमिदं वक्ष्या
म्यशेषतः यज्ज्ञात्वा नेह भूयोऽन्यज्ज्ञातव्यमव
शिष्यते ॥ ज्ञानं शास्त्रमेतल्लक्षणं स्वरू

विद्याख्यंतदुक्तंसमानाधिकरण्ये साहि
धार्यमिदंद्वयोः प्रमापरत्वेभावानामनात्म
त्वेनभासनात् परत्वाहंतेयाच्छादितत्वाप
रदशाहिमेति सविज्ञानंसाक्षात्कारसहि
तमिदंप्रकृत्यमानमशेषतः साकल्येन
तेतुभ्यमहंपरमाप्तोवक्ष्यामि यज्ज्ञानेनज्ञाता
प्रतिपद्यमानात्कृत्स्नेश्रेयोमार्गेपुनर्बो
ध्यं वस्त्वन्तरमवशिष्टंनभवतियदव
गमादिदंतिवेद्यः कृतार्थोभविष्यसीत्यर्थः
तत्त्वज्ञानंपरमरहस्यत्वान्नसुलभंयतः ॥
मनुष्याणांसहस्रेषुकश्चिद्यततिसिद्धये
यततामपिसिद्धानांकश्चिन्मांवेत्तितत्त्वतः
॥ तत्रप्रकृष्टपुण्यवशेनसुदुर्लभमनु
ष्यजन्मभाजांसहस्रेषुमध्येकश्चिदेवल
ब्धात्मबोधःसिद्धयेबोधोत्कर्षाययतेतनस
र्वेदात्मसमाधानमवर्तते यततांसविम
र्शतामपितथासिद्धानांज्ञानोत्कर्षप्राप्ता
नांसहस्रेषुमध्येकश्चिल्लोकोत्तरोमामी
श्वरंतत्त्वतोयथावद्विभूतिवैलक्षण्यादित्र
तंवैश्यात्मतयासंवेदयते तदेवेश्वरस्वरूपं

सर्वात्मकत्वेनपरिपूर्णमेवन्तागपिष्यन्यलो
तमाह ॥ भूमिरापोनलोवायुः खंमनोबु
द्धिरेवच अहंकारइतीयंमेभिन्नाप्रकृतिर
ष्टधा ॥ भूम्यादिशब्दैः पंचतन्मात्राण्युच्यंते
शब्दस्पर्शरूपरसगंधाख्यानितन्मात्राणि
मनःसंकल्पात्मकंबुद्धिर्निश्चयात्मिकाहंका
रोभिमानरूपस्त्वेवंसूक्ष्मदेहात्मकपुर्यष्ट
कभेदेनममेश्वरस्यैकातदुक्तंतन्मात्रोदय
रूपेणमनोहंबुद्धिवृत्तिना पुर्यष्टकेनसंरु
द्धस्तदुक्तंप्रत्ययोद्भवमितिममेश्वरस्यकारण
देहशब्दवाच्यात्रिगुणसाम्यात्मिकाप्रकृतिःस्व
स्वरूपाच्छादनरूपामायाख्याशक्तिःतदुक्तं
मायांतुप्रकृतिंविद्यान्मायिनंतुमहेश्वरमि
ति तथातिरोधानकरीमायाभिधापुनरि
ति भिन्नाविभागंप्राप्ता तदुक्तं प्रकृतेर्महां
स्ततोहंकारस्तस्माद्गणश्चषोडशकःतस्मा
दपिषोडशकात्पंचभ्यःपंचभूतानीति इमा
मेवप्रकृतिंचतुर्विंशतितत्वात्मनाप्रपंच
यिष्यति महाभूतान्यहंकारइत्यादिना
दस्यादीनांसाक्षात्कारणंस्थूलदेहस्याणुप

लक्षणार्थम् भूतानि पंचविराजः स्थूलस्य
स्थूलदेहस्योपादानानि किंच ॥ अपरेयमि
तस्त्वन्यां प्रकृतिं विद्धि मे पराम् जीवभूतां
महाबाहो ययेदं धार्यते जगत् ॥ इयं संसा
रावस्थायां प्रत्यक्षेण परिदृश्यमानाष्टधोक्ता
प्रकृतिरपरा निकृष्टा वेदितव्या स्थूलत्वाज्जड
त्वात्परार्थत्वाच्च तुः पक्षान्तरे इतः पूर्वोक्तात्मे
नपरिणतायाः प्रकृतेः सकाशात्परमार्थतो
न्यां विलक्षणां तादात्म्यमनापन्नां चेतनयाप्र
कृष्टां ममेश्वरस्य प्रकृतिं स्वरूपविस्मरणमा
पन्नं स्वभावभूतां चिदंशं जीवभूतां तत्त्वतं
मामंजानीहि ननु स्वभावभूतस्य चिदंश
स्य कथं जीवित्वमाभिन्यत आह येन रूपं तद
नुप्रवेशद्वारेण धार्यते इदमहमिति स्वस्व
रूपविस्मरणद्वारेण तादात्म्याध्यासेन परामृ
श्यते तदुक्तं विद्रूपात्पंचाशिकायाम्
आत्मैकं तज्जडं जडमत्यन्तासमस्य योम
नुते मायाविमोहितात्माबोध्यः सोऽरणेर्भ
वीसहितिति तथा च श्रुति तदेव सृष्ट्वा त
दनुप्राविशदिति अनेन जीवेनात्मनानु

90

प्रविश्यनामरूपेव्याकरवाणीतिच श्रुतिर
पि कथंन्विदंसालदेहंसहतीस्यादितील
ण विदार्यमूर्द्धसीमानंप्रविष्टःसंसारत्यय
मिति यथेत्येकवचननिर्देनप्रकृतबहुत्वं
निरस्तम् तथाचश्रुतिः एकएवहिभूता
त्माभूतेभूतेव्यवस्थितः एकधाबहुधाचैव
दृश्यतेजलचंद्रवदिति एवंमायावभासि
तेपरापरभेदभिन्नेजडचेतनेद्वेप्रकृतीज
गत्कारणेइतिकार्यलिंगानुमानेनप्रमाण
यति ॥ एतद्योनीनिभूतानिसर्वाणीत्युप
धारय अहंकृत्स्नस्यजगतःप्रभवःप्रल
यस्तथा ॥ एतेपरापरेप्रकृतीयोनिरूप
ति कारणंयेषांतान्येतद्योनीनिसर्वाणिच
तुर्दशविधानिभूतानिस्थावरजंगमात्मका
निइत्युपधारयनिश्चयेनबुध्यस्वकार्यलिं
गेनसामान्यतोदृष्टेनानुमिनुहीत्यर्थः तत्र
जडाप्रकृतिर्देहरूपेणपरिणमतेचेतनातु
मदंशाभूताभोक्तृत्वेनदेहेषुप्रविश्यस्वक
र्मणातानिधारयतीत्यर्थः तेचमदीयेप्र
कृतीमत्तआविर्भूतेइतिस्वस्वामितामाह

अहमीति अहमीश्वरः कृत्स्नस्य समस्तप्रकृति
कस्य जगतश्चराचरभेदभिन्नस्य मायिमय
रासम्यायेन अभेदेन सततएव प्रभवः सेच्छ
याभेदेनआविर्भावकः अहमिदमितिप्रदं
नोद्रेकेण प्रलयस्तिरोभावकश्च इदमहमि
तिमहंतोद्रेकेण संकल्पमात्रोत्थया मायाख्ये
प्रकृतौ आभास्येते तन्निबंधनो च सर्गसंहारौ
अपेतोहमेवमूलकारणमित्यर्थः यथोक्तं
विज्ञानभैरवे जलस्येवोर्मयो वह्नेर्ज्वालाभं
गयः प्रभा रवेः समैव भैरवस्येत विश्वभंगयो
विनिर्गता इति विरूपाक्षपंचाशिकायाम
स्वांगे चिद्गगनात्मनि तुर्याद निमेषशक्ति
लहरीणाम् संभेदविभेदाभ्यां सृजति ध्वं
सयति चैवजगदिति यस्मादेवं तस्मात् ॥
मत्तः परतरं नान्यत्किंचिदस्ति धनंजयः
मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव ॥
मत्तः परमेश्वरात्सकाशादन्यद्वाद्यभ्युपग
तं प्रधानपरमाण्वादिपरतरं श्रेष्ठं जगतः
सृष्टिसंहारयोः स्वतंत्रं कारणं किंचिदपि
नास्ति तथाचोक्तम् कपिलप्रधानमाह

इत्यादीन्कणभुगस्यविश्वस्यकालेकारण
मेकेस्वभावमपरेजगुःकर्मेति ननुमात्व
परमाण्वादीनांनिमित्तकारणत्वंसमवा
यिकारणत्वंचास्तीत्यतआह मयीति म
यिअहंतावप्रत्ययेअहमिदंपरमेश्वरसर्व
मिदंइदंतावथार्थस्थूलरूपेणपरिणतंजग
त्प्रोतंइदअहमितिसमष्टतनतत्वाणुदन्याये
नमतन्तस्तनतंतुषुपटइवसमवेतम् अह
मेवसमवायिकारणमपीत्यर्थः उक्तंत्वाग
मरहस्ये येपीश्वरंव्यपदिशंतिनिमित्तहे
तंतेनर्पितास्तिलजलांजलिरीशतायैअ
स्यांगतोपनयनेनवशीकृतस्यकामीश्वर
स्थितिममीवतसंगिरंतेइति यथात्रैम
णिगणाअनुस्यूताःयथातंतरनवछियमा
णरूपेणप्रोतस्तीनतयाविशरणस्वभावम
णिगणास्यग्रंथिरूपतयाचास्थितएवमहं
सर्वत्र ननुकेनरूपेणतेनतवेश्वरस्यसम
वायिकारणत्वंनावगमीयतेइत्यपेक्षांकानि
त्यकारणान्याह ॥ रसोहमप्सुकौंतेयप्र
भास्मिशशिसूर्ययोः प्रणवःसर्ववेदेषु

गी॰टी॰
९२

92

शद्वः खे पौरुषं नृषु ॥ यद्रसस्तन्मात्रं तदहं रस
शद्वपरतया परिणमते तदहमेवेश्वरस्य
तः समवायिकारणमहमेवेत्येवं सर्वत्र वा
च्यम् तदुक्तं तन्मात्राण्यविशेषास्तेभ्यो भूता
नि पंचपंचभ्यः एतेस्मृताः विशेषाः शांता
घोराश्च मूढाश्चेति तथा तेजविषयोः श
शिसूर्ययोः प्रभास्मि तत्वं दुत्वादिरश्मिः प्र
काशस्तन्मात्रोऽस्मि सर्वेषु वेदेषु ब्रह्मणो
निःश्वासतयोत्कृष्टपवनभेदेषु तन्मूलं र
तः प्रणव ओंकारोंतरभ्युपगमरूपो ब्रह्म
संस्पर्शलक्षणोऽहम् खे चाकाशे शद्वस्तन्मा
त्रोऽस्मि जीवभेदेषु नृषु कराभिमानेषु हंका
रजीवितभूतं पौरुषं येन तेजसा पुरुषोऽह
मिति सार्वभौमं प्रतिपद्यते किंच ॥ पुण्यो
गंधः पृथिव्यां च तेजश्चास्मि विभावसौ
जीवनं सर्वभूतेषु तपश्चास्मि तपस्विषु ॥
पुण्यो विकृतो गंधो गंधतन्मात्रं पृथिव्याम
हम् विभावसावग्नौ तेजो रूपतन्मात्रम
स्मि सर्वेषु भूतेषु जीवनमंतःकरणत्रयस्य
प्राणधारणलक्षणसामान्यवृत्तिः यथा

भूतानांजीवसंज्ञासमुद्भवः सोहम् तदुक्तं
सामान्यकारणाह्वलिः प्राणाद्यावायवःपं
चेति तपस्विषुवानप्रस्थादिषुतपोमनः
संकल्पनिमित्तं द्वंद्वसहनरूपमहम् प
चेंद्रियदेवोभूम्यादीनांसूक्ष्मतन्मात्रादिरूप
तदहम् स्थूलंतुप्राकृतम् नतुप्राकृत
स्यस्थूलरूपस्यस्फुटतयाभासमानत्वात्क
थंनवसर्वोत्तमस्यतत्वप्रतीतिः स्यादित्यत
आह ॥ बीजंमांसर्वभूतानांविद्धिपार्थस
नातनम् ॥ सर्वेषांचराचरात्मकानांस्फु
टतयाप्राकृतत्वेनभासमानानांभूतानांबी
जंसूक्ष्मादिकारणंमामीश्वरंजानीहिस
नातनंनित्यंनतुप्रतिव्यक्तिविनश्यत्
नकेवलंजगत्स्थितीनामस्यैवाहंकारणंया
वदैश्वर्यलाभस्यापीत्याह ॥ बुद्धिर्बुद्धिम
तामस्मितेजस्तेजस्विनामहम् बलंबल
वतांचाहंकामरागविवर्जितम् धर्मावि
रुद्धोभूतेषुकामोस्मिभरतर्षभ ॥ बुद्धि
मतांप्रशांतत्वोपशालिनंबुद्धिर्वोपहृति
रहमेव तथातेजस्विनांमंत्रमहेश्वराणां

·कि·गी
६५

गी॰टी॰
९३

93

सदाशिवभूमिकारूढानामयमेव जडदेहा
प्रत्ययस्वभावचक्रस्यो मीलितमात्रवित
कल्पमवभासनं तदहम् बलवतामेवे
श्वराणामीश्वरभूमिकारूढानां यद्दुलेशवि
विकल्पनया भाववर्गपरामर्शनं तदहम्
कीदृशं कामरागविवर्जितम् कामोभि
लाषो रागश्चासक्तिस्ताभ्यां विशेषेणा निरव
शेषतया वर्जितम् जडमेकदेशास्तीवे
सानं प्रशान्तं तव बोधशक्तिरैश्वर्यमुच्यस्य
सदापरेषाम् प्रकाशितं प्रत्यापियोगरू
पा शक्तिर्बहिः स्थैर्यवती बलं सा उमत्रवा
स्यप्रसरात्त वीर्यं तेजस्त्वकाशानवभासयं
तो बोधस्यमेकैवतस्य शक्तिर्वाक्यावम
र्शात्मभवेदविरोधेति तथाभूतेषु कामइच्छा
संवित्मात्ररूपयस्या घटपटादिभिर्धर्मैर
वेनोस्ति विरोधः सोहम् इच्छादि सर्वत्र
भगवच्छक्तिनपात्रयायिनी न काचिद्विरु
ध्यते धर्मेस्ताभिः केर्वटपटादिभिर्भिद्य
ते इति तडपासकतयामुरूसंवित्स्वभा
वंतज्ज्ञानिनः उक्तं च शिवोपनिषदि इच्छा

यामथवाज्ञानेजातेचित्तंनिवेशयेदिति
जातेएवननवादप्रसङ्गेनइत्यर्थः एवंध्या
त्वानंत्यन्त्वायेपरस्परानुपघातकंत्रिवर्गं
सेवतेत्याशयेनआचष्टेतेमेसंप्रदायक्र
ममज्ञाननाभगवद्रूपस्येचव्याचष्टाण
नमस्कार्यएव एवंसर्वोत्तमस्मृतत्वन्मयवी
जभूतोसत्यपिस्फुटतयाप्राकृतत्वेनभा
समानस्यापिभावर्गस्यमदधीनैवसत्तत्या
ह ॥ येचैवसात्विकाभावाराजसास्ताम
साश्चये मत्तएवेतितान्विद्धिनत्वहंतेषु
तेमयि ॥ येचैवान्येसात्विकाभावाश्शा
दयः स्वभावाशमदमादयः राजसाभावा
श्चादयोहर्षदर्पादयश्चतामसाश्चालस्याद
यः शोकमोहादयश्चतान्सर्वान्मत्तएव
एतानितिविद्धिमदीयप्रकृतिगुणकार्य
त्वात् एवमपितेष्वहंवर्तेजीववत्तदधी
नोनभवामि तेतुमदायत्तास्सन्तितयाम
दधीनाः संतोमय्याधारेवर्त्तन्तेसत्तांलभं
ते नत्वहंतेषुते गुणादिसम्बन्धःनिःसंगत्वः
सामान्यसम्बन्धसंश्रयात् लब्धात्मलाभाःस

तेनंसर्वस्यापरिपंथिनः अप्यत्रदुधियस्ते
तेत्वास्थितिस्थगनोद्यताः पातयंतिदुरन्ता
रेघोरसंसारवर्त्मनिइति अतएवभगव
न्मयः सर्वंभगवद्भावेनसंवेद्यतेनत्वना
नाविधपदार्थविज्ञानानिष्ठोभगवत्तत्वंप्र
तिपद्यतेइतिसकलमानसापर्जकएवक
मः अनेनैवाशयेनवक्ष्यतेवासुदेवः सर्व
मितिज्ञानेनयोवहुजन्मोपभोगक्षपित
कर्मसमतासमनंतरमस्यप्यपरशक्ति
पातादृद्धीतांतःकरणोसौप्रतिपद्यतेभ
गवत्तत्वंसर्वंवासुदेवइतिद्रष्टासमहा
त्मासचदुर्लभइति एवंभूतत्वांपरमेश्व
रमयंजनः किमितिनजानातीत्यतआ
ह॥ त्रिभिर्गुणमयैर्भावैरेभिः सर्वमिदं
जगत् मोहितंनाभिजानातिमामेभ्यःप
रमव्ययम्॥ एभिः सात्विकादिभिस्त्रिभि
र्गुणमयैः सुखदुःखमोहादिपर्यवसाय
हत्रिभिर्गुणविकारैर्भवनधर्मकैः सर्वै
रेः पदार्थैरिदंजगत्सकलोजीवलोको
मोहितंस्वस्वभावप्रत्यवमर्शअवपाय

कृतया देहाद्यात्माध्यासमापादितं सत्
मामहंताप्रत्येयं ईश्वरं प्रत्यगात्मानं नाभि
जानाति स्वात्मतया न प्रत्यवमृशति ननु
सकलस्य भाववर्गस्यैवैवबीजभूतत्वा
त्समवायिकारणतयापतज्ज्ञानमेव तत्त्व
रूपज्ञानमित्याशंक्याह एभ्यः परं सर्वेभ्यो
भावेभ्यः परं व्यतिरिक्तं विलक्षणम् कुतइ
त्यत आह अव्ययम् स्वस्वरूपप्रच्युतिलक्षण
विकाररहितम् वेद्योहासतोमेपिवेदक
स्य स्फुटंभासमानत्वात् तदुक्तम् जाग्रदा
दिविभेदेपि तदभिन्ने प्रसर्पति निवर्तते
निजान्नैव स्वभावादुपलब्धृतः ननु स्फुटं
भासमानस्यापि तव कुतो नाविमृश्यतेत्य
त आह ॥ दैवी ह्येषा गुणमयी मम माया
दुरत्यया मामेव ये प्रपद्यन्ते मायामेतां तर
न्ति ते ॥ एषा परिदृश्यमाना गुणमयी स
त्त्वादिगुणविकारात्मिका रजनीवातिदृढ
त्वेन बन्धनहेतुः माया स्वस्वरूपमाच्छादया
सत्यमपि सत्यवदाभासयन्ती मदीया मे
दावभासप्राणा शक्तिः दैवी देवस्य क्रीडा

करस्यैषंदैवीममश्रीपरमेश्वरस्यमायावि
नःस्वभूताकीदृत्यर्थःकीदृशीदुरत्ययादुर
तिक्रमाःनतुयद्येवमेषानकेनचिदतिक्र
मितुंशक्यातर्हिसंसारस्यमातुपरमाह्या
यत्तुपदेशक्रमइत्यतआहमामेवेतिमा
मेवैकंपरमेश्वरंयेअव्यभिचारिणाभक्त्याप्र
पद्यंतेभजंते तएतांदुस्तरामपितरंति
मामीश्वरंजानंतीतिभावःसत्वादीनांवस्तु
तःसंविन्मात्रपरत्वेनातिरिक्ततायाम
पियत्तदातिरिक्तभावगमनंतद्देवगुणा
त्वंभोक्तृपारतंत्र्यंभोग्यत्वंतच्चभेदात्मकंरू
पंसंसारिभिरनिर्वाच्यतयानिरूक्तंतान्य
तिमायारूपमतोयेपरमार्थब्रह्मप्रकाश
विदस्तेतदनतिरिक्तंविश्वप्रपंचंतोगुणानां
सत्वादीनांगुणानांलक्षणाभेदावभासस्व
भावांमयामातितरंतीतिमामेवेत्येवकार
स्यायमाशयः येयथास्थितंभेदावभाससमा
त्रंविदुस्तेमायांनातिवर्तंते नतुकस्मा
त्वांसर्वःकश्चिन्नप्रपद्यतेइत्यतआह ॥
नमांदुष्कृतिनोमूढाःप्रपद्यंतेनराधमाः

मायया पहृतज्ञाना आसुरं भावमाश्रि
ताः ॥ नेरोष्ठपि मध्ये सत्वप्रधिकारिणिका
ये ये धमा निकृष्टास्ते मामीश्वरं न भजंते
अधमत्वे हेतुः मूढा अविवेकशून्यास्तत्र
न उद्धृतिनः पापेन सह नित्ययोगिनः अ
तो मायया पहृतं प्रज्ञावितं शास्त्राचार्योप
देशजातमपि ज्ञानं परमार्थबोधो येषां ते
अत एव दंभो दर्पोभिमानश्चेत्यादिना वक्ष्य
माणमासुरं भावमाश्रिताः संतो न भजंते ते
च सुकृतेनानेन एन चतुर्विधा इत्याह ॥
चतुर्विधा भजंते मां जनाः सुकृतिनोर्जुन
आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ॥
ये शर्वजन्म सुकृतपुण्या जनास्ते मां भजंते
ये तु मां भजंते सुकृतिन इति वा ते चच
त्वारः आर्तो रोगाद्यभिभूतो मत्वे भंगेन
कपितैर्देवयजनादीन जनो यथा स यदि
सर्वकृतपुण्यस्तर्हि मां भजते अन्यथा
लरदेवता भजमानः संसरति एवमु
मात्रापि द्रष्टव्यम् जिज्ञासुराठेनलक्ष
णज्ञानार्थी मुमुक्षुरर्थार्थी यामुत्रभुक्तेः

भ.गी. ५५

96

अर्थार्थी अत्र वा परत्र वा भोगसाधनभूतार्थ
लिप्सुर्यथा विभीषणध्रुवादिः ज्ञानी भगवत्त
त्वसाक्षात्कारवान्यथा नारदशुकादिः तेषां
मध्ये ज्ञानी श्रेष्ठ इत्याह ॥ तेषां ज्ञानी नित्य
युक्त एकभक्तिर्विशिष्यते प्रियो हि ज्ञानि
नोत्यर्थमहं स च मम प्रियः ॥ तेषामार्त्ता
दीनां मध्ये ज्ञानी यथोक्तज्ञानवान्विशिष्य
ते श्रेष्ठो भवति तत्र हेतवः नित्ययुक्तः नित्य
प्रत्यगात्मनि समाहितः तथैकभक्तिरेकस्मि
न्मयीश्वरे एव भक्तिरनुरक्तिर्यस्य सः ज्ञानिनो
देहाद्यभिमानाभावेन चित्तविक्षेपकाभा
वान्नित्ययुक्तत्वमेकान्तभक्तिश्च संभवति
नान्यस्य यतस्तस्य ज्ञानिनोऽहं प्रत्यगभिन्नः
परमात्मेश्वरोऽत्यर्थं प्रियो निरुपाधिप्रेमास्प
दं स च मम परमेश्वरस्य प्रियः ननु ज्ञानिन
एव प्रकृष्टत्वेसति आर्त्तादयः किं बहिष्कृता
एवेत्याह ॥ उदाराः सर्व एवैते ज्ञानी त्वा
त्मैव मे मतम् आस्थितः स हि युक्तात्मा मा
मेवानुत्तमां गतिम् ॥ एते सर्वे आर्त्तादय
स्त्रय उदारा उत्कृष्टा मोक्षभागिन एव यतो

मेक्रूपणेभ्यइयमार्तिनिवारणमर्थादि
चेतव्यपाणिपादोदरशरीरमवेभ्योधिक
तरंवात्मत्नेभ्योमार्गयंते अतस्तेउदारा
अपिज्ञान्यपेक्षयान्त्यनसत्तायतस्तेषां
तावत्यपिभेदोस्तिभगवानइदमहंमामि
लेषामीतिभेदस्यस्फुटप्रतिभासात् तव्य
तिरेकेज्ञानीतुनमोमेवाभेदेनालम्बतेइति
ततोमदनमितत्वएवस इतिममेवास्यमतं
निश्चयः हि यस्मात्तज्ज्ञानीयुक्तात्मायुक्तो
मदभिन्नआत्मास्वभावोयस्यसमावेषये
नतवन्यत्फलमनुत्तमांगतिंगंतव्यंपरमंफ
लंमामास्थितश्चाश्रितवान् मद्भिन्नमन्यत्फ
लेनमन्यतेइत्यर्थः ननुभवतानादयोर्थि
नेभ्यसकाशाज्ज्ञानिनोविशेषोजिज्ञासोः
सकाशात्तनयुक्तोज्ञानिप्रथमभूमिका
यिषानादित्यतआह ॥ बहूनांजन्मनामं
तेज्ञानवान्मांप्रपद्यते वासुदेवःसर्वमि
तिसमहात्मासुदुर्लभः॥ बहूनांजन्मना
मेपतारम्यशालिनांशरीरपरिग्रहाणामं
तेमोतापिष्ठानेचरमेजन्मनियतउत्तरंन

गी॰ टी॰ शरीरपरिग्रहस्तस्मिंजन्मन्यद्वैतलक्षणज्ञा
९० नवाञ्जीवन्मुक्तो मामीश्वरं प्रपद्यते सर्वात्म
भावेन प्राप्नोति आकाशादिवत् कथं वासु
देवः सर्वमिति सर्वत्र वसनात्सर्वस्य वा तत्र
वसनाद्वासुदेवः श्रीभगवानहं सर्वमिदं
चराचरम् भावजातमित्येवं यदुक्तं श्रीक
ण्ठां शिवाद्यवनिपर्यंतं भावाभावोपबृंहि
तम् सर्वं शिवमयं ध्यात्वा भूयो जन्म न चाप्नु
यादिति अनेन श्लोकेन प्रकृष्टब्रह्मविज्ञान
योगलक्षणं निर्दिष्टम् एवं वैश्वात्म्यमापन्न
स्य जीवन्मुक्तस्य प्राणा नोत्क्रामन्ति तथा च
श्रुतिः न तस्य प्राणा उत्क्रामन्ति अत्रैव समव
लीयन्ते इति न त्वलब्धबुद्धिरपि जिज्ञासुरेवं
मां प्रपद्यते तस्याद्वैतलक्षणज्ञानेच्छोरेव
सर्वथा भेदाविगलनात् इत्यतो जिज्ञासोः
सकाशात्तस्य वैशिष्ट्यं अतः स महात्मा महा
न्सर्वव्यापी आत्मा यस्य सोऽपरिच्छिन्नदृष्टिर्जी
वन्मुक्तः सर्वोत्कृष्टो न तत्समोऽन्योऽस्ति अधि
कस्तु नास्त्येव अतः सुदुर्लभः योगिष्वपि
मध्ये तादृशो महानुभावो लभ्यते न वेति

97

तदेवंप्रकामप्राप्तयेपरमेश्वरमेवभजंते
तेकामान्प्राप्यशनैर्मुच्यंतेइत्युक्तम् येतु
कामाभिभूताःक्षुद्रदेवताएवसेवंतेतेसंस
रंतीत्याह चतुर्भिः १९ ॥ कामैस्तैस्तैर्हृत
ज्ञानाःप्रपद्यंतेन्यदेवताः तंतंनियममा
स्थायप्रकृत्यानियताःस्वयम् ॥ येतुतैस्तैः
पुत्रयशादिविषयैःकामैरभिलाषैर्हृतज्ञा
नादूषितविवेकाःसंतस्तंतंमन्नदर्शनप्र
सिद्धंनियमंमितिकर्तव्यताविशेषरूपंमा
स्थायावलम्ब्यान्याआत्मनईश्वराभिन्नाहि
लक्षणादेवताःप्रपद्यंते यतःस्वकीययाप्र
कृत्यापूर्वाभ्यासवासनयानियतावशीकृ
ताः तत्रतेषांमध्ये २०॥ योयोयांयांतनुंभ
क्तःश्रद्धयार्चितुमिच्छति तस्यतस्याचलां
श्रद्धांतामेवविदधाम्यहम् ॥ योयोभक्तो
यांयांतनुंदेवतारूपांमदीयामेवमूर्तिंश्र
द्धयार्चितुमिच्छतिप्रवर्तते तस्यतस्यभ
क्तस्यतामेवमूर्तिविषयांश्रद्धामचलांदृ
ढांमहमंतर्यामीविदधामि किंच २१॥
सतयाश्रद्धयायुक्तस्याराधनमीहते

लभतेचततःकामान्मयैवविहितान्हिता
न्॥ सकामीतयामहत्त्वयाश्रद्धयायुक्त
स्तस्यदेवताविशेषस्याराधनमीहतेमनो
वाक्कायैश्चेष्टते अथवातस्यास्तेनाराध
नंपूजनंउपसर्गरहितोपिराधतिःपूजा
र्थः ततश्चाराधितादेवताविशेषात्तान्सं
कल्पितान्कामानीप्सितांल्लभंते हियतोम
यैवतद्देवतांतर्यामिणाविहितान्निर्मिता
न् अथवाहितानुकूलान् यद्यपितद्देवता
राधनंवस्तुतोमदाराधनमेवकिन्तु २२॥
अन्तवत्तुफलंतेषांतद्भवत्यल्पमेधसाम्
देवान्देवयजोयांतिमद्भक्तायांतिमामपि॥
तेषांतद्देवताभक्तानामल्पमेधसांपरिच्छि
न्नदृष्टीनांतन्महत्तमपिफलवंतवदनित्यं
भवतिनिजयैववासनयापरिमितीकृतत्वा
त् नतुमदाराधनजंफलम् तदुक्तं उज्झि
त्वात्मसमाधानंयेध्यायंत्यन्यदेवताः भित्तं
तेप्रिविनास्तेभिलितापिबुभुक्षिताइति
अन्यत्र उपेक्ष्यतनतीर्थयात्राजपादीनेवकु
र्वंतापिंडंसमुत्सृज्यकोलेल्हीतिन्यायमाप

नेदिति कृतएवं यतः देवयजस्तान्देवतो
पासकाजनादेवानंतवतोयांतिप्राप्नुवंति
मद्भक्तामामेश्वरस्यभक्तामामनाद्यंतंयांतिअ
पिशब्दादभीष्टान्कामानपियांति अतःसमा
नेपिसकामत्वेमद्भक्तानामन्यदेवताभक्तानां
चमहदन्तरम् तस्मात्साधूक्तमुदाराःसर्वए
वैतेइति ननुसमानेप्रयासेमहतिचफल
विशेषेसतिसर्वेपिकिमितिदेवतांतरंहि
त्वात्वामेवनभजंतेइतितत्राह २३ ॥ अव्य
क्तंव्यक्तिमापन्नंमन्यंतेमामबुद्धयः परंभाव
मजानंतोममाव्ययमनुत्तमम् ॥ अबुद्धयोः
परिछिन्नदेहादिनिष्ठबुद्धयोमन्दप्रज्ञाममे
श्वरस्याव्ययंस्वरूपादप्रच्युतंमनुत्तमसर्वोत्तमं
परंभावमुत्कृष्टंस्वभावमजानंतोत्यभि
जानंतोव्यक्तंप्रपंचातीतंसन्तंमाव्यक्तिंम
नुष्यमत्स्यादिभावंप्राप्तमन्यंते अतोमामी
श्वरमधिकारनिर्मितभौतिकविग्रहंदेवतां
तरंचसमंपश्यंतोमांनभजंतेप्रत्युतदेवतां
तरमेवभजंते तेषांस्वाज्ञानेहेतुमाह २४॥
नाहंप्रकाशःसर्वस्ययोगमायासमावृतः

99

मूढोयंनाभिजानातिलोकोमामजमव्य
यम् ॥ अहमीश्वरःसर्वस्यलोकस्यप्रकाशः
प्रकटश्चात्मतयाप्रत्यभिज्ञेयोनभवामि किं
तुमदज्ञानामेवयतोहंयोगमायासमावृ
तः योगोवैश्वरूप्येपिअद्वयचिन्मात्रस्वरूपा
वस्थानापरिच्युतिलक्षणोपेश्वरः समाधिर
थवायोगयुक्तिरघटमानघटनापटीयस्त्वं
तदुत्पादितायामायामत्स्वरूपान्यथाप्रति
पत्तिहेतुर्भेदप्रथारूपाशक्तिस्तयासमावृतो
व्यवहितःसन् अतएवमत्स्वरूपज्ञानमूढो
यंलोकोजमव्ययंनित्यत्वाज्जन्मविनाशरहि
तंमांनाभिजानाति आत्मत्वेननप्रत्यवमृशा
ति नत्वनवापियोगमायासमावृतत्वेज्ञान
शक्त्यावरणप्रसक्तिःस्यादित्याह २५ ॥ वेदा
हंसमतीतानिवर्तमानानिचार्जुन भविष्या
णिचभूतानिमांतुवेदनकश्चन ॥ अहमी
श्वरस्त्रिकालवर्तीनिसर्वाणिभूतानिस्थाव
रजंगमात्मकानिजानामि अतोनममज्ञा
नशक्त्यावृतत्वम् मायाश्रतत्वात्ममतस्याः
स्वाश्रयव्यामोहकत्वाभावात् यदुक्तम्

आश्रयत्वविषयत्वभागिनीनिर्विभागचि
तिरेवकेवलासर्वसिद्धतमसोहिपश्चिमोना
श्रयोभवतिनापिगोचरइति तुःपत्तांतरे
कश्चनकोपिमदनुग्रहभाजनंमद्भक्तंवि
नामामीश्वरंनवेदनजानाति मन्माया
मोहितत्वात् प्रसिद्धंहिलोकमायायाःस्वा
श्रयाधीनत्वमन्यव्यामोहकत्वंच नतुत्वां
कश्चिदपिकिमितिनवेदत्यतआह २७॥
इच्छाद्वेषसमुत्थेनद्वंद्वमोहेनभारत स
र्वभूतानिसंमोहंसर्वेयांतिपरंतप ॥
सर्वभूतानितावत्स्वस्वरूपापरिज्ञानान्मोहा
त्मकान्येवान्यथा भूतत्वापायः तानिस
र्गेस्थूलदेहोत्पत्तौसंमोहंसम्यक् गाढ
तमंविवेकभ्रंशंयांति केनइच्छेति स्थू
लदेहात्तुकलेइच्छातत्प्रातिकूलेचद्वेष
स्ताभ्यां समुत्थेनोद्भूतेनद्वंद्वमोहेनसुख
दुःखादीनामोहेनाहंसुखीअहंदुःखीत्या
दिनास्वात्मन्यध्यारोपाध्यासेन भूतोमांभ
गनीयमपिनभजंते कथंतर्हिचतुर्विधा
भजंतेमामित्याद्युक्तेतकेचनत्वांभजंते

इत्यतआह २७ ॥ येषांत्वंतगतंपापंजना
नांपुण्यकर्मणाम् तेद्वंद्वमोहनिर्मुक्ताभ
जंतेमांदृढव्रताः ॥ येषांसफलजन्मनां
तलोकविलक्षणानांपुण्यशुक्लरूपेणक
र्मयोगेनसत्वशुद्धिहेतुः कर्मयेषांतेषांज
नानांमतएवज्ञानप्रतिबन्धकपापमन्तं
गतंनष्टंतेद्वंद्वमोहेनयथोक्तेननिर्मुक्ताःनि
श्शेषेणत्यक्ताःदृढव्रताःस्थिरसंकल्पामा
मीश्वरंभजंते अथवैराग्यपूर्विकायाभक्तेः
पार्यंतिकमनुत्तमंकृतकृत्यताविद्यायाफ
लमाह २८ ॥ जरामरणमोक्षाय मामाश्रि
त्ययतंतिये तेब्रह्मतद्विदुःकृत्स्नमध्यात्मं
कर्मचाखिलम् ॥ येजरामरणरूपात्संसा
रदुःखान्निर्विण्णाः षडूर्मिकुलार्णवे व्याघ्री
वैतिजराचायुर्यातिभिन्नघटाम्बुवत् नि
घ्नन्तिरिपुवद्रोगास्तस्माच्छ्रेयःसमभ्यसेत्
संपदःस्वप्नसंकाशायौवनंकुसुमोपमम्
तडिच्चपलमायुष्यंकस्यस्याज्जानतोधृतिः
अपत्यंमेकलत्रंमेधनंमेबान्धवाश्चमे ल
पंतमितिमर्त्याजंहन्तिकालवृकोदरइति

तन्मोहाय तन्निरासायैव नत्वार्त्तिनिवारणा
यार्थास्तये वा मामीश्वरं भक्त्याश्रित्य भरवशी
कृत्य यतन्ति प्रत्यगात्माकारप्रत्ययावृत्तिं
सेवन्ते तेन निर्विशेषं कृत्स्नं पूर्णं ब्रह्मते वि
दुः प्रत्यभिजानंति अध्यात्मं च विदुरखिलं
तेषांतरसंस्थितसदाशिवत्वावशेषपशुकं क
र्म च विदुरिति जरामरणमोक्षाय येत्समैरेवं
विज्ञायते जीवन्मुक्तानां देहाभासस्य चिदा
नन्दैकरूपतया वलीपलितादिलक्षणज
रायाः अभावः तेषामेव कैवल्यं जिगमिषू
णामविद्याशेषस्य निःशेषप्रलये सत्यव
क्तेनात्रूपातिपातेन मरणाभावः यथाशु
कदेववामदेवादीनामिति एवं जीवन्मु
क्तानां वैष्णात्म्यमापन्नानां सममाध्याय प
र्यन्ते तारतम्येनोपचीयमाने हलनश्चक्राथ
विदेहमुक्तानां हलनश्चलनाध्याये विवत्तवी
जभूतं मन्त्रस्थानीयं श्लोकमाह २९ ॥ साधि
भूताधिदैवं मां साधियज्ञं च ये विदुः प्रया
णकालेपि च मां ते विदुर्युक्तचेतसः ॥
येमात्मानमेवंभूतं स्वस्थावस्थायां विदु

जानंतिकीदृशमधिभूतेनाधिदैवेनाधि
यज्ञेनचसहितंसंतमेवतत्पवद्युक्तचेत
सोनित्यमवहितांतःकरणाःप्रयाणका
लेदेहत्यागसमयेपिमांप्रत्यगात्मानंवि
दुःसाक्षात्कुर्वंतिविदेहमुक्ताभवंतीत्यर्थः
ननुयोगाद्भ्रश्यतीति अपिशब्दाज्जीवद्दशाया
मपि चोवधारणे अधिभूतादिशब्दानामर्थ
मनंतराध्यायेवक्ष्यति जीवन्मुक्तानयेवो
क्तदेहस्यसमये विदेकात्म्योपपत्तिंय
स्तेनोमिमक्तवत्सलम् ३०॥ इतिश्रीप्रका
शिकाख्यायांभगवद्गीताटीकायांतत्वप्र
काशिकाख्यायांराजानकलक्ष्मीरामविर
चितायांविज्ञानयोगोनामसप्तमोध्यायः
७॥ ॥ विदेहमुक्तिर्नोगाख्येसाद्धदी
श्वरसंश्रयात् मध्यनाड्याश्चर्थमीमांविदा
योत्क्रांतिशक्तिया स्वर्वाध्यायेतेउद्दिष्टानो
ब्रह्माध्यात्मादिपदार्थानालक्षणउपुत्सया
र्जुनउवाच॥ किंतद्ब्रह्मकिमध्यात्मंकिं
कर्मपुरुषोत्तम अधिभूतंचकिंप्रोक्तमधि
दैवंकिमुच्यते अधियज्ञःकथंकोत्रदेहे

स्मिन्मधुसूदन प्रयाणकाले च कथं ज्ञेयो
ऽसि नियतात्मभिः ॥ अत्र देहे कथमस्मिन्दे
हे क इति छेदः प्रयाणकाले सर्वदुःखाधि
ष्ठाने देहादुत्क्रान्तिसमये नियतात्मभिर्नि
यतः स्वस्वरूपतामापादित आत्मा यैस्तै
रात्मनि नित्यमवस्थितैः कथं केन प्रकारेण
ज्ञातं प्रत्यभिज्ञातं शक्योऽसि अन्यत्स्पष्टम्
अत्रोत्तरं श्रीभगवानुवाच ॥ अक्षरं ब्रह्म
परमं स्वभावोऽध्यात्ममुच्यते भूतभावोद्भ
वकरो विसर्गः कर्मसंज्ञितः ॥ न क्षरतीति न
चलतीति स्वाङ्गमहोदधिवत् स्पन्दत इति
अक्षरं तच्च परमं पूर्णं न तु कदस्यात्मवदेहा
वच्छिन्नम् तदेव परममक्षरं ब्रह्मोच्यते
बृहत्वाद् बृंहकत्वाच्च यस्माद्धि पूर्णानन्दघन
तया सतोऽपि पूर्णाहम्भावस्योन्मज्जनयान
तथा प्रतीतिस्तस्मात्तं शैवैः परमशिवस्त्वाहे
ष्टम् तदुक्तम् सर्वेषां तन्त्राणां लीनानन्तत
त्वौघनिर्भरः शिवश्चिदानन्दघनः परमाक्ष
रविग्रहः इति अत्र श्रीमदभिनवगुप्तपादै
निष्टनाम् यथा न खलु भगवति श्रीपरम

शिवप्रमेयकथाकाचिदस्तितस्योद्यस्यसर्व
थातत्राचिद्रूपतामात्रविश्रांतत्वेनलीनत्वा
दित्यादिनेति तस्यचाचिद्रूपस्यस्वलक्षणः
स्वभावःसोनिह्नुतधर्माचैतन्याख्योभावस्त
जन्यबोधप्रकारोध्यात्ममुच्यते आत्मानं
शरीरंस्वस्वरूपंविप्रष्टत्वेनाधिकृत्यवर्तमान
त्वात् अत्रसर्गाहंभावस्यान्यगततयाप्रतीय
मानत्वाच्छिवःशिवइतितत्वंनिर्दिष्टम् तदुक्तं
यदयमनुत्तरमूर्तिर्निजेच्छयाखिलमिदंज
गत्स्रष्टुम् पस्पन्दे सस्पन्दःप्रथमःशिवत
त्वमुच्यतेतज्ज्ञैरिति तस्यैवाध्यात्माख्यस्यक्रो
डीकृतविश्वशक्तेःस्वान्तेआहृतानांजडाज
डरूपाणांभावंबहिर्भावावभासनात्मकं
बहिर्भूतभावांतरावभासनात्मकंतथोद्भ
वमवस्थानंकरोतीतिभूतभावोद्भवकरो
योविसर्गोविविधत्वेनतत्तद्रूपतयासर्गः
तदेतत्बहुस्यांप्रजायेयेत्यादिश्रुतिसंस्त
चितसर्जनैककर्मसंज्ञितःयस्यशाक्तादयोः
संज्ञाविहिताः तदुक्तं सएवविश्वमीशि
तुंस्याज्ञंकर्त्तुंचउन्मुखोभवन् शक्तिस्वभा

वः कथितोऽध्यदय त्रिकोणमधुमांसलोहा
सः कर्मणः सदाशिवतत्त्वरूपो विशेषोऽर्ईश्वर
रूपात्मता किंचिन्मात्रस्तु देकात्मस्थयकुनि
रूपितः तथोक्तम् किन्त्वात्तदशो देका
त्मगत्गव्यंतत्त्वमादितः बहिर्भावपरतत्त
परतः परमेश्वरमिति एवं जीवन्मुक्तस्य
तेयं वस्तुजातं ध्याध्येयविदेहमुक्तस्यापे
क्षणीयमर्थजातमाह २॥ अधिभूतं क्षरो
भावः पुरुषश्चाधिदैवतम् अधियज्ञोऽह
मेवात्र देहे देहभृतांवर॥ क्षरतिचलति
तत्तदवस्थाभेदेनेति क्षरो भावो भवनधर्म
कोटिजीवाख्योऽधिभूतमुच्यते पंचभूता
निस्थूलसूक्ष्मरूपाणात्माध्यासनाधिकृत्य
वर्तमानत्वात् तथा पुरुषः परिदेहेनाति
कपरामर्शानवलम्बनेन शेते इति पुरुष
आत्मा संख्याभिमतः वेदान्त्यभिमतः साक्षी
कूटस्थ इति श्रुत्यंताभिमतः परमात्मेति
सोऽधिदैवतमुच्यते देवतानां करणेश्वरीणां
खेचरीगोचरीदिक्चरीभूचरीरूपाणां च त
त्रैव परिनिष्ठितत्वात् तदुक्तम् यतः कर

गी·टी·
१०३

णवर्गोयंविश्वदो शुद्धवत्स्वयम् सङ्क्रांतरे
णचक्रेणप्रवृत्तिः स्थितिसंहृतीः लभतेइ
त्यादि तथात्रदेहेंतर्यामित्वेन स्थितोहमी
श्वरएवाधियज्ञो यज्ञादिकर्मप्रवर्तकत्वात्
त्फलदातृत्वाच्च यद्वक्ष्यति ईश्वरः सर्वभूता
नांहृद्देशेर्जुनतिष्ठतीति प्रकारभेदोप्यत
देवोत्तरम् तथाहि अहमेवाहंतयापरामृ
श्यइत्यनेनप्रकारेणाहमीश्वरोधियज्ञो ना
न्यइत्येवकारेणध्वनितम् तदुक्तंविरूपाक्ष
पंचाशिकायाम् स्वपरावभासनक्षमआ
त्माविश्वस्ययः प्रकाशोसौ अहमितिसंप्
रत्युक्तोहंतास्थितिरीदृशीतस्येति तथाचो
क्तमुत्पलदेवैः प्रकाशस्यात्मविश्रांतिरहं
भावोहिकीर्तितः उक्ताचसैवविश्रांतिः स
र्वापेक्षानिरोधतः स्वातंत्र्यमथकर्तृत्वंमु
ख्यमीश्वरतादिचेति जीवस्यत्ववच्छिन्न
देहात्मत्वेनाहंकारममत्वेनवाच्छिन्नस्व
भावनिष्ठाहंतेतिभवतितद्भेदः अथप्रया
णकालेचकथंज्ञेयोसीतिप्रश्नस्यफलभू
तायाविदेहमुक्तेःउपायंसर्वशास्त्रसारमाह

३ ॥ अन्तकाले च मामेव स्मरन्मुक्त्वा कले
वरम् यः प्रयाति स मद्भावं याति नास्त्यत्र सं
शयः ॥ योंतकाले मरणकाले चकारात्स्व
स्थावस्थायामपि मामेवाहंताप्रत्ययमपि
यज्ञं परमात्मानं स्मरन्स्मृत्वैवमशनवधिभू
तादिकं कलेवरं देहं मुक्त्वा त्यक्त्वा प्रयाति प्रा
णप्रवेशवन्मूर्धसीमाविदारणद्वारैर्निर्गच्छ
ति स मद्भावं मद्रूपं समग्रं याति प्राप्नोत्यहमेव
संपद्यते इत्यर्थः तथा च श्रुतिः एष संप्रसा
दोस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंप
द्य स्वेन रूपेण संपद्यते इति स्मरणं चात्र नि
त्यसन्निहितस्य परमात्मनः प्रत्यवमर्शः न
व सन्निहितस्य घटादेरिव विकल्पमात्रेण
स्वीकारः अत्रान्तकाले मत्स्वरूपस्मरणेन
मद्भावापत्तौ नास्ति संशयः फलश्रुतायावि
देहमुक्तिरूपायां मद्भावापत्तेर्मदनुस्मरण
मुपायः न केवलं मद्विषय एवायं नियमः
किं तर्हि ५ ॥ यं यं वापि स्मरन्भावं त्यजत्यं
ते कलेवरं तं तमेवैति कौंतेय सदा तद्भाव
भावितः ॥ अंते दणपुत्रादिप्रमात्रन्तरा

गी॰टी॰
१०४

गोचरेस्यास्तायास्सहिष्का गङ्गादिकादिवेश
चरमभाविनिशरीरदार्ढ्यंवन्यप्रतनूभावा
देहकृतस्वबुद्धिःविमोहस्तस्मिन्कालांशेयं
उक्तधायेयंभावंसात्विकंराजसंतामसंवा
पिवावस्तुस्मरन्वापिशब्दोमदुक्तातिरिक्तवस्तु
स्मरणयोतकेथवाशब्दार्थे देहंत्यजति
तेतमेवभावंसात्विकादिकमेतिप्राप्नोति
अन्त्येक्षणेतद्भावस्मरणेहेतुगर्भविशेष
णमाहसदातद्भावभावितः यतोसौसर्व
दातस्यवस्तुनोभावेनभावनयानुचिंत
नेनभावितोवासितचित्तः एतेनतद्भावानु
चिंतनमेव वासनारूपेणतेक्षणेतद्भाव
स्मरणेबीजभूतेदेहत्यागानन्तरंतद्भावा
पत्तेहेतुः यद्वक्ष्यति यदासत्वेप्रवृद्धेतिति
भावितशब्देनैतदुच्यते तद्भावानुचिंत
नेनतद्वासनायाःस्मरणबीजभूतायाःस
त्वात्स्मरणस्यस्फुटत्वमस्फुटत्वेवाकार
णंतर्वर्तित्वात्कार्यस्येति कथंचास्याव
स्थायामन्तकालेविनिहतसकलेंद्रियचे
ष्टस्यभगवतानामस्मृतिपथमुपेयादित्यु

पायमप्युपदिशति ५ ॥ तस्मात्सर्वेषु का
लेषु मामनुस्मर युध्य च मय्यर्पितमनोबुद्धि
र्मामेवैष्यस्यसंशयः ॥ यतस्तुचिंतनमेवत
द्भावापत्तिहेतुस्तस्मात्कारणात्सर्वेषुकाले
षुसर्वास्ववस्थासुव्यावहारिकीष्वपिमामा
त्मानमनुस्मरानारतंचिंतय व्यावहारदशा
समनंतरप्रक्रांतमुपलक्षणमाह युध्यचे
तिव्यवहारमतेस्वधर्मरूपंतंयुद्धंचानुति
ष्ठेवः सत्युभये व्यवहारदशास्वपियस्यभ
गवत्तत्वंनहृदयादपयातितस्यभगवत्से
वसकलकर्मसंन्यासिनःसततभगवन्मय
स्यावश्यंस्वयमेवभगवत्तत्वमंतकालेस्फू
र्तिविषयतांयातीतिभावः तथोक्तमन्यत्र
स्वस्थेचेष्टाश्रयेमर्त्याःस्मरंतिममनारद
काष्ठपाषाणचेष्टांस्तानंतकालेस्मराम्य
हमिति अन्यत्रच स्थिरेचेतसिसुस्वस्थे
शरीरेसतियोनरः धातुसाम्येस्थितेस्मर्ता
विश्वरूपंचमामजम् ततस्तंम्रियमाणं
तुकाष्ठपाषाणसन्निभम् अहंस्मरामि
मद्भक्तंनयामिपरमांगतिमितिस्मर्तेत्यन्य

अताच्छील्येत्यत्र अतएवनलोकाव्ययेति
कर्मणिषष्ठीनिषेधः नतुव्यवहारदशाम
वदनुस्मरणमत्यापिभवज्ञावापत्तिर्दुर्लभा
नुमीयतेइत्यतआहमयीति यदायदामयि
प्रत्यगात्मन्यर्पितेमनोबुद्धीमनःसंकल्पा
त्मकेबुद्धिर्निश्चयात्मिकायेनसततयासंश
योदेहाहंभावरहितएवंविधःसन्नित्यानु
स्मरणपरस्त्वंभवासि नदातदामामेवेष्य
सिमदभेदंप्राप्स्यसीत्यर्थः यथाजीवदृशा
यामर्पितमनोबुद्धिर्मामेवेष्यतिएवंदे
हत्यागकालेपिमत्प्राप्तिरित्याह ८ ॥ अ
भ्यासयोगयुक्तेनचेतसानान्यगामिना
परमंपुरुषंदिव्यंयातिपार्थानुचिंतयन् ॥
अभ्यासयोगयुक्तेननित्यानुस्मरणसंब
द्धेनानन्यगामिनावस्त्वंतराविरतगातिना
चेतसांतःकरणेनात्मानमनुचिंतयन् श
रीरबन्धभेदानन्तरंविहायकलेवरमथः
पश्चाज्ज्ञायन्पुरुषोदिव्यंद्योतनात्मकंपरमं
पुरुषंपुरुषोत्तमंश्रीपरमेश्वरंयातिप्रतिप
द्यते तादात्म्यमुपेत्यविदेहमुक्तोभवती

न्यर्थः सवाच्छिन्नस्यात्मनोऽनुचिन्तनेनाव
च्छिन्नपुरुषोत्तमावाप्तिरित्याशंक्य पुरुषोत्त
मान्वयिविशेषणानि तस्मैदेनात्मनोऽप्यति
दिशति कविमिति तथान्येषामपि पुरःस्थि
तानांमोह्यमाणमनुस्मर्षवह्नितद्वीनांलक्ष
णीयांविदेहस्य भक्तिं दर्शयति प्रयाणकाले
इति १ ॥ कविं पुराणमनुशासितारमणो
रणीयांसमनुस्मरेद्यः सर्वस्य धातारमचिं
त्यरूपमादित्यवर्णं तमसः परस्तात् प्रया
णकाले मनसाचलेन भक्त्या युक्तो योगबले
नचैव भ्रुवोर्मध्ये प्राणमावेश्य सम्यक् स तं
परं पुरुषमुपैति दिव्यम् ॥ पुरुषम् कविं स
र्वज्ञं क्रांतदर्शिनं वा पुराणमनादिसिद्धम
नुशासितारं नियंतारमणोः सूक्ष्मादप्याका
शादेरणीयांसं सूक्ष्ममति दुर्लक्ष्यम् सर्वस्य
चराचरस्य धातारं धारकं पोषकं चाचिंत्यं
चिंतयितुमशक्यं मनोऽगोचरं रूपं यस्य तमा
दित्यवर्णं स्वप्रकाशं न तु परप्रकाशं अत
एव तमसोऽज्ञानरूपादन्धकारात् परस्तात्
प्रकृत्या वर्तमानमेवं विशिष्टं तेनेश्वराभि

गी॰टी॰
९८

106

मंसंतमात्मानमचलेनविषयांतरानाकृष्टे
नतत्रैवावस्थितेनेतियावत् मनसात्मनात्म
केनांतःकरणेनप्रयाणकालेदुःखबहुले
मरणसमयेचभक्त्यायुक्तोयोगीअनुस्मरेत
स्मर्तुंशक्नुयात् शक्तिलिङ्. ततोयोगबले
नसमाधिबलेनप्राणंमांतरेमारुतंभ्रुवोर्म
ध्यसुषुम्णामार्गेसम्यग्यथावदावेश्यवेश
यित्वावर्तमानः सयोगीविदेहमुक्तिगामि
त्वंद्योतनात्मकंपरंपुरुषंपुरुषोत्तम
पीस्वरूपेतितादात्म्यमापद्यतेइत्यर्थः तथा
चश्रुतिः एषसंप्रसादोस्माच्छरीरात्समुत्था
यपरंज्योतिरूपंसंपद्यस्वेनरूपेणसंपद्यतेइ
ति भ्रुवोरितिभ्रूग्रहणंसर्वतोमध्यवर्तिन्याः
सुषुम्णानाड्याउपलक्षणार्थम् नतुभ्रूम
ध्यंविवक्षितम् यथाहतत्रमत्रविद्योतते
विद्यदित्यत्र ग्रथासैवात्मनोदुर्लभताख्या
पनश्चैवंप्राप्त्युपायंसम्यग्वक्तुंप्रतिजानीते
८।९ ॥ यदक्षरंवेदविदोवदंतिविशंति
यद्यतयोवीतरागाः यदिच्छंतोब्रह्मचर्यं
चरंतितत्तेपदंसंग्रहेणप्रवक्ष्ये ॥ वेदवि

दोवेदांतज्ञा यत्पदमक्षरं वेद्योपरागोपिस्वस्व
भावचलनरहितं वदंति तथाच श्रुतिः त
द्वा एतदक्षरं गार्गि ब्राह्मणा अभिवदंतीति
तथा वीतरागा वैराग्यवंतो योगिनो यतयः
प्रयत्नशीला आत्माकारप्रत्ययावृत्तिं नित्य
मभ्यस्यंतो यत्पदं विशंति समाविशंति तद
भेदमुपलभंते तथा यत्पदमिच्छंतः गुरुपा
यमादि सर्वं चित्तवृत्तिनिरोधं चरंति कुर्वंति
ब्रह्मचर्यं यमादीनां चित्तवृत्तिनिरोधलक्ष
णयोगांगानामुपलक्षणम् तत्पदं पद्य
ते गम्यते इति पदं शाप्यंथा मसंग्रहेण संक्षे
पेण अथवा सम्यग्गृह्यते निश्चीयते नेनेति
संग्रह उपायस्तेनाभिधास्ये अथ प्रतिज्ञातं
विवृणोति त्रिभिः ९ ॥ सर्वद्वाराणि संय
म्य मनो हृदि निरुध्य च मूर्ध्न्याधायात्मनः
प्राणमास्थितो योगधारणाम् ॐमित्येका
क्षरं ब्रह्म व्याहरन्मामनुस्मरन् यः प्रयाति
त्यजन्देहं स याति परमां गतिम् ॥ यो योगी
विदेहमुक्तिमिच्छन् ॐमिति यत्नास्तिडम
क्षरं तदेव ब्रह्मवाचकत्वाद्ब्रह्म तदुक्तम्

गी॰टी॰
१०७

तस्य वाचकः प्रणव इति तज्जपस्तदर्थभा
वनं चेति तदेवोच्चारयन् तद्वाच्यं च मामात्मा
नमनुस्मरन्निरंतरमस्योंकारः स्मृतो नामतेना
हूतः प्रसीदतीति तथा सर्वाणींद्रियद्वारा
णि संयमय प्रत्याहृत्य चक्षुरादिभिर्बाह्यवि
षयग्रहणमकृत्वेत्यर्थः मनश्चात्ममनना
त्मकं दृढादिसर्वसंविदधिकरणोपदेशाय
गते देहैकदेशे दहरे पुंडरीके निरुध्याविग
तप्रचारं कृत्वा ततो भूमिंभ्रूमध्ये प्रथिमे द
तः सर्वं ब्रह्मरंध्रे दयाहृर्ध्वगामिन्या सुषुम्णा
नाड्या प्राणमेतस्य मूर्ध्नि माहितमाधाय कृत्वा
एवमात्मनो योगधारणां समाधिस्थैर्यमा
स्थितः सन्देहं त्यजन्प्रयाति यथा दिनमप्रवे
शं निर्गच्छति देहात् स योगी परमां गतिं
विदेहमुक्तिं प्राप्नोति तत्र मरणकाले तात्का
लिकदुःखादिविसंस्थुलचित्तो योगी कथ
मेवं विधं समाधिं साधयेदित्याशंक्याह पूर्वोक्त
मेव कारणमाह ११॥ अनन्यचेताः सततं
यो मां स्मरति नित्यशः तस्याहं सुलभः पार्थ
नित्ययुक्तस्य योगिनः॥ यो योगी अनन्यचे

ताः नान्यस्मिन्साध्यफलादौ विषये वात्मानं
विस्मार्य प्रसक्तं चेतो यस्य स तथाविधो नि
त्यशो यावज्जीवं प्रतिदिनं सततं निरंतरं य
था भवति तथा मां प्रत्यंचं स्मरति आत्मत्वेन
प्रत्यवमृशति हे पार्थ तस्य योगिनो नि
त्यं व्यवहारदशास्वपि युक्तस्यात्मनि समा
हितस्याहमतरः सुलभो न मोवा सुलभः
सुखेन लभ्योस्मि नान्यस्य प्रमत्तस्य एवं स
ति तस्यां दुःखनिवेपनायामप्यवस्थायामा
त्मभूतत्वात्कथमहंदुष्प्राप इति तात्पर्यम्
यत एवं मतो नन्यचेताः सन्मयि सदा समा
हितो भवेदिति ननु सततासोम्यतदा संप
न्नो भवतीति स्मृतेः सुखमोसद्भावमापन्नो
पि यथा पुनः संसरति तथैव भगवन्माव
मापन्नोपि प्रलयकाले व्यतीत्य पुनः
सृष्टिकाले मुक्ता अपि जन्मयांतीति येषां शं
का स्यात्तन्निराकरणाय समाधिः सोकेरा
ह १५ ॥ मामुपेत्य पुनर्जन्म दुःखालय
मशाश्वतम् नाप्नुवंति महात्मानः संसि
द्धिं परमां गताः ॥ मामीश्वरं परमगतिरू

पमुपेत्य प्राप्याहमेव भूत्वेत्यर्थः योगि
नः पुनर्जन्म नन्तरदुःखानामाध्यात्मि
कादीनामालयमाश्रयं तत्त्वाप्यशाश्वतम
नित्यं दृष्टनष्टप्रायं जन्मदेहपरिग्रहं न प्रा
प्नुवंति कुत इत्यतो हेतुगर्भं विशेषणमा
ह महात्मान इति महात्मान्पापको हमेवा
त्मायेषांते नडमं वितनस्य कुतः स्वा
सरणमिति नतु देहस्यापरिग्रहे किंस
त्रमप्रायापवर्तिष्ठंतीत्यत आह परमाम
त्युत्कृष्टां संसिद्धिं सर्वात्मकत्वलक्षणांम
म भेदसमापत्तिरूपां मोक्षाख्यां प्राप्ताः
न तु मुक्तिश्च तथा शास्त्रेषु परिगणिता
सालोकं सामीप्यं सार्ष्टिता सायुज्यमिति
सापि जन्मापरिग्रहे नेत्याशंक्य सायु
ज्यमेव तद्भेदेन नान्यदित्याह १५ ॥ आब्र
ह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन मा
मुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते ॥ ब्र
ह्मलोकग्रहणं विश्वलोकाद्युपलक्षणा
र्थं आब्रह्मभुवनाद्ब्रह्मलोकादीनभिव्या
प्य आब्रह्मयावद्ब्रह्मपदं प्राप्तमिति वा

यस्मात्कस्माच्चितिर्यशब्दार्थोयस्माद्भुवनात्ये
वाग्निविन्यादिभिरानन्दकृतवस्तत्रगता
अपिलोकाअधिकारिणोजनाःक्रियाणा
मेनवत्वात्पुनरावर्तिनोभूयोभूयश्चक्रव
त्संसारवर्त्मनिभ्राम्यंतोभवंतितन्मुक्तिश्च
यस्यैवलक्षणेश्चवधारणेवामामेवेश्वर
मुपेत्यमयासहमुक्त्यात्मत्वेनप्रतिपद्यंत
तोयोगिनः हेकौंतेयपुनर्मुक्त्यनंतरंजन्म
शरीरपरिग्रहोनविद्यते॥ ननुकथंसायु
ज्यस्यैवमुक्तित्वंनान्यस्येत्याशंकातस्यका
लपरिच्छिन्नत्वाद्विनाशावच्छिन्नत्वंनसायु
ज्यरूपस्यमद्भावस्यान्यस्यतमुक्तित्वापारो
पाश्चिरतरकालस्यायितयेति तेषांकाल
परिच्छेदमाह १६॥ सहस्रयुगपर्यंतम
हर्यद्ब्रह्मणोविदुः रात्रिंयुगसहस्रांताते
ऽहोरात्रविदोजनाः॥ मनुष्यकालपरिमा
णेनसहस्रंयुगानिचतुर्युगानिपर्यंतोव
सानयस्यतत् तादृशंब्रह्मणोयदहस्त
द्येविदुःप्रमाणेनावधारयंति तथाब्रह्म
णोरात्रिंचतुर्युगसहस्रपर्यंतांयेविदुस्ते

जना अहोरात्रविदः नान्ये स्वल्पदर्शिनो ना
लिकाघट्यवच्छिन्नकालज्ञा अहोरात्रविदः
तथाच मनुः चतुर्युगसहस्रेन्तु ब्रह्मणो दि
नमुच्यते एतदुक्तं भवति ब्रह्मलोकादि
भुवनवासिनोपि स्वस्वपरिमाणेन काला
वच्छिन्नतया वर्षशतं प्ररूढायुषमतिवाह्य
देहान्तरं भजन्ते अत्यन्तस्तेषां मनुष्यापे
क्षया चिरकालावस्थानेनान्येषां मुक्तिव
न्निर्देशः अत उक्तं आब्रह्मभुवनाल्लोकाः
पुनरावर्तिन इति द्वादशाभिर्दिव्यैः वर्षस
हस्रैश्चतुर्युगं भवतीत्यत्र महाभारतम्
चत्वार्याहुः सहस्राणि वर्षाणि तत्कृतं यु
गं अस्य तावच्छती संध्या संध्यांशश्च तथा
परः त्रीणि वर्षसहस्राणि त्रेतायुगमिहो
च्यते तस्य तावच्छती संध्या संध्यांशश्च त
थापरः तथा वर्षसहस्रे द्वे द्वापरं परिमा
णतः तस्यापि द्विशती संध्या संध्यांशश्च
तथापरः सहस्रमेकं वर्षाणां तथा कलि
युगं स्मृतम् तस्य वर्षशतं संधिः संध्यंश
श्च तथापरः संधिसंध्यंशयोस्तुल्यं प्रमा

णास्तुपपद्यत इति अथ ब्रह्मणोदिनमानं
प्रदर्श्यते उदाहरणेन तत्र चतुर्युगपरिमा
णंपार्थकेन सिद्धांतशिरोमणौ खखाभ्र
दन्तसागरैरित्यादिनोक्तम् खखाभ्रदन्त
सागराः ४३२००० सौरमानेन वत्सराश्च
तुर्भिर्गुणिताः १७२८००० कृतनामप्रथ
मो युगचरणः एवं खखाभ्रदंतसागरा
स्त्रिभिर्गुणितास्त्रेताभिधानो द्वितीयो युग
चरणः १२९६००० एवं द्वाभ्यां गुणिताः
८६४००० द्वापरसंज्ञस्तृतीयोयुगांघ्रिः
एकगुणिताः ४३२००० कलिर्नाम चतुर्थो
युगचरणः एवं स्वस्वद्वादशांशप्रमितानि
जानिजसंध्यायुक्तमनुष्यकालपरिमाणे
नोक्ताः एवं चतुर्णांचरणानां योगे यावा
न्कालःस्या ४३२०००० तावद्युगस्य प्रमा
णम् एतदेवसहस्रगुणं ४३२०००००००
जातं ब्रह्मणोदिनम् सृष्टिकल्पः एतावत्रै
व युगसहस्रमिता रात्रि ४३२०००००००
संहारकल्पः एवं कल्पद्वयपरिमितंब्रा
ह्ममहोरात्रं ८६४००००००००

गी॰टी॰
११

णो मासवर्षाद्युगादि कल्पनीयम् प्रथम
ह्माभारतलौकिकमेणाब्दलक्षणो दिनमुदाकि
यते मनुष्याणां वर्षं देवानामहोरात्रं त
देवषष्ट्याधिकमनुष्यवर्षत्रिंशत्यागुणितं
जातं ३६० देवानां वर्षम् एवं मनुष्यवर्ष
मानेन देवानां वर्षं ३६० चतुःसहस्र्या
४००० गुणिते जातं १४४०००० कृतयुग
परिमाणं पुनर्देवानां वर्षं ३६० चतुःश
त्यागुणितं १४४००० आदावन्ते च संध्याया
विद्यमानत्वाद्द्विगुणितं २८८००० जाता कृ
तयुगसंध्या कृतयुगप्रमाण १४४००००
संध्याप्रमाणयोः २८८००० संयोगे जातं
संध्यायुतं कृतयुगपरिमाणं १७२८०००
देवानां वर्षं ३६० त्रिसहस्र्यागुणितं
१०८०००० जातं त्रेतायुगपरिमाणं एवं दे
ववर्षं ३६० त्रिशत्यागुणितं १०८०००
द्विघ्नं २१६००० जाता त्रेतायुगसंध्या संध्या
युगप्रमाणयोर्योगे जातं १२९६०००
त्रेतायुगपरिमाणं संध्यायुतम् एवं द्वाप
रयुगपरिमाणं संध्यायुतं ८६४००० क

110

लियुगपरिमाणं ४३२··· एवं ब्रह्मणो द्वि॰टी॰
ऽहोरात्रपरिगणनेन विरंच्यादीनामप्यहोरा १११
त्रे शास्त्रेषु परिगणितम् न न हि त्वमया
दिह्नविनन्यते नत्वब्रह्मादीनामहोरात्रे किं
कृत्यमित्याह १७ ॥ अव्यक्ताद्व्यक्तयः सर्वाः
प्रभवंत्यहरागमे रात्र्यागमे प्रलीयंते तत्रै
वाव्यक्तसंज्ञके ॥ कार्यस्याव्यक्तं रूपं कार
णात्मकं तस्मादव्यक्तात्कारणरू
पाद्व्यक्तयः कार्याणि प्रक्रांतत्वादिह चरा
चराणि भूतानि स्वस्वकालापेक्षयाहरागमे
ब्रह्मादीनां दिनस्योपक्रमे प्रादुर्भवंति त
थारात्रेरागमे तत्रैवाव्यक्तसंज्ञके स्वस्मिन्स्व
स्मिन्कारणरूपे प्रलयं यांति तिरोभवंति
तत्र च कृतनाशाकृताभ्यागमशंकावार
यन्वैराग्यार्थं सृष्टिप्रलयप्रवाहस्याविच्छे
दं दर्शयति १८ ॥ भूतग्रामः स एवायं भू
त्वा भूत्वा प्रलीयते रात्र्यागमेऽवशः पार्थ
प्रभवत्यहरागमे ॥ भूतानां चतुर्दशवि
धानं प्राणिनां ग्रामः समूहः यः पूर्वस्मिन्क
ल्प आसीत्स एव न तु प्रतिकल्पमन्योन्यो

गी॰टी
१११

भूत्वाभूत्वापुनःपुनराविर्भूयरात्र्यागमेस्
मिन्कारणेप्रलीयंतेतिरोभवंति तथाहरा
गमेवशःकामकर्मक्लेशादिपरतंत्रःप्रभ
वति व्यक्तिमासादयति नान्येन्येउत्पद्यं
तेपितत एवजीवाः तथाचश्रुतिः सूर्या
चंद्रमसौधातायथापूर्वमकल्पयत् दिवं
चपृथिवींचांतरिक्षमथोस्वरिति एवंप्रल
यंगतानामप्यविद्यावृतानांसंसाररूपंग
तागतंप्रतिपाद्येदानींभगवद्भावमापन्ना
नांमुक्तानांगतागताभावंविवक्षुरात्मनः
प्रलयकालेपिविनाशाभावमाह ९ ॥
परस्तस्मात्तुभावोन्योव्यक्तोव्यक्तात्सनात
नः यःससर्वेषुभूतेषुनश्यत्सुनविनश्य
ति ॥ तुशब्दोभूतवैलक्षण्यार्थः तस्माद्भू
तग्रामबीजभूतादव्यक्तात्प्रधानाख्याद
न्योविलक्षणःपरःस्वातंत्र्येणउत्कृष्टोभा
वःसद्रूपश्चात्माव्यक्तोतींद्रियःसना
तनोविनाशहेतुसत्त्वेपिविनाशान
र्हीयोस्ति सचात्मासर्वेषुभूतेषुस्थावर
जंगमात्मकेषुप्राणिषुविनश्यत्स्वपिन

111

विनश्यति तस्मात्तद्भावमापन्नानां न प्रल
ये विनाशप्रसंगः तत्वात्मभावमापन्नानां
प्रलयकाले विनाशो मा भूत्सृष्टिकाले त
स्य कश्चिद्रूपान्तरावाप्तिरस्तीत्यत आह
१८ ॥ अव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमां ग
तिम् यं प्राप्य न निवर्तन्ते तद्धाम परमं मम ॥
यो व्यक्त इति भावो मयोक्तः शाहितः सोऽक्ष
रः स्वस्वभावादप्रच्युतो विमर्शात्मस्वात्मा
उक्तः नान्यः विमर्शरहितो भावः तदुक्तम्
स्वभावमवभासस्याविमर्शं विदुरन्यथा
प्रकाशोक्तोऽपि स्फटिकादिजडोपम इति
तमेवाक्षरं विमर्शरूपं परमां गतिमुत्कृ
ष्टं मोक्षस्य प्राप्युपायमाहुः श्रुतयः स्मृत
यश्च तथा च श्रुतिः ज्ञात्वा तं मृत्युमत्ये
ति नान्यः पंथा विमुक्तये इति पुरुषान्न प
रं किंचित्सा काष्ठा सा परा गतिरिति च य
मक्षररूपं भावं प्राप्यात्मत्वेन प्रतिपद्य यो
गिनो न निवर्तन्ते पुनः संसारसरणिं नाव
तरति तस्याक्षररूपं मम परमेश्वरस्य स
र्वात्मकस्य परमं धाम स्वरूपं तन्मत्तोऽभि

गी·टी·
११२

मम् अतआत्मभूतानां विदेहमुक्तानां वैष्णा
त्म्यमापन्नानां सृष्टिकालेनपुनरावृत्तिर
स्ति नन्वात्मभूताविदेहमुक्तिमापन्नस्यमा
नादेहं परित्यज्यवैष्णात्म्यमापद्यंते चेत्तर्हि
किमितिनजीवंतएवतेवैष्णात्म्यमुपलभं
ते इत्यतआह १९ ॥ पुरुषःसपरःपार्थ
भक्त्यालभ्यस्त्वनन्यया यस्यांतःस्थानिभू
तानियेनसर्वमिदंततम् ॥ सप्रसिद्धः
परोत्तरात्मापेक्षयाशरणागताद्वाउत्कृष्टःपु
रुषउत्तमःपुरुषोविष्णात्माईश्वराख्यःत
रत्तरात्मनोव्यतिरेके अनन्ययानविद्यते
न्यद्यातिनिवारणादियस्यांतयापकोनया
भक्त्यानुरागेणलभ्यःप्राप्तुंशक्यःपरत्वमे
वाह यस्योत्तमपुरुषस्यांतर्मध्येमेदेन
स्थितानिभूतानियेनचकारणभूतेनस
र्वमिदंजगत्ततंस्वस्वरूपेनव्याप्तम्
अतःपरयाभक्त्याविनाजीवन्मुक्तिर्दुर्ल
भा नन्वेतत्कथंपरेणज्ञायतेदेहत्याग
समयेपतेयोगिनोविदेहमोक्षमापन्नाअ
मीयोगभ्रष्टामित्यतआह २०॥ यत्रका

112

सैव नावृत्तिमावृत्तिं चैव योगिनः प्रया
तायांति तं कालं वक्ष्यामि भरतर्षभ ॥
यत्र कालेवस्थाविशेषे प्रयाता मृता यो
गिनो नित्यमात्मनि समाश्रिताश्च नावृ
त्तिं मुक्तिमावृत्तिं भोगाय जन्म यांति प्रा
प्नुवंति तं कालमवस्थाविशेषं वक्ष्याम्यु
पदिशामि हे अर्जुन तत्र निरंतराभ्यास
शालिनो देहत्यागसमये दृढभाविता
त्मनो विदर्यमोक्षदायिनीमवस्थां दर्श
यति २१ ॥ अग्निर्ज्योतिरहः शुक्लः ष
ण्मासा उत्तरायणम् तत्र प्रयाता गच्छं
ति ब्रह्म ब्रह्मविदो जनाः ॥ अग्न्यादयः
शब्दास्तेषु तेष्वहस्यशब्देषु मूर्धच्छिद्रा
ख्यब्रह्मद्वारवाहिनि प्राणे सासता स्तेकेति
ताः तथा साधर्म्ययोगाद्गौर्वाहीक इति
वहलक्षणया प्रयुक्ताश्च इत्युक्तं भगवता
योऽयमिति वहलक्षणया व्यवसिताः य
था या निशा सर्वभूतानामित्यत्र निशा
शब्दः तथा च साधर्म्यम् प्राणवृत्तिर्वा
मरहितानामार्गोविलीभावयंतीमथ्यर

येणोर्ध्वेन प्रवहंतीत्यार्चिः सकलस्य भेद
स्याभेदस्मारनाशानललक्षणोविलापनमा
ध्यानस्यैवसर्पिषोविदध्यात्तदर्थंगच्छत्येव
नडक्ते मध्योर्ध्वगामयदानात्म्येनत्वर्थंगोऽ
नभ्युपयइति नथाविद्यानमोपहराणे
ज्योतिः प्रकाशिका अहरितिंशुद्धरिका
प्रमाणेमनुष्याणांदिनंप्रवोधहेतुः शुक्ल
पक्षः पितृणांदिनेप्रवोधहेतुः षण्मासा
उत्तरायणंदेवानांदिनंप्रवोधहेतुः यथा
स्विवासिनस्वामिनिदिनेप्रवोधायाधिष्ठिताः
सर्वेदेवपितृमनुष्याः देवादीनामपिब्र
ह्मविद्यायामधिकारोस्तीतिभावेनबाद
रायणोक्तिरीतिप्रपंचितम् तथातप
वदेवपितृमनुष्याप्रवोधलाभेनाधिकृ
ताब्रह्मविदोनिरंतराभ्यासेनज्ञानधारा
पिरूढाः संतोस्यामवस्थायांप्रयाताःसूर्य
सोमाविदारणंसर्वदेहमुत्सृज्यतेब्रह्मयो
तिशक्तिभाजः स्पृष्टैवब्रह्मविदोदेवयानः
पंथाः तथाचश्रुतिः यएषमंडलेभिता
माहतोयातिमूर्धानि यत्रयत्राग्नियेद्धावि

नसभूयोभिजायते इति श्रुतेश्चैकावद्ध
दयस्यनाडुत्क्रान्तोमूर्धानमतिभिःस्ते
का तयोर्ध्वमायन्नमृतत्वमेतिविष्वगन्या
उत्क्रमणेनभवंतीति तथाचस्मृतिः त
त्वालोकेतपनमंडलदिनेयेपरेसंप्रवृत्ताये
वाचिंतोपशमरजनीयोगनिद्रामुपेताः
तेश्रीराज्ञोपरमपरमानन्दसंध्यास्तमोरं
भित्वाज्योतिःपरमपरंमेयातिनिर्वाणमा
र्गमिति अदग्धसर्वकर्माणमेनमेवावि
देहकैवल्यमापन्नंयोगिनमालक्ष्यदंश
यते तस्यपुत्रादायमुपयंति सुहृदः सा
धुकृत्यांद्विषंतःपापकृत्यामिति ततजी
वन्मुक्तमुद्दिश्यतस्यादेहेतज्ञानाग्निनाक
र्मणांदग्धप्रायत्वात् तथाचसर्वमेवा
कं ज्ञानाग्निसर्वकर्माणिभस्मसात्कुरु
तेर्जुनेति अथमस्यांभावितात्मनोयोगि
नस्तत्कालेस्वस्वरूपस्मरणाभावादाशंकि
तायितीमवस्थोदर्शयति २२॥ धूमोरात्रि
स्तथाकृष्णःषण्मासादक्षिणायनम् तत्र
चांद्रमसंज्योतिर्योगीप्राप्यनिवर्त्तते ॥

सर्ववत्समादयः शब्दाब्रह्मलन्द्धारव्यतिरिक्त
मार्गवाह्निनिशाणोलक्ष्यापानसंज्ञेताय
र्ध्येणलक्षिताः तथाहि सेवशाणहृमिर्धं
मोक्षानावरकत्वात् तथा मनुष्याणांविंश
त्यादिकामशाणारात्रिरविद्यालक्षणास्ता
पहैतपएवं कृष्णपक्षः पितृणांरात्रिः षण्मा
सादक्षिणायनं देवानांरात्रिः तत्रैहशे
वस्थाविशेषेचांद्रमसंज्योतिर्वलवती च
न्द्राव्यापनत्वात् प्रावस्थापायाधिकृतो
देहाउत्क्रामन्नेवपितृमनुष्येषुन्यतमामि
नयोगीअभ्यासेनस्वीकृतयोविशेषोनि
वर्ततेभोगायजन्मप्राप्नोति यत्रयोगा
भ्यासप्रकर्षोचितेशरीरेआविशन्योगा
रूढः सर्वाभ्यासक्रियमाणाचिमतयाप्रय
तमानःपरांसिद्धिंप्राप्स्यतीतियत उक्तम्
वहूनांजन्मनामंतेज्ञानवान्मांप्रपद्यते
इति एषयोगिनःपितृयानःपन्थाः य
स्तेनचिंवमामिसंभवतीतितेष्ममामिसं
भवतीत्यादिकांक्षतिमालक्ष्यात्वादि
लोकगत्याक्रमप्राप्तिर्जन्मवाभवतीत्या

वर्त्तते तत्सगुणब्रह्मोपासकविषयम्
अत्र निर्गुणोपासनस्य प्रक्रान्तत्वात्तत्प्रकृ
तोपयोगि यतः कालस्य बाह्याभ्यन्तरभेद
नद्विरूपस्य शास्त्रेषु द्विप्रकारता प्रतिपादिता
तत्र प्रसिद्धत्वाद् सूर्येन्दुचारोपलक्षिताख्या
दिलोकगत्या क्रममुक्तिर्जन्म वा सगुणो
पासकोचितम् अभ्यन्तरप्राणापानलक्ष
णसूर्येन्दुचारोपलक्ष्यताख्यादिगतिकृ
तमुक्तिर्निर्गुणोपासकोचितेति विवेकः
अत एव भीष्मेण स्वतन्त्रमृत्युत्वान्निर्गुणात्म
वपुष्म प्रतिष्ठेन पुरोवर्तिनः सगुणब्रह्म
णः श्रीकृष्णस्य च ध्याननिष्ठेन बाह्याभ्यन्त
रे द्वे एव गती स्वीकृते अन्यस्य तस्तं आमा
वात्तथा अथानयोरवस्ययोरनादृत्या
वलिदायिन्योः संज्ञाद्वैवकं नियततामाह ॥
शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते
एकया यात्यनावृत्तिमन्ययावर्तते पुनः ॥
हि प्रसिद्धे एते अनन्तरोक्ते शुक्लकृष्णे गते
मार्गौ शुक्लाज्ञानप्रकाशमयत्वात् कृष्णा
ज्ञानतमोमयत्वात् जगतो योगाधिका

115

रिणो लोकस्य शाश्वते नित्ये अवश्यंभावि
नीमते निश्चिते तत्रैकया शुक्लयार्चिर्ज्यो
तिरित्यादिलक्षितया सततं योगाभ्यास
लब्धप्रकर्षो योगी अनावृत्तिं मोक्षं याति
प्राप्नोति अन्यया कृष्णया धूम इत्यादिल
क्षितया कादाचित्कयोगपरो योगी पुनर्दे
हत्यागानन्तरं आवर्तते देहांतरे संक्राम
ति यत्र पुनर्योगपरिशीलनेन शुक्लां ग
तिमासाद्य मुच्यते अन्तस्तत्कृष्णया गते
रेव निश्चितं विद्यमानतया न तत्र संशया
वकाशः अत्र शाश्वते रित्युक्तेरेतदभिव्य
ज्यते यः कश्चिन्नवतो योगपरस्तस्याव
श्यमत्र जन्मनि परत्र जन्मनि वा विदेहमु
क्तिः स्यादेव जीवन्मुक्तिस्तु योगिसहस्रे
ष्वपि मध्ये कस्यचिदेव परिपक्वभक्तेरीश्व
रानुग्रहेणासंप्रापेति यत्रस्तज्ञाप्युक्तेस्सम
ह्यात्मा सुदुर्लभ इति अथैतयोर्गत्योः परि
ज्ञानस्य फलमाह ॥ २४ नैते सृती पार्थ
जानन्योगी मुह्यति कश्चन तस्मात्सर्वेषु
कालेषु योगयुक्तो भवार्जुन ॥ हे पार्थ

कश्चन योगी उक्तौ विषयेषु योगभेदेष्वन्यतम
योगभेदेषूक्तो योगी एते यथोक्ते सृती गती
जानन्नाभ्यंतरेण क्रमेण योगाभ्यासस्वीकृ
तेन जानन्नत्यभिजानन्मुह्यति देहादि
ष्वात्मप्रत्ययेन भजते यत एवं तस्मात्स
र्वेषु कालेषु कालविशेषभूतास्ववस्थासु
योगयुक्तो योगे जीवन्मुक्तिविदेहमुक्त्योः
प्रथमोपायभूते आत्मसमाधाने युक्तः
संबद्धो भव हेऽर्जुन यतः नित्यसमाधानेनै
व परमार्थसिद्धिर्नतु परिमितं कालानुष्ठि
तेन योगेनेत्यसकृच्छ्रीभगवतोपदिष्टम्
उक्तं च कुलार्णवे तस्मात्सर्वप्रयत्नेन सर्वा
वस्थासु सर्वदा तत्त्वनिष्ठो भवेद्देवि यदी
च्छेन्मोक्षमात्मन इति अथोक्तस्याध्याया
र्थस्य प्रभावमाह २८ ॥ वेदेषु यज्ञेषु त
पःसु चैव दानेषु यत्पुण्यफलं प्रदिष्टम् अ
त्येति तत्सर्वमिदं विदित्वा योगी परं स्थानमु
पैति चाद्यम् ॥ वेदेष्वध्ययनादिना यज्ञेषु
नुष्ठानादिना तपःसु स्वकायशोषणादिना
दानेषु सत्पात्रार्पणादिना यत्पुण्यफलं त्व

गी॰टी
११८

116

द्रानन्दाधिष्ठानभूतस्वर्गादिप्राप्तिरूपंशा
स्त्रोपदिष्टम् इदमध्यायोक्तमर्थंविदित्वा
तुभूययोगीनित्यावहितस्तत्सर्वमत्येति
अलौकिकमात्मानन्दमश्नुतेजीवद्दशा
याम् ततोदेहत्यागानन्तरंस्थानमाद्यंजग
न्मूलभूतंस्थानंयामेश्वरस्वरूपमुपेत्यात्मत्वेन
प्रतिपद्यतेचेत्यम् जीवन्मुक्तेर्दुर्लभत्वमा
लत्यप्राहयोहरीः विदेहमुक्तिमुक्तिंतंत
त्रैलोक्यप्राप्तुयामहम् २८ इतिश्रीभगवद्गी
ताटीकायांतत्वप्रकाशिकाख्यायांराजा
नकलक्ष्मीरामविरचितायामक्षरनिर्देश
योगोनामाष्टमोध्यायः ८ ॥ एवमुक्तप्र
कारस्ययोगस्यभक्तियोगंविनाविदेहमु
क्त्यावहस्यप्रसंगतोविस्तरेणविदेहमुक्ते
र्लक्षणंविषयंप्रभावंचोक्त्वापुनाभक्तियो
गस्यसर्वेषुयोगेषुनुस्यूतनयामहूचितस्या
पिपुनर्लक्षणविषयप्रभावसौकर्यविवे
तयानन्तरमध्यायंत्री[illegible]काश्रीभगवानु
वाच ॥ इदंतुतेगुह्यतमंप्रवक्ष्याम्यनसू
यवे ज्ञानंविज्ञानसहितंयज्ज्ञात्वामोक्ष्यसे

शुभात् ॥ उक्तलक्षणस्याविदेहमुक्ति
प्रदस्ययोगस्यवैलक्षण्यार्थः इदंवस्तमा
णंविशेषेणज्ञायतेनेनेतिविज्ञानमुपास
नेनतत्सहितंज्ञानमीश्वरविषयंजीवन्मुक्ता
वहम् अनसूयवेपुनःपुनःस्वमाहात्म्य
मेवोपदिशतीत्येवंपरमकारुणिकेमयिदो
षदृष्टिरहितायतेतुभ्यंवक्ष्यामिकीदृशंगु
ह्यतममतिशयेनगोपनीयम् धर्मज्ञानं
गुह्यंततोविदेहाद्विवेकेनात्मज्ञानंगुह्यत
रंइदंतपेश्वरज्ञानभक्तियोगलक्षणंगुह्य
तमम् यज्ज्ञानंज्ञात्वाप्रमाणेनावधार्याशु
भात्सर्वदुःखहेतोःसंसारान्मोक्ष्यसेमोक्षं
प्राप्स्यसि किंच १ ॥ राजविद्याराजगुह्यं
पवित्रमिदमुत्तमम् प्रत्यक्षावगमंधर्म्यं
सुसुखंकर्तुमव्ययम् ॥ इदमीश्वरविष
यंज्ञानंराजविद्याराजगुह्यंविद्यानांगुह्या
नांचराजविद्यास्वात्मविषयबोधेषुगोप्ये
ष्वात्ममननेषुचातिश्रेष्ठमित्यर्थः अनेने
श्वरस्यात्मोपलम्भात् राजदंतादित्वादुप
सर्जनस्यपरनिपातः तथोत्तमंपवित्रंमि

दमन्यत्वात्पावनं सर्वविकल्पकलंकशोध
कम् तथा प्रत्यक्षावगमं स्वसंवेदनवेद्य
वोधं तथा धर्म्यं धर्मादनपेतं धर्मधारावा
हकं सुसुखं कर्तुं सुखेन कर्तुं शक्यम्
अव्ययं चाक्षयफलत्वात् एतच्चाश्रद्धादि
गुणसंपन्नानामेव सुलभं नान्येषामित्या
ह २॥ अश्रद्दधानाः पुरुषा धर्मस्यास्य प
रंतप अप्राप्य मां निवर्त्तन्ते मृत्युसंसार
वर्त्मनि ॥ अस्येश्वरविषयस्य ज्ञानभक्ति
योगरूपस्य धर्मस्योक्तलक्षणे प्रभावमश्र
द्दधाना असंभावयंतः पुरुषा मामीश्वर
मप्राप्य स्वमतिकल्पितेनोपायांतरेण प्र
कृतप्रयत्ना अपि मत्समापत्तिमनासाद्य
मरणजननयोर्वर्त्मनि निवर्त्तंते पुनः पु
नरापतंतीत्यर्थः अथ भक्तियोगस्य विष
यभूतं राजविद्याराजगुह्ययोगशब्दवाच्य
मैश्वरं रूपं श्रोतारमभिमुखीकृत्य प्रतिपा
दयति ३॥ मया ततमिदं सर्वं जगद
व्यक्तमूर्तिना मत्स्थानि सर्वभूतानि न चा
हं तेष्ववस्थितः॥ मयेश्वरेणाधिष्ठानभू

तेनस्वाविद्रूपिणाइदमिदन्तयाभासमा
नेसर्वकार्यकरणात्मकंप्राहतेजगतत्वं
व्याप्तम् इदमहमितीदंतान्यकारेण
ऽहंतयाच्छादितम् ननुत्वयावासुदेवेन
परिच्छिन्नेनसर्वंजगत्कथंव्याप्तंप्रत्यत
विरोधादितिनेत्याह अव्यक्तमूर्तिनाअ
व्यक्तातीन्द्रियास्वप्रकाशाद्वयसच्चिदानंद
रूपामूर्तिर्यस्यतेनतथाविदेन ननुजीवे
नैवनत्संवेदनद्वारेणतादात्म्यमापन्नेन
सर्वमिदंततमितिश्रूयते तदुक्तम् य
स्मात्सर्वमयोजीवःसर्वभावसमुद्भवात्
तत्संवेदनरूपेणतादात्म्यप्रतिपत्तितइति
तत्कथंत्वयेश्वरेणततमित्याशंक्यजीवा
नामप्यहमेवाधिष्ठानमित्याह मत्स्था
निसर्वभूतानिमयिवोधरूपेहन्ताप्रत्य
येसामान्यस्पन्देसमष्टिरूपेसर्वाणिचरा
चररूपाणिभूतानिस्थितानिस्थितिंभजि
भवंति अन्यस्यप्रतिष्ठापाभावोविद्यमान
त्वात् नहिनिरात्मकंकिंचिद्भूतंव्यवहा
रायकल्पते ननुत्वमेवचेत्तेषांप्रतिष्ठाया

मत्तर्हि भूतान्येव तदाश्रयेणवेदकत्वया
त्वद्रूपाणिजगद्भासुवान्नित्यत आह न
चाहं तेष्ववस्थितः अहमीश्वरस्तेषुमेदे
नप्रतीयमानेषुभूतेषुनैवास्थितः कुतः
तेषांभूतरूपबोध्यात्मकप्रसिद्धतदीय
जडरूपपुरःसरीकारेणतद्विपरीतबोध
स्वभावतिरोधानात् चावधारणे नतुय
द्यपिभूतानिभूतात्मकेजडरूपेगृहीतान्त
म्भावद्वेवाकानितथापितेषांतद्रूपभूता
या अहंतायाःस्फुरणोत्कृतस्तेषुत्वंनस्थि
तइत्याशंक्याह ४ ॥ नचमत्स्थानिभूता
निपश्यमेयोगमैश्वरम् भूतभृन्नचभू
तस्थोममात्माभूतभावनः ॥ भूतानि
जीवामत्स्थानिमयीश्वरेसमष्टिरूपेस्वा
मात्मस्वन्देस्थितानिप्रतिष्ठितानिनैवभ
वंतितेषामविद्यान्यानांततारदृष्टेः अन्य
थाभूतत्वापायादीश्वरत्वनिर्देशः स्यात्
नहिमूढाअविच्छिन्नसंवित्स्वभावंपरमे
श्वरंसमस्तवस्तुपरिच्छेदप्रतिष्ठास्थानं
मन्यते अपितुकृशोदेवदत्तोहमितिदेवे

ष्ठि इदं स्थितामिति मितमेव स्वभावं प्रतिष्ठा
स्यानतया पश्यंति नतु कथमेतद्विरुद्धमि
त्याह पश्य मे योगमैश्वरम् योगो युक्तिर
घटमानघटनाचातुर्यम् एतदेव ममैश्व
र्यं यदेवं निरतिशयाद्भुतहेतुस्वातंत्र्यम्
नतु कुतस्तर्हि भूतानां स्थितिस्तु भवतीत्यत आ
ह भूतभृदिति चोवधारणे ममैवेश्वरस्यो
क्तरूपस्यात्मा परमार्थस्वरूपभूतः स
च्चिदानंदघनः भूतभृद्भूतानि स्थापनेन वि
भर्ति धारयतीति भूतभृत् तथा भूतभावनः
नानाकृतिकर्तृतया भूतोत्पादकः ममैवा
त्मा भूतानां स्थित्युत्पत्तिविधायकः न तत्र पु
रुषो शक्तत्वात् नाप्यतरस्यासंगत्वात्
नापि ब्रह्मतस्य नितरामचलनस्वभाव
त्वात् एवमभिन्ननिमित्तोपादानभूतोपि
ममात्मा परमार्थतो नभूतस्थः अयं भावः
यथा देहं जीवो विभ्रदहंकारेण तत्संश्लि
ष्टस्तिष्ठति एवमहं भूतानि धारयन्नाव
यत्रापि न तेषु तिष्ठामि निरहंकारत्वात्
नन्वेवं चेन्नवात्मा अतो मया सर्वजगत्तत

मितिममात्मेति राहोः शिर इतिवत्कल्पेन
याषष्ठी नन्वेवंचेत्तवात्मा न भूतस्य तर्हि
कारणात्तु प्रवेशं विना कार्यस्थितेरभावा
यथा मृद तु प्रवेशं विना घटस्थितेरभावा
न्मत्स्थानि सर्वभूतानीत्युक्तिर्दुरुपपादेत्या
शंक्य दृष्टांतेन परःस्परमाधाराधेयभावेनन
काप्यनुपपत्तिरितिनिगमयति ५ ॥ य
थाकाशस्थितो नित्यं वायुः सर्वत्रगो महान्
तथा सर्वाणि भूतानि मत्स्थानीत्युपधार
य ॥ यथा सर्वत्रगतो महान्वायुर्नित्यमा
काशे आधारे स्थितस्त्राधेयत्वमापन्नः तथा
सर्वाणि भूतानि मत्स्थानि मयि दृर्णांकृता
मये आधारे स्थितानि आधेयत्वमामानी
त्युपधारय प्रमाणेन तु अयस्व अथवा यद
दाकाशवाय्वोरविनाभाविन्यपि संबंधेन
ज्ञानविभ्रमः स्वरूपताश्रूयते एवं सक
लं संसारविसार्यपि भगवत्तत्त्वेन सर्वज्ञन
विषयमिति एवमुत्पत्तिकालेस्थिति
कालेचभूतेषु स्वात्मनोसंसंगमुक्त्वाप्र
लयेपितमाह ६ ॥ सर्वभूतानिकौंतेय

119

प्रकृतिं यांति मामकीम् कल्पक्षये पुनस्ता
नि कल्पादौ विसृजाम्यहम् ॥ हे कौंतेय स
र्वाणि चराचराणि भूतानि जीवाः कल्पक्ष
ये प्रलयकाले मामकीं मदीयां पेश्वरीं माया
रणां त्रिगुणात्मिकां शक्तिमव्यक्तरूपां यां
ति तत्रैव लीयंते इत्यर्थः नतु साक्षान्मां भूत
प्रकृतिं साक्षिस्वरूपां दिलिंगाम् पुनर्भूयः क
ल्पादौ सृष्टिकाले तानि प्रकृतावविभागा
पन्नानि भूतानि विसृजामि विभागेन व्यन
जिम अहं सर्वज्ञः सर्वशक्तिरीश्वरः कथं सृज
सीत्यपेक्षायामाह ७ ॥ प्रकृतिं स्वामवष्ट
भ्य विसृजामि पुनः पुनः भूतग्राममिमं कृ
त्स्नमवशं प्रकृतेर्वशात् ॥ स्वां प्रकृतिं नि
जे मे स्वां स्वभावं वेयोहालसकं नान्यत्किंचि
त्कारणान्तरमवष्टभ्य परामर्शेनावलम्बे
मं सर्वप्रमाणसन्निधापितं कृत्स्नं चतुर्दश
विधं भूतसमूहं विसृजामि गुणवैषम्यावि
मर्दादिहेतुनाविविधैः स्थूलदेहैः संयोज
यामीत्यर्थः स्वस्याः स्वस्याः प्रकृतेर्वशात्
विविधं सृजामि कथं पुनः पुनः अनादिप्र

गी॰टी॰
१२॰

120

वन्यकल्पादिकालकल्पनयाभूयोभूयः
कीदृशंसत्त्वाद्युद्रेकानुरोधेनावशमविद्या
दिदोषैःपरवशीकृतम् स्वस्वभावमधिष्ठा
यैवसृजामीत्यनेनस्रष्टृरूपेकर्मण्यपिम
ध्येनममस्वरूपविस्मरणमित्यमेवकर्मणि
भावमितिसूचितम् नन्वेवंनानाविधानि
कर्माणिकुर्वतस्तवजीववत्कथंनबंधः
स्यादित्याशंक्याह ८ ॥ नचमांतानिक
र्माणिनिबध्नंतिधनंजय उदासीनवदा
सीनमसक्तंतेषुकर्मसु ॥ तानिसृष्ट्यादी
निकर्माणिमामीश्वरंनिबध्नंतिफलतन्त्रं
नकुर्वंति अत्रहेतुगर्भंविशेषणमाह
तेषुकर्मसुसत्स्वप्यसक्तंतत्रममकर्तृत्वा
द्याग्रहाभावेनानिमग्नंतंकल्पनात्तटस्थ
वदासीनंस्वस्वरूपेविश्रांतं एवमासक्ति
राहित्येनकर्मनबंधकारणमित्युपदिष्टं
ननूदासीनत्वेकर्तृत्वानुपपत्तेःकर्तृत्वे
चौदासीन्यानुपपत्तेःकथमेतद्वचनसं
गतिरित्याशंक्योपपादयति ९ ॥ मया
ध्यक्षेणप्रकृतिःसूयतेसचराचरम् हे

तुनानेनकौंतेयजगद्धिपरिवर्त्तते ॥
मयेश्वरेण सर्वतो दृशिमात्रस्वरूपेण
ध्यक्षेणाधिष्ठानेन साक्षिणा शक्तेन
भूतेन प्रकृतिस्त्रिगुणसाम्यात्मिका स्व
रूपाच्छादनरूपा शक्तिः सचराचरं स्था
वरजंगमात्मकभोक्तृरूपजीवभेदयुक्तं
जगज्जडजातं भोग्यरूपं सूयते जनयति
हे कौंतेयानेनाध्यक्षत्वेन हेतुना जगद्भो
क्तृभोग्यभेदभिन्नं विपरिवर्त्तते सर्गस्थि
तिसंहारप्रबंधचक्रे परिभ्राम्यति यथा
शुक्तिकयाधिष्ठानेन तत्वानवधारण
रूपान्यथाप्रतिपत्तिः रजतत्वभ्रमादय
ति यथा वा राजा कर्त्ता साक्षिभूतेन सता
सैन्यं जयपराजयादिकं विदधाति त
द्वत्प्रकृतिरपि तदुक्तम् अस्य द्वैतेंद्र
जालस्य यदुपादानकारणम् अज्ञानं त
दुपाश्रित्य ब्रह्मकारणमुच्यते इति एव
मद्धुतैश्वर्यैकास्पदमपि १० ॥ अवजानं
ति मां मूढा मानुषीं तनुमाश्रितं परं भाव
मजानंतो मम भूतमहेश्वरम् ॥ मूढा

अविवेकिनोजनामामीश्वरंमनुष्याका
रेणशुद्धसत्वमयीमपितनुंदेहंकारणे
नाश्रितवंतमवजानंतिअवमन्यंते म
नुष्यादिवत्‌ईशाविधसर्गव्यतिरिक्त
ईश्वरोयोनोपलभ्यंतेसकथमस्तीति
कुतइत्याह ममपरंप्रकृष्टंभावंपारमा
र्थिकंस्वभावमजानंतोनुपलभमानाः
कीदृशंभूतानांमहांतमीश्वरंस्वातंत्र्ये
णयथेष्टविनियोक्तारम् किंच ११ ॥
मोघाशामोघकर्माणोमोघज्ञानाविचे
तसः राक्षसीमासुरींचैवप्रकृतिंमोहि
नींश्रिताः ॥ तेषांकर्मज्ञानमाकांक्षा
चसर्वंनिष्फलमवस्तुविषयत्वात् य
तोविचेतसोविवेकशून्याः तथासुरीमु
द्रिक्तरजस्कांकामदर्पादिबहुलांराक्षसी
मुद्रिक्ततमस्कांहिंसादिबहुलांमोहनींस
स्वभावाच्छादिकांप्रकृतिंस्वभावमाश्रि
ताःसंतोमामवजानंतिइतिशेषेणा
न्वयः केपुनस्त्वांभजंतेइत्यतआह
१२ ॥ महात्मानस्तुमांपार्थदैवीप्रकृ

तिमाश्रिताः भजंत्यनन्यमनसो ज्ञात्वा भू
तादिमव्ययम् ॥ तेभ्यो वैलक्षण्ये दै
वीं सात्त्विकीं शमदमादिलक्षणां प्रकृतिं
स्वभावमाश्रिता जनाश्चानन्यमनसो न वि
द्यतेऽन्यस्मिन्काम्ये फलादौ मनो येषां ता
दृशाः संतः शास्त्रतो गुरूपदेशतो वा मामु
क्तलक्षणमीश्वरं ज्ञात्वा प्रमाणेन निश्चित्य
भजंति परप्रेमास्पदीकृत्योपासते कीदृ
शं मां भूतादिं भूतानां चराचराणामादिं
कारणं तथाव्ययमक्षयं ते तु महात्मानः
सर्वोत्तमाः अथ तादृशभक्तनिर्देशे भ
जनलक्षणमाह १४ ॥ सततं कीर्तयंतो
मां यतंतश्च दृढव्रताः नमस्यंतश्च मां भ
क्त्या नित्ययुक्ता उपासते ॥ तादृशा महा
त्मानो नित्ययुक्ता नित्यं न तु परिमितं का
लं युक्ताः स्वात्मनि समाहिताः संतो मामु
क्तस्वरूपमीश्वरं भक्त्यात्युत्कृष्टप्रेमाति
शयेनोपासते सेवंते विशेषणद्वारेणो
पासनालक्षणमाह सततं सर्वदा मां
कीर्तयंतो मंत्रजपस्तुत्यादिना घोषयं

गी॰टी॰
१२२

122

तः न्यायतंतो ध्यानादिना यतमानाः
न्यान नमस्यंतश्च प्रह्वीभवंत एवं दृढ
व्रताः कीर्तनप्रयत्ननमस्कारेषु वाङ्म
नःकायव्यापारेषु एकविषयेषु दृढ
मचलं व्रतं संकल्पो येषां ते एवं भजन
लक्षणामुक्त्वान्यप्रकारानाह १४ ॥ ज्ञा
नयज्ञेन चाप्यन्ये यजंतो मामुपासते ए
कत्वेन पृथक्त्वेन बहुधा विश्वतोमुखं ॥
अन्येषूक्तेभ्यः प्रसिद्धभक्तिप्रकारेभ्यो
विलक्षणा अपि जना वासुदेवः सर्वमि
त्येवं सर्वात्मदर्शनं ज्ञानं तदेव यज्ञस्तेन
यजंतो मामेव भजंतो उपासते सेव
न्ते चोपचारेण अन्यं प्रकारमाह एकत्वे
न सोऽहमित्यभेदभावनया पृथक्त्वेन दा
सोऽहमिति बहुधा विचित्राकृति भिन्न
रूपतया ब्रह्मविष्णुमहेश्वरपरशुरामादी
नां साकाररूपेण यतो वस्तुतो मां कीदृ
शं विश्वतोमुखं विश्वतः सर्वत एव तत्र
उपासनीयद्वारेण मुखं स्वरूपमित्याकार
णं यस्य तं नतु सगुणोपासनेन कथंनि

गुणोपास्तिरित्याशंक्यात्मनो विश्वरूपत्वेन सग
णात्वमपि प्रपंचयति चतुर्भिः १५॥ अहं क्रतु
रहं यज्ञः स्वधाहमहमौषधम् मन्त्रोहमह
मेवाज्यमहमग्निरहं हुतम्॥ अहं क्रतुस्त
मेदेवतासंप्रदानः श्रौतोग्निष्टोमादिः यज्ञः
स्मार्तो वैश्वदेवपंचयज्ञादिः स्वधापित्रर्थं श्रा
द्धादिः औषधमोषधिप्रभवं यज्ञोपकरण
द्रव्येष्वन्नमन्नम् मंत्रो देवतासंमुखीकर
णादिवाचको वर्णसमूहो विशेषरूपो या
ज्याशस्यापुरोनुवाक्यादिभेदभिन्नः आज्यंत
पणाद्रव्येषूत्कृष्टं मन्त्रपूतं घृतम् अग्निर्योग
क्रियासाधनमाहवनीयादिः हुतं होमकर्म
एतत्सर्वमहं परमेश्वर एव एतेन जडवर्गोप्य
हमेवेत्युपलक्षितम् किंच १६॥ पिताम
हमस्य जगतो माता धाता पितामहः वेद्यं पवि
त्रमोंकार ऋक्साम यजुरेव च॥ अस्य प्रमेय
स्य जगतश्चराचरस्य पिता माता चाहमेव मू
लकारणत्वात्तस्य योगक्षेमोद्वाहनाच्च धाता
कर्मफलविधाता पितामहः कारणानाम
पि कारणं वेद्यं ज्ञेयं वस्तु परब्रह्माख्यं पवि

त्रैशोधकः ओंकारःपरब्रह्मवाचकःप्रणवा
ख्यः तत्प्रभवाणिचऋक्सामयजूंषिअहमेव
चकारादथर्वांगिरसोपिगृह्यंते किंच १८॥
गतिर्भर्ताप्रभुःसाक्षीनिवासःशरणंसुहृत्
प्रभवःप्रलयस्थानंनिधानंबीजमव्ययम्॥
गम्यतेपरंब्रह्मानेनेतिगतिरुपायः सचत्रि
विधःआणवशाक्तशांभवभेदात् तल्लक्ष
णंचोक्तंश्रीमालिनीविजये आकिंचिच्चिंत
कस्येत्यादि अथवागम्यतेइतिगम्यंब्रह्मैवं
मोक्षापरपर्यायंधाम तथाचश्रुतिः तेजोविं
दुःपरंध्यानंविश्वातीतंहृदिस्थितम् आण
वंशांभवंशाक्तंस्थूलंसूक्ष्मंपरंचयत् भर्तापो
षईश्वराख्यःप्रभुःयथेष्टविनियोक्ताअंतर्या
मिलक्षणःसाक्षीशुभाशुभकर्मद्रष्टाअक्षरा
भिधानःकूटस्थःनिवासोभोगस्थानंजीवाभि
ख्यः शरणंप्रपन्नानामार्तिहृत् उपासनीयो
देवतासुहृत् उपास्यद्वारेणहितकर्ताएतेह
मेव तथाप्रभवःस्रष्टाप्रलयःसंहर्तास्थान
स्थितिरेतैरेतेनकारणत्रयात्मकोहमेव नि
धानंसर्ववस्त्वधिकरणंपरशक्तिरूपमहमे

व तदुक्तं परात्रिंशिकायां यथा न्यग्रोधबी
जस्थः शक्तिरूपो महाद्रुमः तथा हृदयबी
जस्थं जगदेतच्चराचरमिति हृदयं च शक्तिः
तदुक्तं सैषा सारतया प्रोक्ता हृदयं परमेष्ठिन
इति अव्ययमविनाशिनं व्रीह्यादिबीजव
द्विनश्वरं बीजं जगत्कारणमपरशक्तिरूपं प्र
धानमहमेव एतेन पंचविधकृत्यकर्ताहमे
व किंच १८ ॥ तपाम्यहमहं वर्षं निगृह्णा
म्युत्सृजामि च अमृतं चैव मृत्युश्च सदसच्चा
हमर्जुन ॥ आदित्यात्मना निदाघसमये त
पामि जगत्संतापं करोमि वर्षं वृष्टिं निगृह्णा
मि निरुणध्मि उत्सृजामि विमुंचामि च अमृतं
जीवनं मृत्युर्नाशश्चाहमेव किं बहुनोक्तेन य
त् स्थूलं दृश्यं यत्सूक्ष्ममदृश्यं तत्सर्वमह
मेव उक्तं निष्कामतया भजमानानां मत्स्व
रूपफलमुक्ता ये त्वेवंभूतं सगुणं निर्गुणं वा मा
मीश्वरं सकामतया भजमानास्तेषां जन्ममृत्यु
प्रवाहो दुर्वार इत्याह १९ ॥ त्रैविद्या मां सोम
पाः पूतपापा यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयंते ते पु
ण्यमासाद्य सुरेंद्रलोकमश्नंति दिव्यान्दिवि दे

गी॰टी वभोगान् ॥ तिस्रः ऋग्यजुःसामलक्षणा वि
१२४ द्या अधीयते विदंति वा त्रैविद्याः तव्येतया ब्रा
ह्मणादयस्त्रैवर्णिका याज्ञिका मामीश्वरं सगु
णं निर्गुणं वा इष्ट्वा संपूज्य स्वर्गतिं देवलोकप्रा
प्तिं प्रार्थयंते उपयाचंते कीदृशाः संतः सोम
पा यज्ञशेषं सोमं पिवन्तीति सोमपाः अतए
व पूतपापा निरस्तस्वर्भोगप्रतिबन्धकपापाः
ते तथाविधा देहांते नुष्ठितकर्मोपनतं पुण्यं
124 पुण्यफलरूपं सुरेंद्रस्य लोकं स्वर्गलोकमा
साद्य प्राप्य दिवि स्वर्गे दिव्यान् उत्तमान् देवभोगा
न् अश्नन्ति भुंजते ततश्च २० ॥ ते तं भुक्त्वा स्वर्ग
लोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशंति
एवं त्रयीधर्ममनुप्रपन्ना गतागतं कामकामा
लभंते ॥ ते सकामास्ते प्रार्थितं विस्तीर्णं स्वर्ग
लोकं भुक्त्वा तत्सुखमनुभूय तद्भोगजनके सु
कृते नष्टे तद्रूपकालातिवाहनात्क्षीणे सति
मर्त्यलोकं गर्भवासादिदुःखाश्रयं कर्मभूमिं
स्वकर्मशेषानुरूपजातिविशेषाश्रयणेन
विशंति प्रतिपद्यंते एवमनेन क्रमेण त्रयीध
र्मं वेदोक्तं स्वसमाचारमनुप्रपन्नाः समाश्रिताः

स्तेतः कामकामाः स्वर्गादिभोगान्कामयमाना
स्त्रैवर्णिकागतागतंस्वर्गादौगमनंभूय
स्ततः कर्मभूमावागमनंलभंते नत्वनुपम
मविनाशिनंमोक्षानन्दम् तदुक्तंकुलार्णवे
जनः कृत्वेहकर्माणिसुखदुःखानिभुंजते
परत्रात्तानिनोदेवियांत्यायांतिपुनःपुनरिति
नतुसकामानामैहिकामुष्मिकफलप्राप्तिरु
क्तानिष्कामानांत्वद्भक्तानांमोक्षरूपंफले
प्रतीक्षमाणानांकथंचमोक्षस्तत्राह २१॥

अनन्याश्चिंतयंतोमांयेजनाःपर्युपासते
तेषांनित्याभियुक्तानांयोगक्षेमंवहाम्यहं॥

येजनाजननधर्माणोब्रह्मादिकीटपर्यंता
जन्तवोनन्यानविद्यतेमत्तोतिरिक्तमन्यत्का
म्यंयेषांतेतादृशाःसंतोमामीश्वरंसगुणंनि
र्गुणंवाचिंतयंतोध्यायंतःपर्युपासतेभक्त्यासे
वंते तेषांतादृशानांनित्याभियुक्तानांनित्यं
सर्वदाभियुक्तानांमात्मनिसमाहितानांस
तांयोगक्षेमंतेरप्रार्थितमपिअप्राप्तस्यार्थ
स्यप्रापणंयोगंप्राप्तस्यपरिरक्षणंक्षेमंवहा
मिप्रापयामि नतुस्वर्गायभीस्यादेवताविशे

गी॰टी॰ यंयजन्तोऽदृष्टानन्तमीश्वरंसगुणंनिर्गुणं
१२५ वातत्कथमुक्तंविद्यामामित्यतआह २२॥
येप्यन्यदेवताभक्तायजंतेश्रद्धयान्विताः
तेपिमामेवकौंतेययजंत्यविधिपूर्वकम्॥
अविधिःगर्ह्यायाम् येजनाअन्यदेवतानांमहि
लत्वगात्तद्देवतानांभक्ताःसंतोस्तथाश्रद्ध
योपेताःसंतोपियजंतेस्वर्गादिप्राप्तिहेतोर्या
गमनुतिष्ठंति नकेवलेमद्भक्ताएवमांयजं
तेयावंतेपीशद्रुपासकामामेवतत्तद्देवता
न्तर्यामिणमीश्वरमेवयजंतिकिंत्वविधिपू
र्वकम् यथादेहाद्यपरिच्छेदेनवर्तमानस्य
ममयागविधिर्नतथातेषांदेहपरिच्छिन्नदे
वतानिष्टदृष्टित्वात् अतोमद्भक्तस्तेषांवैल
लण्यम् अत्रहेतुमाह २३॥ अहंहिसर्व
यज्ञानांभोक्ताचप्रभुरेवच नतुमामभिजा
नंतितत्वेनातश्च्यवंतिते॥ हियतोहंसर्वेषां
देवपित्रादिसंप्रदानानांयज्ञानांभोक्ताचया
जकदत्तद्रव्यस्वीकर्ताचास्मिप्रभुःस्वामीय
ज्ञफलदाताचाहमेवतत्तद्देवतांतर्यामित्वा
त् अतोमामेवयजंति अविधिपूर्वकमित्यु

125

स्माद्धेतमाह नविति तद्देवताव्यतिरेकेते
देवताभक्तामांतत्त्वतोविछिन्नतत्तद्देवतावि
लक्षणंतत्त्वेनोकस्तत्ताऽनयाथात्म्येननाभि
जानंतिननिश्चिन्वंति अतोहेतोस्तेदेवतो
पापकाश्च्यवंति मोक्षात्प्रोदत्तनरात्मरूपा
र्थाद्धिभ्रश्यसंसारेपरिभ्रमंति नत्रयदिदेव
तायद्देशेनापियजनंपरमार्थतस्त्वद्यजन
मेवतर्हिकिमितितेषामंतवतोस्वर्गादिप्राप्ति
र्नत्वविनाशत्वत्पदावाप्तिरित्यतआह २४ ॥
यान्तिदेवव्रतादेवान्पितॄन्यान्तिपितृव्रताः
भूतानियांतिभूतेज्यायांतिमद्याजिनोपिमाम् ॥
देवानांव्रतंसंकल्पोयेषांतेयाजकादेवान्यां
तितल्लोकभाजोभवंतीत्यर्थः पितॄणांव्रतं
संकल्पोयेषांतेयाजकापितॄन्यान्ति भूतानां
यक्षराक्षसादीनांसंकल्पेनेज्यायागोयेषांतेभू
तानियांति ममेश्वरस्यसंकल्पेनयजनशीला
अपिशब्दात्तदुद्देशेनापिमत्संकल्पेनयजन
शीलामामीश्वरंयांतिमद्रूपाःसंपद्यंते सश
मयागोदेवतादियागवत्प्रानाद्रव्यसंभारसा
पनोनैवेत्याह २५ ॥ पत्रंपुष्पंफलंतोयंयो

126

मे भक्त्या प्रयच्छति तदहं भक्त्युपहृतमश्नामि
प्रयतात्मनः ॥ यो मद्भक्तः पत्रादिकं मे मह्यं
सम्प्रदानाय सर्वान्तर्यामिणे ईश्वराय देवावि
शेषत्वादिपरिच्छेदराहित्ये ताय भक्त्या समर्पय
ति प्रयतात्मनः प्रयतः शुद्धः विमर्शात्यागे
नेदेहाद्यभिमानाकलाषित आत्मा यस्य तस्य
भक्तस्य तत्पत्रादिकं भक्त्या समर्पितमश्नामि
प्रीत्या स्वीकरोमीत्यर्थः भक्तेः पुनर्ग्रहणम
शनं प्रत्यतिशयेन साधकतमत्वसूचनार्थम्
आसंतां तावन्मदर्थं पत्रादयस्त्वेवं प्रयासल
वः २६ ॥ यत्करोषि यदश्नासि यज्जुहोषि द
दासि यत् यत्तपस्यसि कौन्तेय तत्कुरुष्व म
दर्पणम् ॥ यत्स्वभावात्करोषि यच्चाश्नासि
स्वात्मने समर्पयासि यच्च देवताद्युद्देशेन जु
होषि श्रौतं स्मार्तं वा होमं निर्वर्तयसि यच्चापि
त्वमन्नाद्याद्युद्देशेन ददासि यच्च पापानिवृत्तये
तपस्यसि चान्द्रायणादितपश्चरसि तत्सर्वम
स्मोपदेशेन मदर्पणं कुरुष्व एवं भक्तोपप
न्नायाः किं चित्कुर्वतो यत्फलं तदाह २७ ॥
शुभाशुभफलैरेवं मोक्ष्यसे कर्मबन्धनैः संन्या

सयोगयुक्तात्माविमुक्तोमामुपैष्यसि ॥ एव
मुक्तयुक्तात्मातिष्ठंस्त्वंकर्मबन्धनैः कर्मनिबन्ध
नैरिष्टानिष्टैःफलैर्मोक्ष्यसेत्यक्ष्यसे ततःसंन्या
सयोगेनपूर्वमुक्तलक्षणेनयुक्तःसंवइश्रा
त्मायस्यसततोविमुक्तोजीवन्नेवमुक्तोमामु
पैष्यसिअहमेवेश्वरोविश्वात्मासंपत्स्यसे न
नुभक्तपक्षपातितयातवरागद्वेषादिवैषम्य
प्रसक्तिरितिशंकापनोदायतदभावमुपपा
दयति २८ ॥ समोहंसर्वभूतेषुनमेद्वेषोस्ति
नप्रियः येभजंतितुमांभक्त्यामयितेतेषुचा
प्यहम् ॥ अहमीश्वरोहंतयाप्रत्यभिज्ञेयःस
र्वेषुचतुर्दशविधेषुभूतेषुप्राणिषुसमोचिद्रू
पतयानिर्विशेषोविपर्यस्तः ननुतमभूतेषु
नवाहंतयाभवनमुचितमथमभूतेषुनवस
त्वमसमंजसमित्यत्राहंतमाह नमेद्वेषोस्ति
नप्रियःकश्चिदपिसवितुरस्यवगगनमंडलव्या
पिनःप्रकाशस्यतःपक्षान्तरेयेतुमामीश्वरंभ
क्त्यापरप्रीत्याउपासनयापरामृशंति तेम
य्यभेदेनवर्ततेषुचाहमभेदेनवर्तते येषुन
रभक्त्यामत्स्वरूपविमर्शहीनास्तेषामात्मतया

ऽसन्नपियोजनलक्षांतरितः यथाग्नेः स्वसे
वकेष्वेवतमःशीतादिदुःखमपाकुर्वतोपि
नवैषम्यंयथावाकल्पवृक्षस्यतथैवभक्तपक्ष
पातिनोपिममनास्त्येववैषम्यंकिंतुभक्त्याम
त्परामर्शस्यैवायंमहिमेति अपिचेमत्परा
मर्शस्वरूपस्योपासनस्यातितर्क्यः प्रभावइतिदर्श
यन्नाह २९ ॥ अपिचेत्सुदुराचारोभजतेमा
मनन्यभाक् साधुरेवसमंतव्यःसम्यग्व्यव
सितोहिसः ॥ यद्यतिशयेनदुराचारोपिक
श्चिदनन्यभाक् नान्यत् देवतांतरंमत्पृथ
क्त्वेनभजमानः अथवान्यत्फलविशेषंनभ
जमानःमामीश्वरंभजतेउपास्ते तर्हिससाधु
रेवसदाचारएवमन्तव्योबोद्धव्यः यतःसम्य
गविपर्यस्तनयाव्यवसितोगृहीतात्मनिश्च
यः अतःस्वस्वरूपपरिज्ञानंविनेश्वरविषयो
पासनारूपाभक्तिर्दुर्घटा॥ ननुकथंसमीची
नाध्यवसायमात्रेणसाधुर्बोद्धव्यस्तत्राह ३०॥
क्षिप्रंभवतिधर्मात्माशश्वच्छांतिंनिगच्छति
कौंतेयप्रतिजानीहिनमेभक्तःप्रणश्यति ॥
सत्वरंदुराचारोपितिसमात्मनिश्चयानन्तर

मेवधर्मात्माधर्मविरोधीभवति तथाशश्वच्छां
तिंपरमेश्वरनिष्ठारूपंलोभोपशमंनिगच्छति
प्राप्नोति कुतर्ककर्कशवादिनोनैनमन्येर
न्निति शंकाव्याकुलमर्जुनंप्रोत्साहयति हे
कौंतेयपटहादिमहाघोषपूर्वंविवदमाना
नांसभांगत्वाबाहुमुत्क्षिप्यनिःशंकंप्रतिजा
नीहि प्रतिज्ञांकुरु कथंममेश्वरस्यभक्तोय
थोक्तेनन्यायेनमदुपासकः सुतरांदुराचा
रोपिनप्रणश्यतिअधोगतिंनाप्नोति अपि
तुकृतार्थएवभवतिनकेवलंदुराचारएव
मद्भक्त्यामोक्षमाप्नोतिअपितु ३१॥ मांहिपा
र्थव्यपाश्रित्ययेपिस्युःपापयोनयः स्त्रियोवै
श्यास्तथाशूद्रास्तेपियांतिपरांगतिम् ॥
हिप्रसिद्धोप्रसिद्धमेतदित्यर्थः हेपार्थमा
मीश्वरंभक्त्याश्रित्ययेपिपापयोनयः पापपा
पकर्मविपाकजापरहिंसादिपरावायोनिर्ज
न्मयेषांतेपशुपक्षिसरीसृपान्त्यजादयोपि
स्युर्भवेयुः तथास्त्रियइत्यस्ताः वैश्याः कृष्यादि
वटकर्मरताः शूद्राः कात्स्न्येर्नवैदिककर्मोत्
विहीनाः परंतत्रहूनयस्मात्तेप्यपुनरावृत्तिपद

वीर्यांतिप्राप्नुवंति अत्र च गजेंद्रमोक्षणादी
निचरितानिपरमकारुणिकस्य भगवतः सं
वादकानिश्रूयंते एवं चेत् ३२ ॥ किं पुनर्ब्रा
ह्मणाःपुण्याभक्ताराजर्षयस्तथा अनित्यम
सुखंलोकमिमंप्राप्यभजस्वमाम् ॥ पुण्याः
सुकृतिनोब्राह्मणाउत्कृष्टयोनयोः तथाराज
र्षयः राजानःक्षत्रियास्तेतेपवर्गभागित्वाद
स्य यस्य भक्ताः संतः परांगतिं यांतीति किमुव
क्तव्यम् अतोऽस्मिन्लोकंसर्वपुरुषार्थसा
धनयोग्यमतिदुर्लभंमनुष्यजन्मसुकृतापुण्यो
पचयेनासाद्यमामीश्वरंभजस्वपापःस्वयतोनि
त्यमसुखंतस्मात्विलम्बमकृत्वा तथासर्वंसर्वा
र्थोद्यमंचहित्वामामेवभजस्वेत्यर्थः तदुक्तं
कुलार्णवे अत्रजन्मसहस्राणांसहस्रैरपि
पार्वति कदाचिल्लभतेजंतुर्मानुष्यंपुण्यसं
चयम् सोपानभूतंमोक्षस्यमानुष्यंप्राप्यदुर्ल
भम् यस्तारयतिनात्मानंतस्मात्पापकरोऽत्र
क इति अश्वःकार्यमद्यकुर्वीतपूर्वाह्णेचापरा
ह्णिकम् नहिमृत्युःप्रतीक्षेतकृतंवाप्यथवा
कृतमिति अथभाजनस्वरूपंदर्शयन्नुपसंह

128

डि·ति
४५।

इति यत्र ॥ मन्मनाभवमद्भक्तोमद्याजी
मांनमस्कुरु मामेवैष्यसियुक्त्वैवमात्मा
नंमत्परायणः ॥ एवंविधोममेश्वरस्य
भक्तउपासकंभव कीदृशोमन्मनाःम
यिप्रतीचिमनोमननात्मकमंतःकरणं
यस्यसः तथामद्याजीमदर्पणार्थमेवा
स्तोपपत्त्यायजनशीलः यजनमत्रसर्व
स्यकायिकस्यकर्मणउपलक्षणम् तथा
मामीश्वरंसामान्यस्यन्दंसमष्टिरूपंनमस्कु
रुनमस्कारोत्रवाचिकस्यकर्मणउपलक्ष
णं एवंमनोवाक्कायव्यापारैर्मत्परायणो
हमेवचिद्रूपःएकंशरणंयस्यसईदृशः
सन्नतपरिच्छिन्नदेहादिनिष्टदृष्टिरात्मा
नंप्रत्यगात्मानंयुक्त्वाएवंभक्तप्रकारेण
योगेनसमाधायमामेवपरमानन्दघनं
विश्वरूपमीश्वरमेष्यसिप्राप्स्यसीतिशिवम्
३४ जीवन्मुक्तेर्द्वैतभ्रमजनमायात्वमापय
न्नईश्वरंनवमेयत्नंप्रार्थयेभक्तिमव्ययाम्
इतिश्रीभगवद्गीताटीकायांतत्त्वप्रकाशि
कायांराजानकलक्ष्मीरामविरचिता

योराजविद्याराजगुह्ययोगोनामनवमो
ध्यायः ९ ॥ ॥ नवमेध्यायेमया
ततमित्यादिनोक्तमपिभजनीयमैश्वरंरू
पंपरोक्षत्वयार्जुनेनानवगतप्रायंमत्वा
तस्यभगवद्वचनश्रवणाद्रोमांचादि
लक्ष्यंभक्त्यतिशयत्त्वकमानन्दाविर्भा
वमर्जुनस्यपश्यन्भक्त्यानुग्राहकतयादै
तज्ज्ञासर्वस्वंभक्त्याधीनंकुर्वाणपेश्वरस्वरूप
साक्षात्कारपायभूतंविभूतियोगंतदनु
क्तमपिभक्तिपारवश्येनविवक्षुःश्रीभ
गवानुवाच ॥ भूयएवमहाबाहोश्रृणु
मेपरमंवचः यत्तेहंप्रीयमाणायवक्ष्या
मिहितकाम्यया ॥ भूयएवेतिपूर्वमुक्त
मप्यपरोक्षतयाविस्पष्टीकर्तुंपुनःकथ
मानंपरमंपरमार्थोपलब्ध्युपायभूतंम
मतद्वचःश्रृणु नन्वहश्रुतमप्रतिवचनी
यमित्यत्रहेतुमाह मद्वचसामृतेनत्वे
नप्रीयमाणायभक्त्यतिशयवशेनप्रीतिं
भजतेतेनत्वंभक्तोत्कलायहितकाम्य
याहितस्यप्रक्रांतस्येश्वरस्वरूपस्यप्रापण

त्वयाहंभक्तः प्रीतो वक्ष्याम्युपदिशामि
अतोभक्तपरवशस्यममोक्तिरस्मत्सर्वै
र्नानुपपन्ना नतुब्रह्मादिभिर्देवादि
भिश्चातएवस्वंरूपंयत्रतत्रवर्णितंतत्प
त्वावधारयामः किंपुनः पुनरुक्त्येत्या
शंक्याह १ ॥ नमेविदुः सुरगणाः प्रभवं
नमहर्षयः अहमादिर्हिदेवानांमह
र्षीणांचसर्वशः ॥ ममेश्वरस्यब्रह्मत्व
पतयानिरंजनस्यापिसतः प्रभवंमायो
पहिततयेश्वररूपाभिव्यक्तिंसुरगणाः
ब्रह्मादयोमहर्षयोभृग्वादयश्चनविदु
र्नजानंतितेषांमद्रूपाभिव्यक्तेः पश्चादुत्प
न्नत्वात् पितुरभिव्यक्तिंपुत्रइव अत्रहे
तुमाह हिः प्रसिद्धोऽहमीश्वरोवेदान्ता
भिमतोमायोपाधिकः अनन्तशक्तिमतः
क्रियाशक्त्यैकत्वात्सर्वेषांदेवानां
महर्षीणांचादिः कारणं यतोमदभि
व्यक्तिज्ञानंदुर्लभंतस्मान्मत्स्वरूपज्ञानं
प्रवचनीयंमहाफलत्वादित्याह २ ॥
योमामजमनादिंचवेत्तिलोकमहेश्वरं

गी॰टी॰
१०

130

असंमूढः स मर्त्येषु सर्वपापैः प्रमुच्यते ॥
यः कश्चिद्धीरो महात्मा मामजं नित्यत्वाज्ज
न्मरहितं तथानादिं न विद्यते आदिः पूर्वपु
रुषांतरं यस्य तं तथा लोकानां ब्रह्मादीना
मीश्वराणामपि महांतमीश्वरं पंचविधकृ
त्यरूपेशानशीलं मामीश्वरमुक्तस्वरूपं वे
त्यात्मतयाऽभ्यभिजानाति स मर्त्येषु मर
णादिधर्मविशिष्टेषु सर्वजंतुषु मध्येऽसंमू
ढः भेदप्रथारूपमायीयमोहरहितः सन्स
र्वैस्त्रिविधैः पापैः पुण्यपापात्मभिः कर्मभि
र्योन्यंतरसंचारहेतुभिः प्रकर्षेण मुच्यते
पुनर्देहसंबंधं नाप्नोतीत्यर्थः ननु त्वत्स्व
रूपाभिव्यक्तिज्ञानं कुतोऽर्थ्येदं यतो बुद्ध्या
निश्चीयत एवेत्याशंक्य बुद्ध्यादयो भावा
अपि मत्त एव प्रभवंतीत्याह २ ॥ बुद्धिर्ज्ञा
नमसंमोहः क्षमा सत्यं दमः शमः सुखं दुः
खं भवो भावो भयं चाभयमेव च अहिंसा
समता तुष्टिस्तपो दानं यशो यशः भवंति
भावा भूतानां मत्त एव पृथग्विधः ॥ बु
द्धिः … बोधनसाम

र्थं ज्ञानमात्मविषयोवबोधः प्रत्यभिज्ञा
लक्षणः असंमोहः अनात्मन्यात्मप्रत्ययरूप
विपर्यासाभावः क्षमासहिष्णुतयानिर्विका
रचित्तता सत्यंहितपर्यवसायियथार्थभा
षणं दमोबाह्येंद्रियसंयमः शमोंतःकर
णसंयमः सुखमनुकूलवेदनीयं दुःखंप्र
तिकूलवेदनीयं भवउत्पत्तिः अभावस्तद्वि
पर्ययः भयंत्रासः अभयंतदभावः अहिंसा
परपीडानिवृत्तिः समताहर्षविषादराहित्यं
तुष्टिर्दैवलब्धेनसन्तोषःपर्याप्तबुद्धिः तपो
वाङ्मनःकायनिवर्त्यो नियमविशेषः दानं
न्यायार्जितधनादेःपात्रेतर्पणं यशःसत्कीर्त्ति
रयशोदुष्कीर्तिः एतेबुद्ध्यादयश्चकारात्तद्वि
परीताश्चान्येपिभावानानाविधाःप्राणिनां
स्वकर्मानुसारेणमत्तःसकाशादेवभवंति
अतोमदभिव्यक्तिर्देवादीनामपिदुरवधारा
किंच ४।५॥ महर्षयःसप्तपूर्वेचत्वारोम
नवस्तथा मद्भावामानसाजातायेषांलोक
इमाःप्रजाः॥ सप्तभृग्वादयोमहर्षयःसप्त
ब्रह्मणइतिपुराणप्रसिद्धाः तथातेभ्योपि

पूर्वेन्येचत्वारोमहर्षयःसनकादयःतथा
मनवःस्वायम्भुवादयश्चतुर्दश मद्भावाम
त्प्रभावउत्पत्तिर्येषांते कथमित्याह मानसाः
संकल्पमात्राज्जाताःनतुयोनिजाःतथाचपुरा
णे भृगुंमरीचिमत्रिंचपुलस्त्यंपुलहंक्रतुं
वसिष्ठंचमहातेजाःसोसृजन्मनसासुतानि
ति एवंमहर्षीणामपिममैवप्रभवत्वान्मद
भिव्यक्तिपरिज्ञानंकाकथान्येषांतदुपरका
लभाविनामित्याह जाताइति येषांभृग्वादी
नामिमाब्राह्मणाद्यालोकेवर्तमानाःप्रजाज
न्मनाविद्ययाचसन्ततिभूताःप्रवर्त्तन्ते एवंवि
भैश्वर्यज्ञानफलमाह ७॥ एतांविभूतिंयो
गंचममयोवेत्तितत्त्वतः सोविकम्पेनयोगे
नयुज्यतेनात्रसंशयः॥ ममेश्वरस्यैतांयथो
क्तांविभूतिंभृग्वादिरूपेणविशिष्टतयावि
विधत्वेनवाभवनंयोगंचतासुविभूतिषुम
हात्म्यमितिलक्षणेषुकिंचतत्त्वतस्तत्त्वज्ञाना
नन्दबोधेनबोधेनयोवेत्तिसाक्षात्करोतिसो
विकम्पेननिष्कम्पत्वेनयोगेनसमाधिनायु
ज्यतेसंबध्यते नात्रार्थेयोगादप्रच्युतिरूपे

कश्चित्तत्रेदृशः ननु कथं कामेव स्वात्मानमिति
च्यते इत्याशंक्यामेव नेतत्कथनमात्रं यतोऽ
हमितएव मामेवं ज्ञात्वोपासते इत्याह ७ ॥
अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते इति म
त्वा भजंते मां बुधा भावसमन्विताः ॥ अहमी
श्वरः सर्वस्य जगतः प्रभवः कारणमुपादानं
निमित्तं च मत्त एव सर्वं स्थितिनाशादि च प्र
वर्तते भवति इत्येवंविधैश्वर्ययुक्तं मामीश्व
रमत्वा प्रमाणेन निश्चित्य बुधा आत्मबोधयु
क्ता भावसमन्विताः प्रीतियुक्ताः संतो भजंते
समुपासते इति तेषां प्रीतिपूर्वं भजनस्वरूप
माह ८ ॥ मच्चित्ता मद्गतप्राणा बोधयंतः प
रस्परम् कथयंतश्च मां नित्यं तुष्यंति च रम
न्ति च ॥ व्यमच्चित्ता अनुत्यानेन मय्येव प्रती
चि चित्तं विमर्शरूपमंतःकरणं येषां ते त
था मद्गतप्राणाः समाधिदशायां मय्येवात्म
निगताः संलीनाः प्राणा दशविधाश्च सर्वो ये
षां ते तडल्कम् ङः वेदो मेनस्यांगमेजयत
श्वासप्रश्वासाविक्षेपसंरंभवः अत्रभाष्यम्
विविसमाचिमस्येते भवंति समाहितस्य तेनेति

तथा च शिवोपनिषदि तामाश्रित्योर्ध्वमार्गे
णसोमसूर्याग्निभावपि सौषुम्णेणाध्वन्यस्तानि
तोऽहित्वाब्रह्माण्डगोचरमिति तथा च कुलार्ण
वे योगिनिरूपणावसरे प्राणप्रवायसंचारः
पावक इव निश्चलः प्राज्ञो वै कामो मत्तो यो
गी योगविदुच्यते निःस्पन्दकरणग्रामः स्वात्म
लीनमनोनिलः यत्रास्ते स तथा तत्वात्तज्जीवन्मु
क्तः स उच्यते इति तथा मामीश्वरमेश्वररूपस्था
न संक्रमणाय परस्परं बोधयन्तो न्यायोपेतैः
श्रुत्यादिप्रमाणैर्ज्ञापयन्तः तथा मामीश्वरं
कथयन्तश्च मे श्रवणस्मरणैः कृष्णोषयन्तो नित्य
मेवंविधाः संतस्तुष्यन्ति चैतावतैव लब्धसर्वा
र्थावयमलमन्येन लब्धव्येनेत्येवं प्रत्येवं प्रत्य
यरूपं संतोषं प्राप्नुवंति रमन्ति च निर्वृतिं यां
ति एवं भजनस्वरूपमुक्त्वा तत्फलं चाह ९॥
तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् द
दामि बुद्धियोगं तं येन मामुपयांति ते ॥
तेषां बुधानां सततं तत्परिमितं कालं युक्ता
नामात्मनि समाहितानां तथा प्रीतिपूर्वकं
मद्विषयपरमस्नेहपूर्वकं न तु लाभपूजाख्या

न्यायर्थं भजतामुपासीनानां तमलौकिकं
बुद्धिरैश्वररूपविषयं सम्यग्दर्शनं तत्र योगं
समाधानं समावेशरूपं ददामि तं कमित्या
त्मबुद्धिसकाशाद्व्यतिरेकमाह येनेति येन
करणभूतेन ते भक्तियुक्ता बुधा मामीश्वरमु
पयांति आत्मत्वेन प्रतिपद्यंते तेषां बुद्धियो
गदाने क्रमेणावांतरव्यापारमाह १० ॥ तेषा
मेवानुकम्पार्थमहमज्ञानजं तमः नाशया
म्यात्मभावस्थो ज्ञानदीपेन भास्वता ॥ तेषा
मेव बुधानामनुग्रहार्थमात्मभावेनात्मत्वेन
स्थितः यद्यपि सर्वगतोहमेकएव तथापि या
नेवानुगृह्णामि तेषामेवात्मत्वेन व्यापकं स्व
मैश्वरं रूपं दर्शयामि तथा च श्रुतिः यमेवैष
वृणुते तेन लभ्य इति अज्ञानात्तत्त्वाप्रतिपत्ते
र्जातं तमो भिन्नवेद्यप्रथारूपं मायीयमलाख्य
मंधकारं नाशयामि प्रध्वंसयामि केन ज्ञानदी
पेन ज्ञानं सर्वात्मत्वदर्शनरूपं तदेव दीपस्तेन
भास्वता नित्यं प्रकाशाविष्टकेन अथ भगव
दुक्तं स्वात्मनः प्रभावातिशयं श्रद्दधानो विभू
तीः संक्षेपेणोक्ता अपि उपासनार्थं विस्तरेण

पुनस्ताः श्रुत्वा प्रभावातिशयाभ्युपगमपू
र्वमर्जुनउवाच ॥ परंब्रह्मपरंधामपवित्रं
परमंभवान् पुरुषंशाश्वतंदिव्यमादिदेवम
जंविभुम् ॥ परंब्रह्मोत्कलक्षणंपरमत्युत्कृष्टं
धामाश्रयः मोक्षाख्यः परमंपवित्रमुत्तमंवा
सनात्रूपंकलंकशोधकंभवानेव कुतइत्यत
आहु पुरुषमिति यतः शाश्वतंसर्वदैकरूपं
दिव्यंद्योतनशीलंस्वप्रकाशं आदिदेवमादि
श्चासौदेवश्चदेवानामादिभूतमित्यर्थः अजं
जन्मरहितंविभुंव्यापकंच १२ ॥ आहुस्त्वामृ
षयः सर्वेदेवर्षिर्नारदस्तथा असितोदेवलो
व्यासः स्वयंचैवब्रवीषिमे ॥ एवंविधंपुरुषं
पुरुषोत्तममभीश्वराख्यंमामेवममपुरोवर्ति
नंवसुदेवात्मजंसर्वेऋषयः साक्षात्कृतत
त्वाभृगुवसिष्ठादयः तथादेवर्षिर्नारदोसितो
देवलः व्यासश्चकृष्णद्वैपायनश्चाहुः कथयं
ति आस्तांतावदन्यउक्तिः स्वयमेववचनंमह्यंब्र
वीषि सर्वेऋषयइत्युक्तेपिनारदादीनांग्रह
णमतिवैशिष्ट्यार्थं नकेवलंवचनमा
त्रेणैतदभ्युपगतमपियावत्त्वंभावनयापी

133

त्याह १२॥ सर्वमेतदृतं मन्येयन्मांवदसिके
शव नहिते भगवन्व्यक्तिं विदुर्देवा न दानवा॥
हे केशव यत्त्वमां प्रति कथयसि एतत्सर्वमृ
तं सत्यं मन्ये किमित्याह नहीति हे भगवन्त
व व्यक्तिमैश्वरं रूपेण मिव्यक्तिं देवा दानवाश्च
नहि विदुः नैव जानंति विदुर्देवा महर्षयश्च
पिपादान्तरम् किं तर्हि १३॥ स्वयमेवात्मना
त्मानं वेत्थत्वं पुरुषोत्तम भूतभावन भूतेश
देवदेवजगत्पते॥ अन्यादेरोणवहुधासेवा
पयति हे पुरुषोत्तमेश्वर ईश्वरत्वे हेतुगर्भा
णि विशेषणान्याह हे भूतभावन चतुर्दश
विध भूतोत्पादक हे भूतेश भूतानां पालयंनि
यंतः हे देवानां देवोपासनीय हे जगत्पते
विश्वपालक त्वमात्मानमैश्वरं रूपं स्वयमेव
नान्येन प्रयोजकेनात्मनैव न तु साधनांतरे
णत्वमेव वेत्थ जानासि नान्यः एवकारः सर्व
त्र संबध्यते न तु तिष्ठन्भवदामिक्तकेमहर्षि
भिरथ्यनवगतायाश्रुस्माद्विधानामवबोधने
श्चायदः किं तद्विभूतिः योगस्याविकम्पन
हैतद्भूतयोर्विभूतियोगयोर्ममजिज्ञासात्वा

त्याह १४ ॥ वक्तुमर्हस्यशेषेण दिव्या ह्यात्म
विभूतयः याभिर्विभूतिभिर्लोकानिमांस्त्वं व्या
प्य तिष्ठसि ॥ यास्तवात्मविभूतय आत्मन ए
व विविधत्वेन विशिष्टतया वा भवनरूपाः श
क्तयो दिव्या अत्यद्भुताः संति ताः सर्वा वक्तुम
र्हसि कथयितुं प्रसीदेत्यर्थः कास्ता इत्याह
याभिर्विभूतिरूपाभिः शक्तिभिरिमांल्लोकांश्च
तुर्दशभुवनानि व्याप्यापि त्वमीश्वरस्तिष्ठसि
स्वस्वभावादप्रच्युत एव वर्तसे नतु क्रमाग
मे शक्तिश्च शक्तिमांश्चैव पदार्थद्वयमुच्य
ते शक्तयोस्य जगत्कृत्स्नं शक्तिमांस्तु महेश्व
र इति विभूतिश्रवणे प्रयोजनमाह १५ ॥
कथं विद्यामहं योगिंस्त्वां सदा परिचिंतयन्
केषु केषु च भावेषु चिंत्योसि भगवन्मया ॥
हे योगिन् भेदवैचित्र्यविस्फारे सत्यपि योग
नात्मसमाधानेन नित्याविप्रकृष्टमहं सदा परि
चिंतयन्स्वात्मानं प्रत्यवमृशन् त्वामीश्वरं क
थं विद्यां स्वात्मतयोपलभेय प्रकारमववि
हत्योति केष्विति केषु केषु भावेषु विभूतिरू
पेषु पदार्थेषु मया चिंत्योसि ध्यातव्योसि तत्र

कारमुपदिशेत्यर्थः अतोः १८ ॥ विस्तरेणा
त्मनो योगं विभूतिं च जनार्दन भूयः कथय
तृप्तिर्हि शृण्वतो नास्ति मेऽमृतम् ॥ हे जनार्द
न आत्मनो योगमैश्वररूपसमाधानं सर्वज्ञत्व
मपि भूयः पुनर्वै तत्स्येन मत्वं कथय तथा विभू
तिमैश्वर्यध्यानालम्बनभूतां विस्तरेण मत्वं क
थय न तृप्तस्यार्थस्य किं भूयः कथनेनेत्यत
आह तृप्तिर्यस्मात् मम श्रवणपुटकाभ्यां त्व
द्वाक्यामृतं पिबतस्तृप्तिरलंबुद्धिर्नास्ति अथे
वं विज्ञप्तः श्रीभगवानुवाच १९ ॥ हन्त ते क
थयिष्यामि दिव्या ह्यात्मविभूतयः प्राधान्य
तः कुरुश्रेष्ठ नास्त्यन्तो विस्तरस्य मे ॥ हन्तेत्य
भ्युपगमे बाढमित्यर्थे हे कुरुश्रेष्ठ यास्तव
विभूतयो दिव्यास्त्वया पृष्टाषितास्तास्तुभ्यं बा
ढं कथयिष्यामि किन्तु प्राधान्येन यतो मद्वि
भूतीनां विस्तरस्यान्तो न विद्यते अतः प्रधान
भूताः काश्चिद्विभूतीर्वक्ष्यामीत्यर्थः यस्य
त्वदैश्वररूपव्याप्तिश्चेतसि तथा नोपारोह
ति तां च जिज्ञाससि तत्प्रत्ययं विभूतियोगोप
देशः येन तैलविंदुविसारणवच्छनकैः स

गी॰टी॰ वेत्रव्याभिरुपलभते ऐश्वरयोगस्य विभूति
१३५ सङ्क्षेपेण दृष्टस्यास्यैकादशेध्याये प्रपञ्चयिष्य
माणत्वादिह केवलो विभूत्युपदेश एवांगी
कृतो भगवता तत्र तावदैश्वररूपाधिगमसा
धनभूतानां विभूतीनां मध्यात्प्रथमोपायभू
तां परां विभूतिं कथयति १८ ॥ अहमात्मा
गुडाकेश सर्वभूताशयस्थितः अहमादिश्च
मध्यं च भूतानामन्त एव च ॥ हे गुडाकेश
अहमीश्वरः सर्वेषां चतुर्दशविधानां भूतानां
प्राणिनामाशये हृदये प्रत्यगात्मतया सामा
न्यसंविद्रूपात्मलक्षणो विभूत्यभिन्नः स्थितः
अप्रच्युतस्वात्मतयास्वस्थितः तत्र भूताना
माशयस्थित इति संबंधषष्ठी भूतात्मविहिलक्ष
णा एव प्रतीयंते इत्यत आह अहमादिरि
ति अहमीश्वरो भूतानां जीवानामादिश्च जी
वत्वरूपे विवर्तलक्षणे कार्ये कारणभूतः त
था मध्यं च जीवत्वम् तथा तस्य जीवत्वावसा
न भूतो मोक्षरूपः शुक्तिकेव रजताध्यासस्य
अन्तो न ते मत्तो भिन्नाः एवमात्मरूपायाः पर
स्या विभूतेर्वा भेमत्यन्या अपि विभूतयः क

135

मेणसर्वत्रव्याप्तिकारणभूताअपिगंतुंशक्यं
ते इत्यतःपूर्वमियमेवध्येयतेनोद्दिष्टा किंच
यथास्याशयस्थितस्यसमानुचिंतनाभ्यास
तारतम्येनभूतस्वात्मतयाभिव्याप्तिर्भवति
यतःपूर्वमप्युक्तं पुंजन्मेवमिति सर्वभूतस्य
मात्मानमित्यादि एवंवक्ष्यमाणासुविभूतिषु
प्रथमांतपदार्थजातानुचिंतनेनसप्तम्यंतेषुप
दार्थजातेषुभिव्याप्तिर्भवतीतिबोध्यम् उक्तंच
प्रश्नावसरे याभिर्विभूतिभिर्लोकानिमांस्त्वं
व्याप्यतिष्ठसीति अथान्याअपिविभूतीःकथ
यति २१ ॥ आदित्यानामहंविष्णुर्ज्योतिषांर
विरंशुमान् मरीचिर्मरुतामस्मिनक्षत्राणा
महंशशी ॥ आदित्यानामुपास्यानाममरा
णांव्याप्तिहेतुरहमीश्वरोविष्णुःस्थितिहेतुः
कारणेविभूतित्वेनास्थितःएवमग्रेपिबोध्यं
तथाज्योतिषांप्रकाशानांज्योतिष्षुव्याप्तिहे
तुरंशुमान्विश्वव्यापिरश्मियुक्तोरविःसूर्यो
हं नक्षत्रमंडलाधिष्ठात्रीदेवता मरुतांका
लचक्रप्रवर्तकानामावहादीनामध्येनवा
युनांमरीचिर्नामवायुरहम् नक्षत्राणांश

गी॰टी॰
१३८

शोचंद्रमास्म्यहं किंच २०॥ वेदानांसामवेदो
स्मिदेवानामस्मिवासवः इंद्रियाणांमनश्चा
स्मिभूतानामस्मिचेतना॥ वेदानांचतुर्णांसा
मवेदोहमस्मि देवानांवैमवशुक्रानांवासव
इन्द्रोहं इंद्रियाणांव्याप्तिहेतुर्मनोंतःकरण
मस्मि भूतानांभूततत्वयाप्तिहेतुश्चेतनावहि
र्भेवोहव्यक्तिरहमस्मिविभूतित्वेन नतुस्व
रूपेणहव्यक्तेरंतर्लीनतयाकिंतत्रभूततत्व
हेतुत्वस्यावहिर्भेवेत्वाभावादितिचेत् मैवं
यतःपूर्वयुरुमिहकं प्रमात्रेकात्म्यमान्तर्यं
ततोभेदोद्विवात्तेत्यतःस्वरूपमावपितत्र
त्यस्यतमसोरुपभूपमानतयाचेतनायावहि
र्भेवत्वमेव पतेनैवसोद्भूततमोनर्वर्तिनां
स्थावराणामपिभूततत्वमिन्वेयं अत्रचाध्या
येप्रायेणस्वहार्थतयाद्वुर्वोधमेवविद्यियते
२१॥ रुद्राणांशंकरश्चास्मिवित्तेशोयक्षरक्ष
साम् वसूनांपावकश्चास्मिमेरुःशिखरि
णामहम् वित्तेशःकुबेरःपावकाख्योवसुः
शिखरवतांउच्छ्रितानांपर्वतानांमेरुःसु
मेरुः २२॥ पुरोधसांचमुख्यंमांविद्धिपार्थ

बृहस्पतिं सेनानीनामहं स्कन्दः सरसाम
स्मि सागरः ॥ पुरोधसां मुख्यं बृहस्पतिं मां वि
द्धि सेनान्यां चमूनायकानां देवसेनापतिः स्कं
दोऽहं सरसां स्थिरजलाशयानां २३ ॥ महर्षी
णां भृगुरहं गिरामस्म्येकमक्षरं यज्ञानां जप
यज्ञोऽस्मि स्थावराणां हिमालयः ॥ महर्षीणां
ब्रह्मज्ञानशालिनां गिरां पदात्मिकानां वाचा
मेकमक्षरमोंकारात्मकम् यज्ञानां यागविशे
षाणां जपयज्ञोऽहं तन्माहात्म्यं चोक्तं महाभार
ते जपस्तु सर्वधर्मेभ्यः परमो धर्म उच्यते अ
हिंसया हि भूतानां जपयज्ञः प्रकीर्तितः जप्ये
नैव तु संसिध्येद्ब्राह्मणो नात्र संशयः कुर्याद
न्यन्न वा कुर्यान्मैत्रो ब्राह्मण उच्यते इति स्थाव
राणां स्थितिमतां जंगमविलक्षणानां प्रालेय
शैलोऽहम् २४ ॥ अश्वत्थः सर्ववृक्षाणां देव
र्षीणां च नारदः गंधर्वाणां चित्ररथः सिद्धानां
कपिलो मुनिः ॥ देवानां सतां ब्रह्मज्ञानेन ऋ
षित्वं प्राप्तानां सिद्धानां त्रैगुण्यातीतत्वेन ज्ञा
नधर्मवैराग्यैश्वर्यादिसंपन्नत्वे सति स्वातंत्र्ये
णामोत्पत्तजन्मनोऽन्यतरत्स्वीकुर्वतां तदुक्तं

गी॰टी
१३२.

137

सिद्धाहिकाश्रपिलीलायाविग्रहंकृत्वाम
जंतीति २५ ॥ उच्चैःश्रवसमश्वानां विद्धिमाम
मृतोद्भवम् ऐरावतंगजेंद्राणांनराणांचन
राधिपम् ॥ अमृतोद्भवं अमृतेनसहोद्भव
आविर्भावोयस्यतं नराधिपंराजानम् २६ ॥
आयुधानामहंवज्रंधेनूनामस्मिकामधुक्
प्रजनश्चास्मिकन्दर्पःसर्पाणामस्मिवासुकिः ॥
वज्रंदधीचेरस्थिसंभवं कामधुक् सुरभिर्नाम
धेनु प्रजनःप्रजनयितार्थसामर्थ्यात्पितृ
णामितिविभक्तिव्यत्ययोज्ञेयः सर्पानागाश्च
सविषत्वनिर्विषत्वाभ्यांजातिभेदाद्वाभिद्य
ते २७ ॥ अनंतश्चास्मिनागानांवरुणोयादसा
महं पितॄणामर्यमाचास्मियमःसंयमतामहं ॥
यादसांजलचराणां संयमतांनियमंकुर्व
तां २८ ॥ प्रह्लादश्चास्मिदैत्यानांकालःक
लयतामहं मृगाणांचमृगेंद्रोहंवैनतेयश्च
पक्षिणाम् ॥ कलयतांगणयतांयमस्यैवरू
पांतरभूतोकालोहं मृगाणांमृगेंद्रःसिंहः
२९ ॥ पवनःपवतामस्मिरामःशस्त्रभृताम
हं झषाणांमकरश्चास्मिस्रोतसामस्मिजा

ह्नवी ॥ पवतांपावयितॄणांवेगवतांवाऽस्मि
रामोदाशरथिः झषाणांमत्स्यानांमकरोम
त्स्यानांमकरोमत्स्यविशेषः स्रोतसांप्रवह
ज्जलानां ३१ ॥ सर्गाणामादिरंतश्चमध्यंचै
वाहमर्जुन अध्यात्मविद्याविद्यानांवादःप्र
वदतःमहम् ॥ सर्गाणांस्थूलदेहपरिग्रहा
णामादिः संकुचितरूपाः प्रागवस्था अंतः
संकुचद्रूपामरणावस्थामध्यप्रसरद्रूपाजी
वदवस्थाहमेवेश्वरोहंतालक्षणविभूति
त्वेनास्थितः अध्यात्मविद्यात्मनिर्णयाधिका
रिणीविद्याप्रवदतांजल्पवितंडादिप्रयोक्तॄ
णांवादस्तत्वनिर्णयमात्रफलः ३२ ॥ अक्ष
राणामकारोस्मिद्वंद्वः सामासिकस्यच अ
हमेवाक्षयः कालोधाताहंविश्वतोमुखः ॥
अकारस्यसर्ववर्णेषुव्यापकत्वमाहश्रुतिः
अकारोवैसर्वावाक्सैषास्पर्शोष्मभिर्व्यज्य
मानाबह्वीनानारूपाभवतीति अक्षयः प्र
वाहरूपेणकालोचसूचकसूर्यचंद्राद्यन
पेक्षकः अक्षयत्वव्याप्तिहेतुः कालोहं अ
तीतानांभाविनांवापरमेष्ठिनांधातृत्वव्याप्ति

क्षेत्ररहं विश्वतोमुखस्त्वनन्तकोटयो यतनोधाता
विभूतित्वेनास्थितः ३२ ॥ मृत्युः सर्वहरश्चाहम्
उद्भवश्च भविष्यतां कीर्तिः श्रीर्वाक्च नारीणां
स्मृतिर्मेधा धृतिः क्षमा ॥ भविष्यतां भाविक
ल्याणानामुद्भवभ्युदयः स्मृतिरनुभूतार्थस्म
रणशक्तिः अनेकग्रन्थार्थधारणाशक्तिर्मेधा
धृतिर्धैर्य ३३ ॥ बृहत्साम तथा साम्नां गाय
त्रीछन्दसामहम् मासानां मार्गशीर्षोहमृ
तूनां कुसुमाकरः ॥ त्वामिंद्र हवामह इत्यस्या
मृचि गीयमाने बृहत्साम तेनचेंद्रः सर्वेश्वरत्वे
नस्तूयते छन्दसां रहस्यमंत्राणां गायत्रीमंत्रो
हं कुसुमाकरो वसंतः ३४ ॥ द्यूतं छलयता
मस्मि तेजस्तेजस्विनामहम् जयोस्मि व्यव
सायोस्मि सत्वं सत्ववतामहम् ॥ तेजस्विनां
प्रभाववतां तेजः प्रभावः जेतॄणां जयोस्मि
उद्यमवतां व्यवसायोस्मि सत्ववतां धैर्यमु
क्तानां सत्वं धैर्यम् ३५ वृष्णीनां वासुदेवोस्मि
पाण्डवानां धनंजयः मुनीनामप्यहं व्यासः
कवीनामुशना कविः ॥ मुनीनामात्ममन
नशीलानां कवीनां क्रांतदर्शनां शुक्रः ३६ ॥

दंडोदमयतामस्मि नीतिरस्मि जिगीषताम्
मौनं चैवास्मि गुह्यानां ज्ञानं ज्ञानवतामहम् ॥
दमयंतां दमकर्तॄणां दंडो येन संयता अपि
संयता भवंति नीतिः सामाद्युपायरूपा गुह्या
नां रहस्यानां गोप्यानां मौनमात्ममननं ज्ञा
नवतामहं तज्ज्ञानसंपन्नानां ज्ञानमहं तज्ज्ञानं
अथवा किं इत्थकरथग्निर्देशेन ३८ ॥ यच्चा
पि सर्वभूतानां बीजं तदहमर्जुन न तदस्ति
विना यत्स्यान्मया भूतं चराचरम् ॥ सर्वेषां
भूतानां यदपि च बीजं भूतत्वे समवायिकार
णं तदहं न त्वहेतुः न तदस्तीति मयारहिता
अन्ये येन विना यच्चराचरात्मकं भूतजातं स्या
द्भवतीति संभाव्यते तन्नास्त्येव तदुक्तं न सा
जीवकला काचित्संतानहृदयवर्तिनी व्यापी
शिवकला यस्यामधिष्ठात्री न विद्यते इति
प्रकरणार्थमुपसंहरति ३९ ॥ नांतोऽस्ति म
म दिव्यानां विभूतीनां परंतप एष तूद्देश
तः प्रोक्तो विभूतेर्विस्तरो मया ॥ यतो मम
विभूतीनां दिव्यानां लोकोत्तराणां संतो ना
स्ति अत एव विभूतेर्विस्तरः संक्षेपतो मयः

139

प्रोक्तः एवमात्मनो विभूतित्वेन भेदमभिधा
याधुना भेदमभेदयति ३८ यद्यद्विभूतिमत्स
त्वं श्रीमदूर्जितमेव वा तत्तदेवावगच्छ त्वं म
म तेजोंशसंभवम् ॥ यद्यत्सत्त्वं चेतनाचेत
नात्मकं वस्तु विभूतिमत्केन चिद्गुणेन माहा
त्म्ययुक्तं श्रीमच्छोभातिशययुक्तं ऊर्जितं ब
लसंपन्नं तत्तदेव मम भेश्वरस्य तेजसः परप्रका
शस्यांशेलेशमात्रेण तत्समुद्भूतमवगच्छ जा
नीहि अधुना महात्म्यातिदर्शनेन सर्वथाभे
दमेवोपसंहरति ३९ ॥ अथवा बहुनैतेन
किं ज्ञातेन तवार्जुन विष्टभ्याहमिदं कृत्स्न
मेकांशेन स्थितो जगत् ॥ अथवा किमने
न प्रभूतेन परिच्छिन्नदर्शितेन पृथक्पृथ
ग्विभूतिज्ञानेन तव कार्यम् सर्वत्र मद्
दृष्टिमेव कुरु विस्तार इदं कृत्स्नं चेतनाचेत
नात्मकं जगदेकांशेन निरंशोपि सन् माया
कल्पितैनेकदेशमात्रेण विष्टभ्याहं ताव्या
प्याधारतयास्थितः सत्स्वभावादप्रच्युतत्वेन
स्थितः तथा च श्रुतिः पादोस्य विश्वाभूता
नीति वैश्वानरलक्षे सोपानभूताया स्तवि

भूतयः तदाम्नयेयस्ताः प्राहृतंवन्देमर्मवे
दितम् इतिश्रीभगवद्गीतायांनवप्रकाशि
काख्यायांराजानकलक्ष्मीरामविरचितायां
विभूतियोगोनामदशमोध्यायः १० ॥
एवंदशमेनाध्यायेनभगवन्मुखोदेश्वरयो
गप्रवेशसोपानभूताविभूतीःसम्यक्श्रुत्वा
अनाविस्तरेणात्मनोयोगंविभूतिंचेत्यादिना
दृष्टमपिभगवतैकादशेध्यायेसंचिक्रमि
षयाऽत्रतरितंमहात्मावात्मस्वरूपमैश्वरंयोगं
साक्षात्कर्तुंपूर्वोक्तमभिनन्दन्नर्जुनउवाच ॥
मदनुग्रहायपरमंगुह्यमध्यात्मसंज्ञितम्
यत्त्वयोक्तंवचस्तेनमोहोयंविगतोमम ॥
मदनुग्रहायमामनुगृहीतुंपरमंगुह्यंप्रक
ष्टरहस्यमध्यात्मसंज्ञितंआत्मनईश्वरस्वरूप
स्यब्रह्मरूपतयानिस्तरंगस्यापिसतःसृष्ट्या
ह्यभावादिकृत्यलाभाख्येमैश्वर्यापरपर्या
यमहमदमित्येवंलक्षणंवाक्यमहमादिर्हि
देवानांमहंसर्वस्यप्रभवइत्यादियदुक्तंत्व
यासर्वज्ञेनोपदिष्टं तेनहेतुभूतेनायंजग
द्वैचित्र्यविषयोमोहस्तत्वाप्रतिपत्तिः किं

गी·टी
११·

कारणकमेतद्धि विश्वमित्येवंरूपो विगतो न
ष्टः मोहापगममेवाह १॥ भवाप्ययौ हि भू
तानां श्रुतौ विस्तरशो मया त्वत्तः कमलप
त्र माहात्म्यमपि चाव्ययम् ॥ भूतानां स्था
वरजंगमात्मकानां उत्पत्तिलयौ त्वत्तः सका
शादेव भवत इति सर्वभूतानि कौंतेयेत्यादि
ना विस्तरेण मया श्रुतौ श्रुतिमात्रेणावथा
गितौ न त्वनुभूतौ तथाव्ययं जगद्विवर्तरूपे
इदं तावभासे सत्यपि सर्गादेरलक्षणस्व
भावाप्रच्युतिरूपं माहात्म्यं व्यापकत्वं च वि
ष्टभ्याहमिदं कृत्स्नमित्यादिना श्रुतं न तु सा
क्षात्कृतम् अथ तत्साक्षात्कारार्थमनुमति
सर्वमाह २॥ एवमेतद्यथात्थ त्वमात्मानं
परमेश्वर द्रष्टुमिच्छामि ते रूपमैश्वरं पुरु
षोत्तम ॥ हे पुरुषोत्तम यथा येन प्रकारे
णात्मानमैश्वररूपमात्थ कथयसि एवं वा
छमनेन प्रकारेणैतत् नात्र मे विश्वासाभा
वः तथापि ते वैश्वरं रूपं साक्षात्कर्तुं स्पृह
यामि किंतु ३॥ मन्यसे यदि तच्छक्यं म
या द्रष्टुमिति प्रभो योगेश्वर ततो मे त्वं दर्शी

140

यात्मानमव्ययम् ॥ हे प्रभो हे स्वामिन् भो
योगेश्वर बुद्धियोगमारभ्य ज्ञानयोगपर्यं
तं यथोपपत्तिं योगं दातुं समर्थस्वसमर्थं
प्रतिज्ञयात्रैव व्यर्थेति साकूतमामंत्रणम्
तदैश्वरं रूपं मया मनुष्येण त्वात्ममात्रबो
धेन द्रष्टुं साक्षात्कर्तुं शक्यं सत्यमिति चेन्म
न्यसे जानासि यदि मम मे यन्तो योग्यतां संभा
वयसि ततो मत्तम् अव्ययं यथोक्तमात्मानं
त्वं दर्शय प्रत्यक्षीकुर्विश्येवमभ्यर्थितः प्र
सादाभिमुखः श्रीभगवानुवाच ४ ॥ प
श्य मे पार्थ रूपाणि शतशोऽथ सहस्रशः
नानाविधानि दिव्यानि नानावर्णाकृती
नि च ॥ हे पार्थ शतशः सहस्रशश्चासंख्या
तानि नानाविधान्यनेकप्रकाराणि दिव्यानि
श्दत्तयावभासमानत्वेपिप्रणीहृतानिम
नत्वाहो कोमलाणि नानाविलक्षणवर्णाः
शुक्लादयश्चाकृतयोऽवयवसंस्थानविशे
षा येषां तानि रूपाणि पश्य द्रष्टुमर्होभव
सर्वैर्लोट् एवं सामान्यत उक्त्वा विशेषतो
निर्दिशति ५ ॥ पश्यादित्यान्वसून्रुद्रा

नश्विनौमरुतस्तथा बहून्यदृष्टपूर्वाणिपश्या
श्चर्याणिभारत ॥ आदित्यादिग्रहणमुपलक्ष
णार्थं येसर्वेविभूतियोगआदित्यादयोव्या
ख्यातेनोक्तास्तानिदानींपश्यमहाश्चर्यास्यासा
क्षात्कुरु तथायान्यपिबहून्यपरिमितानि
अदृष्टपूर्वाणित्वयान्येनवाकेनचित्सर्वमदृष्टा
न्याश्चर्याण्यद्भुतानिचपश्यकिंच ६ ॥ इहैक
स्थंजगत्कृत्स्नंपश्याद्यसचराचरम् ममदेहे
गुडाकेशयच्चान्यद्द्रष्टुमिच्छसि ॥ हेगुडाके
शस्वहृदानुभावयिष्यमाणेममईश्वरस्यदेहेस्वरू
पेसचराचरंस्थावरजंगमादिचेतनभेदभिन्नं
कृत्स्नंवर्षकोटिभिरपिद्रष्टुमशक्यंजगदिदंता
सदेशंजडजातं अद्यमत्प्रसादेनैकस्थमेक
त्वेनमध्यभेदेनस्थितंविश्रांतंपश्यएकत्र
भावोविवक्षितः द्वैकयोर्द्विवचनैकवचनेइति
वत् यच्चान्यजगतोवस्थाविशेषादिकंजय
पराजयादिकंचद्रष्टुमिच्छसितदपिसर्वंसंदे
होच्छेदायपश्य किंच ७ ॥ नतुमांशक्यसे
द्रष्टुमनेनैवस्वचक्षुषा दिव्यंददामितेचक्षुः
पश्यमेयोगमैश्वरम् ॥ यथामांवसुदेवात्म

नमनेनस्वचक्षुषापश्यसि तथामामीश्वरंत्र
मलक्षणंद्रष्टुंसाक्षात्कर्तुमनेनैवचर्ममयेनस्व
कीयेनचक्षुषानशक्नोषि अतोहेतोर्दिव्यंलौ
कोत्तरंचक्षुरिवचक्षुर्मदीयेश्वररूपसाक्षात्का
रक्रियाकरणंज्ञानचक्षुस्तेतुभ्यंददामि तेनै
वममैश्वरंयोगंमहाव्याप्तिसहितंसमाधानं
पश्यसाक्षात्कुरु अथव्यासमुनिप्रसादाल्लब्ध
दिव्यदृष्टिर्हस्तिनःपुरास्थितंधृतराष्ट्रंप्रतिअर्जु
नकृतंबोधयिष्यन्संजयउवाच ८ ॥ एवमुक्त्वा
ततोराजन्महायोगेश्वरोहरिः दर्शयामासपा
र्थायपरमंरूपमैश्वरम् ॥ हेराजन्धृतराष्ट्र
महान्सर्वज्ञात्मतयाव्याप्तिलक्षणोयोयोगस्तं
समर्पयितुमीश्वरः समर्थोहरिःश्रीकृष्णएवं
दिव्यंददामितेचक्षुरित्युक्त्वाततःप्रतिज्ञानंत
रंपार्थायार्जुनमनुग्रहीतंपरममत्युत्कृष्टमै
श्वरंरूपंदर्शयामासपश्यपतंप्रद्युग्रजेपार्थस्यह
ष्टत्यात्मत्वेनैश्वरंरूपंज्ञानविषयीचकारेत्यर्थः
तत्रैश्वरंरूपंत्रिधा एकमहंताच्छादितास्फुटे
दंतामयमहमिदमिति यच्चसदाशिवतत्व
मितिनाम्नाग्रन्तरवादिभिर्व्यवहृतम् द्विती

येस्कदेहेतात्स्थंतासमानाधिकरणात्मकंमिद
महमितिपश्चेश्वरतत्वमित्युक्तं तृतीयंसमथ
नतत्ता पुटन्यायेनाहमिदंधियोःसमानाधिक
रणंतत्स्यबलेश्चद्गविद्याख्यमिति तत्रकोट
शंतदेश्वरंरूपमितिविशेषणद्वारेणसदाशि
वतत्वाच्छुद्गविद्यातत्वेश्वरंरूपंविशिनष्टि
१०॥ अनेकवक्त्रनयनमनेकाद्भुतदर्शनम्
अनेकदिव्याभरणंदिव्यानेकोद्यतायुधम्॥
अनेकानिवक्त्राणिनयनानिचयस्मिंस्तत
अनेकवक्त्रनयनं अनेकानामद्भुतानांवि
स्मयहेतूनांदर्शनंयस्मिंस्तत् अनेकानिदि
व्यानिलोकोत्तराणिआभरणानियस्मिंस्तत
दिव्यान्यनेकान्युद्यतान्यायुधानियस्यतत्
किंच ११॥ दिव्यमाल्याम्बरधरंदिव्यगंधानु
लेपनम् सर्वाश्चर्यमयंदेवमनंतंविश्वतोमु
खम्॥ दिव्यानिमाल्यान्यम्बराणिचधारय
तीति दिव्योगन्धोयस्यतादृगनुलेपनंयस्य
तत् सर्वाश्चर्यमयमनेकाश्चर्यप्रचुरंदेवद्यो
तनात्मकमनंतमपरिच्छिन्नंविश्वतःसर्वत
एवमुखंयस्तत्शक्तिर्यस्यतत् दर्शयामासेति

142

पूर्वेणान्वयः अधुनैश्वररूपस्योपमानाभा
वं प्रदर्शयति ॥ ॥ दिवि सूर्यसहस्रस्य भवे
द्युगपदुत्थिता यदि भाः सदृशी सा स्याद्भास
स्तस्य महात्मनः ॥ दिव्याकाशे समुदितस्य
सूर्यसहस्रस्य समकालं प्रसृता दीप्तिर्यदि क
दाचिद्भवेत्तान्तस्य महात्मनो महाव्यापक
स्यात्मायस्य विश्वरूपेश्वरस्य भासः प्रभायास्तु
ल्या स्यादस्तीति संभाव्यते नान्योपमास्तीत्य
र्थः अथवा स्यादिति काक्वा व्याख्येयं न भवे
दित्यर्थः विश्वात्मन उपमाभावपराहृतोपमा
रूपयमतिशयोक्तिरूपेतां व्यंजयंती सर्वथा
निरुपमत्वमेव व्यनक्ति अथार्जुनस्यैश्वररूप
साक्षात्कारमाह ॥ १२ ॥ तत्रैकस्थं जगत्कृत्स्नं
प्रविभक्तमनेकधा अपश्यद्देवदेवस्य श
रीरे पांडवस्तदा ॥ देवदेवस्य विश्वरूपेश्व
रस्य शरीरे स्वरूपेनेकधा प्रविभक्तं नानाविभा
गेनावस्थितं कृत्स्नमखिलं जगदेकस्थमेकेन
अभेदेनावस्थितमर्जुनस्तदैश्वररूपसमाधान
काले पश्यत्स्वमनसा साक्षात्कृतवान् प्रविभ
क्तपदेनैश्वररूपं सदाशिवतत्त्वाद्यावर्तितं

एकपदेन श्रुतविधानत्वाच्च एवमर्जुनस्य त
त्कालगोचरं विश्वरूपस्य साक्षात्कारमभि
धायाधुनाऽनुत्थितस्य वृत्तमाह १३ ॥ ततः
स विस्मयाविष्टो हृष्टरोमा धनंजयः प्रणम्य
शिरसा देवं कृतांजलिरभाषत ॥ ततो विश्व
रूपस्य दर्शनानंतरं स ईश्वरानुग्रहास्पदीभू
तोऽर्जुनो विस्मयेन योगभूमिकालसंगीभूते
नश्रुत्वानेपि परतत्त्वचमत्कारेणाविष्टश्चाचि
त्रचिन्महतितया व्याप्तोऽश्चात्मसात्कृतः हृष्टरो
मा परमानंदांतर्भवेनोत्पुलकितरोमा कृतांज
लिः संपुटीकृतहस्तो देवं पुरोवर्तिनं देवकी
पुत्रं श्रीकृष्णं साक्षात्कृतप्रभाववत्त्वात्संजातत
द्विषयबहुमानोऽत्यर्थं प्रणम्याभाषतोवाच
किमित्यर्जुन उवाच १४ ॥ पश्यामि देवां
स्तव देव देहे सर्वांस्तथा भूतविशेषसंघान्
ब्रह्माणमीशं कमलासनस्थमृषींश्च सर्वा
नुरगांश्च दिव्यान् ॥ हे देवक्रीडाशीलेश्वर
तव देहे स्वरूपे देवान्ब्रह्मादीन्पश्यामि सा
क्षात्करोमि ऐश्वररूपसमाधिसंस्कारैवपश्य
न पश्यामीति वर्तमानत्वेनोक्तिः एवं सामान्ये

142

नोक्ता विशेषतो निरूपयति तथा सर्वान्भूत
विशेषाणां चराचराणां प्राणिभेदानां समूहां
श्च तथेशं देवानामपि प्रभुं पद्मासनासीनं
ब्रह्माणमूर्ध्वभुवनवासिनं च तथा सर्वानृ
षीन्मध्यलोकवासिनो वसिष्ठादींश्च उर
गांश्च दिव्यानप्राकृतानधोभुवनवासिनो वा
सुकिप्रभृतींश्च तवैश्वरस्य व्यापके देहेति ले
नेलमिव व्याप्यत्वमापन्नान्पश्याम्युपलभे प
तेन भुवनत्रयं त्वद्देहविलीनं पश्यामीति स्वा
नुभवं प्रतिपादितवान् किंच १५ ॥ अनेकबा
हूदरवक्त्रनेत्रं पश्यामि त्वां सर्वतोनन्तरूपम्
नान्तं न मध्यं न पुनस्तवादिं पश्यामि विश्वेश्वर
विश्वरूपं ॥ सर्वेषां प्राणिनामवयवास्तवैवा
वयवा इत्यविशिष्टं त्वामेकं पश्यामि हे विश्वे
श्वर हे विश्वरूपेति सम्बोधनद्वयं मद्दृष्टसर्वा
त्मभूतोऽसीति व्यक्तात् किंच १६ ॥ किरी
टिनं गदिनं चक्रिणं च तेजोराशिं सर्वतो दीप्ति
मन्तम् पश्यामि त्वां दुर्निरीक्षं समन्ताद्दीप्तान
लार्कद्युतिमप्रमेयम् ॥ किरीटगदाचक्रयु
क्तं पाणिभिस्त्वामेव वसुदेवात्मजमेवंविधं

पश्यामि कीदृशमित्याह सर्वतोदीप्तिमंतं
तेजोराशिरूपं तथा दुर्निरीक्ष्यं कृच्छ्रेण द्रष्टुं
शक्यं सयकारपाठे दुःशब्दोपकृष्टवचनः
अनिरीक्ष्यमिति यावत् तथा समंतादीप्त
योऽनलार्कयोर्द्युतिरिव द्युतिर्यस्य तं अप्रमे
यं प्रत्यक्षादिप्रमाणागोचरम् एवंविधेश्वर
योगदर्शनाद्विज्ञमनुमिनोमि १७ ॥ त्वमक्ष
रं परमं वेदितव्यं त्वमस्य विश्वस्य परं निधानम्
त्वमव्ययः शाश्वतधर्मगोप्ता सनातनस्त्वं पुरु
षो मतो मे ॥ अवश्यं ज्ञेयं परममक्षरं ब्रह्मत्व
मेवेश्वरः तथास्येदंतावयथार्थस्य विश्वस्य परं
प्रधानाद्यपेक्षयोत्कृष्टं निधानं परमशक्त्या
ख्याश्रयश्च त्वमेव तथा चोक्तम् यथान्य
ग्रोधबीजस्थः शाखिरूपो महाद्रुमः तथात्व
द्बीजस्थं जगदेतच्चराचरमिति तथा त्व
मेव शाश्वतस्य नित्यस्य धर्मस्य चेतन्यापरप
र्यायस्याहंतारूपविमर्शाख्यस्य गोप्ता जीव
त्वदशायामपि पालकः नतु पेत्तकः अत ए
वाव्ययः जीवत्वप्राप्तावपि स्वरूपप्रच्युतिरू
पविकाररहितः तथा सनातनो नादिः पुरु

155

षः कूटस्थ आत्मा च त्वमेवेश्वरो मयामतोऽनु
मानेन ज्ञातोसि किंच १८ ॥ अनादिमध्यां
तमनंतवीर्यमनन्तबाहुं शशिसूर्यनेत्रम्
पश्यामि त्वां दीप्तहुताशवक्त्रं स्वतेजसा विश्व
मिदं तपंतम् ॥ आदिमध्यावसानरहितम
परिच्छिन्नवीर्यमपरिच्छिन्नबाहुं शशिसूर्यौ
नेत्रे यस्य तम् दीप्तहुताशो वक्त्रे यस्य तम्
तथेदमिदं तावद्यथार्थं विश्वं जगत्तपन्तं विद्या
ख्याप्रकाशयन्तं एवंविधं विराजद्रूपं त्वामे
वेश्वरं पश्याम्युपलभे तथा च १९ ॥ द्यावापृ
थिव्योरिदमंतरं हि व्याप्तं त्वयैकेन दिशश्च स
र्वाः दृष्ट्वाद्भुतं रूपमुग्रं तवेदं लोकत्रयं प्रव्य
थितं महात्मन् ॥ द्यावापृथिव्योरिदमंतर
मंतरिक्षं तथा सर्वा दिशश्च त्वयैकेनेश्वरेणावि
राट् त्वमापन्नेन व्याप्तं यदुक्तं यस्याग्निरास्यं
द्यौर्मूर्धा खंनाभिश्चरणौ क्षितिः सूर्यश्चक्षुर्दि
शः श्रोत्रे तस्मै कालात्मने नमः एवंमिदं कस्य
मिति त्रिपाद्या प्रतिज्ञातं भगवता पवर्ग्योप
नायश्चान्यद्द्रष्टुमिच्छसीति प्रतिज्ञातं तद्देव
सर्वशक्तेः परमेश्वरस्य रूपं सैन्यसंहारप्रद

तं कालाख्येनोरुरूपमनुपश्यंश्चैवं वर्णयति त्वमाह
दृष्ट्वेति अद्भुतं विस्मापकमिदं दृष्ट्वा सर्वमपि
अप्रनापि उग्रः स्फुरद्विवृतवक्त्रोग्ररूपं दृष्ट्वास्मा
त्प्रकृत्य लोकत्रयं प्रव्यथितमतिभीतं पश्या
मीति शेषे वर्णौ वानुषंगः हे महात्मन्विश्वरूप
तथा हि २१॥ अमी हि त्वा सुरसंघा विशंति
केचिद्भीताः प्रांजलयो गृणंति स्वस्तीत्युक्त्वा
महर्षिसिद्धसंघाः स्तुवंति त्वां स्तुतिभिः पुष्कला
भिः॥ अमी प्रत्यक्षं भासमानाः सुरसंघाः समा
पानयना त्वां विशंति समावेशेनासादयंति
तन्मध्येपि केचिद्भीताः संतः प्रांजलयो बद्धां
जलयस्त्वां कालरूपं गृणंति जय जय रक्षे
ति प्रार्थयंते तथा महर्षीणां नारदादीनां सि
द्धानां कपिलादीनां च समूहाः स्वस्त्यस्तु जग
त इत्युक्त्वा पुष्कलाभिः श्रेष्ठाभिः स्तुतिभिस्त्व
च्चरितोदीरणैस्त्वां प्रशंसंति किंच २२॥ रु
द्रादित्या वसवो ये च साध्या विश्वेश्विनौ मरु
तश्चोष्मपाश्च गंधर्वयक्षासुरसिद्धसंघा वी
क्षंते त्वां विस्मिताश्चैव सर्वे॥ रुद्राश्चादित्या
श्च वसवश्च ये च साध्या नाम देवा विश्वेदेवा

मरुतएकोनपंचाशद्देवगणाः ऊष्मपाश्च
पितरःगन्धर्वाश्चयक्षाश्चासुराश्चविरोचना
दयःसिद्धानांसंघाश्चत्वामीश्वरंकालरूपंवी
क्षंतेतस्मात्तात्कुर्वंति तथापितेसर्वएवविस्मि
ताश्चयोगोपलक्षणाद्भुतविस्मयमापन्नाश्च
नदेवंकालरूपंविशिनष्टि २३ ॥ रूपंमहत्ते
बहुवक्त्रनेत्रंमहाबाहोबहुबाहूरुपादम्
बहूदरंबहुदंष्ट्राकरालंदृष्ट्वालोकाःप्रव्य
थितास्तथाहम् ॥ एवंविधंतवरूपंदृष्ट्वालो
काःउत्कृप्रायाः सर्वेप्रव्यथिताश्चातिभीताः त
थात्मत्वेनेश्वररूपस्ताकारेसत्यपिलोकव
देवाहंव्युत्थानतिभीतोस्मिनपरंभीनएवापि
त २४ ॥ नभःस्पृशंदीप्तमनेकवर्णंव्यात्ता
ननंदीप्तविशालनेत्रं दृष्ट्वाहित्वांप्रव्यथितां
तरात्माधृतिंनविन्दामिशमंचविष्णो ॥
खव्यापिनंदीप्तमनेकवर्णंविहृतास्यंदीप्त
विशालनेत्रमेवंविधंत्वांकालरूपंसमाधि
कालेदृष्ट्वाइदानींव्युत्थानेतिभीतमनाधृतिं
रतिंशमंसुखंचनलभेविष्णोव्यापक किंच
२५ ॥ दंष्ट्राकरालानिचतेमुखानिदृष्ट्वैवका

लानलसन्निभानि दिशो न जाने न लभे च श
र्म प्रसीद देवेश जगन्निवास ॥ तव कालरू
पस्य दंष्ट्राभिः करालानि विकृतत्वेन भयानका
नि प्रलयकालाग्निसदृशानि मुखानि दृष्ट्वैव
समाधिकाले सालात्कृतेष्वेव दिशः पूर्वापरादि
विभागनेदानीं व्युत्थाने समाधिसंस्कारप्रके
न जाने सुखं च नोपलभे देवेश हे कालादिदे
वनियंतः हे जगन्निवास जगदाश्रयेति साकू
तमामंत्रणद्वयं त्वं प्रसन्नो भव जगद्रक्षां प्र
ति किंच २५ ॥ अमी च त्वां धृतराष्ट्रस्य पुत्राः
सर्वे सहैवावनिपालसंघैः भीष्मो द्रोणः सूत
पुत्रस्तथासौ सहास्मदीयैरपि योधमुख्यैः ॥
अमी धृतराष्ट्रस्य पुत्रा दुर्योधनादयः सर्वे शत
सहजाः अवनिपालानां शल्यजयद्रथप्रभृ
तीनां जत्त्वां समूहैः सहैव त्वां कालरूपं विशंती
त्युत्तरेण संबंधः पश्यद्रूपसाक्षात्कारेवेवश्य
नागभूतचरस्यापि हृस्मा विशंतीति वर्तमा
नत्वेनोक्तिः एवमुत्तरत्र तथा भीष्मो द्रोणः सू
तपुत्रो सौ कर्णः अस्मदीयैस्तेषां प्रतियद्धभि
र्धृष्टद्युम्नादिभिः सह ते सर्वे विशंति किंच २६ ॥

वक्त्राणि ते त्वरमाणा विशंति दंष्ट्राकराला
नि भयानकानि केचिद्विलग्ना दशनांतरेषु
संदृश्यंते चूर्णितैरुत्तमांगैः ॥ अमीधर्योध
नाट्यो दंष्ट्राभिर्विकृतानि भयंकराणि तव
वक्त्राणि धावंतो विशंति तन्मध्ये केचिद्यो
धाश्चूर्णितैः शिरोभिर्विशिष्टा दंतसंधिषु संश्लि
ष्टा दृश्यंते प्रवेशे त्वरया दृष्टांतमाह २८ ॥ य
था नदीनां बहवोम्बुवेगाः समुद्रमेवाभिमुखा
द्रवंति तथा तवामी नरलोकवीरा विशंति व
क्त्राण्यभिविज्वलंति ॥ यथा वक्रमार्गप्रवहं
तीनां नदीनां जलप्रवाहाः समुद्राभिमुखाः स
मुद्रमेव द्रवंति प्रविशंति तथामी नरलोक
वीराः सर्वतो दीप्तानि तव मुखानि विशंति वे
वश्येन प्रवेशेन नदीवेगदृष्टांतमुक्त्वा स्वातंत्र्येन
केषांचिद्योधमुख्यानां प्रवेशे दृष्टांतमाह २९ ॥
यथा प्रदीप्तं ज्वलनं पतंगा विशंति नाशाय स
मृद्धवेगाः तथैव नाशाय विशंति लोकास्त
वापि वक्त्राणि समृद्धवेगाः । स्पष्टार्थः किंच
२ः ॥ लेलिह्यसे ग्रसमानः समंताल्लोकान्सम
ग्रान्वदनैर्ज्वलद्भिः तेजोभिरापूर्य जगत्सम

ग्रंभासस्तवोग्राः प्रतपंति विष्णोः ॥ ज्वलद्भि
र्वदनैः सर्वांल्लोकान्समंतान्ग्रसमानो भक्षय
न् लेढ्यमिवानायसेन निगिरसि हे विष्णो
व्यापकतव कालरूपस्य दीप्तयः संकारकार
णीभूतास्तेजोभिर्विस्फुरणैः समग्रं जगद्या
प्योग्रास्तीव्राः दुःसहाः प्रतपंत्याख्यात्मिका
दिनातपत्रयपरिणामेन शांतिकृत्यं प्रयच्छंती
त्यर्थः ३० ॥ आख्याहि मे को भवानुग्ररूपो न
मोस्तु ते देववर प्रसीद विज्ञातुमिच्छामि भ
वंतमाद्यं न हि प्रजानामि तव प्रवृत्तिम् ॥ य
त एवं तस्मात्त्वमुग्राकारः कस्त्वमाख्याहि कथय
ते तुभ्यं नमोस्तु हे देववर प्रसीद प्रसन्नो भव
आद्यं सनातनमीश्वरं विज्ञातुं विशेषेण सा
मान्याकारतया वेदितुमिच्छामि यतस्तवैव
रस्यैवंविधामतिक्रौर्यप्रकाशांल्लोकक्षयमा
णां प्रवृत्तिं प्रसरं किमर्थमेवं प्रवृत्तोसीति न
प्रजानामि ३१ ॥ श्रीभगवानुवाच ३२ ॥
कालोस्मि लोकक्षयकृत्प्रवृद्धो लोकान्समा
हर्तुमिह प्रवृत्तः ऋतेपि त्वां न भविष्यंति स
र्वे येवस्थिताः प्रत्यनीकेषु योधाः ॥ लोक

त्त्वयकर्त्तारयः कालः स एवास्मि प्रवृद्धो वृ
द्धिंगतः । किमर्थं प्रवृत्तोसीत्यत्राह लोका
ल्लोकान्प्राणिनः संहर्त्तुमिह लोके प्रवृत्तोस्मि
अतस्त्वामृतेपित्वां हंतारं विनापि त्वय्ययो
त्स्यमानेपीत्यर्थः एते सर्वे न भविष्यंति वि
नंक्ष्यंति सर्वेषां प्राणिनां विनाशशंकाप
रिहारार्थमाह ये योधाः प्रत्यनीकेषु सर्वेषु से
नेषु स्थितास्त एवं नंक्ष्यंति नचैतद्विस्मइति
प्रश्नस्योत्तरं भाविकल्याणरूपमाह ३४ ॥
तस्मात्त्वमुत्तिष्ठ यशो लभस्व जित्वा शत्रून्भुंक्ष्व
राज्यं समृद्धम् मयैवैते निहताः पूर्वमेव निमि
त्तमात्रं भव सव्यसाचिन् ॥ यत एवं तस्मात्त्व
मुत्तिष्ठ दुर्जयानां भीष्मादीनां जयेन यशो ल
भस्व एवमप्रयासेन शत्रून्जित्वा समृद्धं राज्यं
भुंक्ष्व एते तव शत्रवो मयैव कालात्मना पूर्व
मेव त्वद्व्यापारात्प्रागेव निहताः संहृतप्रायाः
हे सव्यसाचिन् सव्येन वामहस्तेनापि शरा
साचितंशरान्सन्यातंशीलमस्येति हे अर्जुन
निमित्तमात्रं भव द्रोणादयो मद्धातभाव
नयास्मज्जेत्याशंकापरिहारायाह ३५ ॥

द्रोणंचभीष्मंचजयद्रथंचकर्णंतथान्यान
पियोधवीरान् मयाहतांस्त्वंजहिमाव्यथि
ष्ठायुध्यस्वजेतासिरणेसपत्नान् ॥ चोष्यर्थे
द्रोणमपिदिव्यास्त्रसंपन्नंभीष्मंस्वतंत्रमृत्युंप
रशुरामायनभिभूतमपिजयद्रथंतद्धंतुः
शिरःपतनवरदानाज्जेतुमशक्यमपिकर्णं
सूर्यादिव्यास्त्रसंपन्नंवासवदत्तयामोघयाश
क्त्याविशिष्टमपितथान्यानपिएवंविधप्रभा
वातिशययुक्तान्वीरयोधान्मयाकालरूपेण
हतांस्त्वंजहितस्यहननेभयाभावमाहमा
व्यथिष्ठामाभैषीर्युद्धंकुरुशत्रून्युद्धेजेतासि
जेष्यसि ततोयद्वृत्तंतद्धृतराष्ट्रंप्रतिसंजयउ
वाच ३४ ॥ एतच्छ्रुत्वावचनंकेशवस्यकृ
तांजलिर्वेपमानःकिरीटी नमस्कृत्वाभूय
एवाहकृष्णंसगद्गदंभीतभीतःप्रणम्य ॥
एतत्श्लोकत्रयात्मकंवचनंसमाधिकाले
कालरूपसाक्षात्कारेणक्षुभ्यमानोवेपमानः
अत्यन्तस्पष्टम् अर्जुनउवाच ३५ ॥ स्थानेहृ
षीकेशतवप्रकीर्त्याजगत्प्रहृष्यत्यनुरज्य
तेच रक्षांसिभीतानिदिशोद्रवंतिसर्वेनम

स्यन्ति च सिद्धसंघाः ॥ हे हृषीकेश इन्द्रिय
स्वामिन् आत्मरूपतयेंद्रियवृत्तेः प्रवृत्तिनि
न्तायथेष्टविनियोक्तः तवप्रकीर्त्या माहात्म्य
संकीर्तनेन न केवलमहमेव प्रहृष्यामि याव
त्सर्वं जगत्प्रहृष्यति प्रकर्षेण हर्षं प्राप्नोति य
त् एतत्स्थाने युक्तं भवति नैतच्चित्रमित्यर्थः
तथा सर्वं जगदनुरज्यते त्वय्यनुरक्तं भवतीति
यत् तथा रक्षांसि भीतानि संति दिशो यतस्त
तः पलायंते इति यत् तथा सर्वे सिद्धानां त्ता
नोत्कर्षं प्राप्तानां समूहाः प्रणमंतीति यत्
एतत्सर्वं युक्तमेव सर्वत्र वाक्ये युत तव प्रकीर्त्या
स्थाने इत्यस्य चान्वयः अयं श्लोको रक्षोघ्नमंत्रे
षु मंत्रशास्त्रे प्रसिद्धः तत्र हेतुमाह २८ ॥
कस्माच्च ते न नमेरन्महात्मन्गरीयसे ब्रह्म
णोऽप्यादिकर्त्रे अनंत देवेश जगन्निवास
त्वमक्षरं सदसत्तत्परं यत् ॥ हे महात्मन् व्या
पक अनंत अपरिच्छिन्न हे देवेश हे जगन्निवास
स्थावरजंगमात्मकलोकाश्रय ते तुभ्यमीश्व
राय सर्वे सिद्धसंघाः कस्मात्कुतो हेतोर्न नमे
रन् नमेयुः अत्र हेतुगर्भं विशेषणमाह

ब्रह्मणोऽपिपरब्रह्मसकाशादपिगरीयसेतु
रूनतायक्तत्वादिकर्त्रेजगतःप्रथमनिर्मा
त्रेब्रह्मणोहिनिष्क्रियत्वादीश्वरस्यैवसाध्य
स्येननिर्मातृत्वमतोब्रह्मणःसकाशाद्गरीय
स्त्वम् तथात्वमेवेश्वरोऽनन्तोऽक्षरस्यापरपर्याय
मात्मरूपे तथासत्स्थूलमसत्सूक्ष्ममुपलंभा
विषयंतत्परंतयोरपिकारणभूतंयन्मायाख्ये
तत्सर्वंत्वमेवानपतेषामन्यतमस्यापिदर्शना
त्वेनोक्तेकस्यत्वमनुपमत्वम् तवैवादिकर्तृ
त्वात् किंच ३९ ॥ त्वमादिदेवःपुरुषःपुरा
णस्त्वमस्यविश्वस्यपरंनिधानम् वेत्तासिवे
द्यंचपरंचधामत्वयाततंविश्वमनंतरूप ॥
पुराणःपुरुषईश्वराख्यस्त्वमादिदेवःप्रथमो
पासनीयः तथास्येदंतावधार्यस्यजगतःप
रंनिधानंप्रकृत्याख्यमाश्रयस्त्वमेव तथात्व
मेवजीवरूपेणवेदकोसितथावेद्यंवस्तुजा
तंचत्वमेवपरंधामचमोक्षाख्यंत्वमेव अत
एवंविधत्वेनानंतरूपत्वयैवकारणाविश्वसर्वं
ततंव्याप्तम् किंच ४० ॥ वायुर्यमोऽग्निर्व
रुणःशशांकःप्रजापतिस्त्वंप्रपितामहश्च

नमोनमस्तेस्तु सहस्रकृत्वः पुनश्च भूयोपि
नमोनमस्ते ॥ प्रतीच्यादिदिक्सु सन्तादेवा
नायेदेवाःपुरःसदोऽग्निनेत्रा इत्यादिश्रुतित्वं
डेकनायकत्वेन ये प्रसिद्धा वाय्वादयस्तेऽपि
त्वमेव त्वं प्रजापतिर्ब्रह्मा च त्वमेव तस्यापि ज
नकत्वात्प्रपितामहस्त्वमेव नमोनमइति
पानःपुन्यं भक्त्यतिशयाविष्कारार्थम् किंच
४१ ॥ नमःपुरस्तादथपृष्ठतस्ते नमोस्तु ते स
र्वत एव सर्व अनंतवीर्यामितविक्रमस्त्वं सर्वं
समाप्नोषि ततोसि सर्वः ॥ हे सर्वरूप सर्वत
एव सर्वासु दिक्षु हे अनंतवीर्य परिच्छिन्नसा
मर्थ्य यतः अपरिमितो विशिष्टः क्रमो व्याप्ति
र्यस्य स एवंविधः संस्त्वं सर्वं समग्रं गतं बहिश्च
व्याप्नोषि सुवर्णमिव कटकादिन ततो हेतोः
सर्वस्वरूपोसि पूर्वं भगवति मनुष्यबुद्ध्या वि
हितमतिक्रमं मधुना तन्माहात्म्यसंवेदना
दपराधं मन्यमानस्तत्क्षान्त्यर्थं श्लोकचतुष्टय
माह ४२ ॥ सखेति मत्वा प्रसभं यदुक्तं हे कृ
ष्ण हे यादव हे सखेति अजानता महिमानं
तवेदं मया प्रमादात्प्रणयेन वापि ॥ सखे.

यंममेतिमत्वाप्रसभंहठेनानादरेणप्रमादा
च्चित्तविक्षेपात्प्रणयात्स्नेहेनवातवेश्वरस्यमहिमानं
वैश्वरूप्यलक्षणमिदमद्भुतचरमजानताम
यायत् हेकृसखेइत्याद्युक्तंतत्त्वांक्षामयेइत्युत्त
रेणान्वयः सखेतिसान्विरिदमितिचलिंगव्य
त्ययएवार्षः इममितिपुंलिंगंकेचित्पठंतिकिं
च ४३॥ यच्चावहासार्थमसत्कृतोसिविहा
रशय्यासनभोजनेषु एकोथवाप्यच्युततत
त्समक्षंतत्क्षामयेत्वामहमप्रमेयम्॥ हेअ
च्युतविकाररहितोसत्यपिस्वस्वभावादप्रच्यु
तस्यपरिहासार्थंविहारादिष्वनादृतोसि
एकःसखीन्विनारहसिस्थितः अथवातत्स
मक्षंसखीनांप्रत्यक्षंतत्सर्वमपराधजातंक्ष
मापयामित्वात् नन्वीश्वरस्यापराधाचरण
मनुचितमित्यतोहेतुगर्भंविशेषणमाह
अप्रमेयंतात्विकेनरूपेणसत्यत्वाद्यगोचरं
यतः ४४॥ पितासिलोकस्यचराचरस्यत्व
मस्यपूज्यश्चगुरुर्गरीयान् नत्वत्समोस्त्य
भ्यधिकःकुतोन्योलोकत्रयेप्यप्रतिमप्रभा
व॥ हेअप्रतिमप्रभावानुपमैश्वर्यत्वमस्य

चराचरस्यलोकस्यपिताजनकःपालको
वासिपूज्यश्चासिगुरुश्चासि अतःसर्वथा
गरीयान्गुरुतरोसि अतोलोकत्रयेपित्वत्सम
स्तावदन्योनास्तिद्वितीयस्यपरमेश्वरस्या
भावात् त्वत्तोभ्यधिकःकुतःपुनःस्यात्
४५ तस्मात्प्रणम्यप्रणिधायकायंप्रसाद
येत्वामहमीशमीड्यम् पितेवपुत्रस्यसखे
वसख्युःप्रियःप्रियायार्हसिदेवसोढुम् ॥
तस्मात्तोर्हेतोःप्रणम्यनत्वाकायंप्रणिधा
यदंडवद्भूमौनिपात्यत्वांस्तुत्यमीश्वरंप्रसा
दये हेदेवपितापुत्रस्यापराधजातमिवस
खासख्युरिवापराधंप्रियःप्रियायाइवाप
राधंममापित्वंसोढुमर्हसि प्रियायाइतिविस
र्गलोपःसन्धिश्चार्षः ४९ ॥ अदृष्टपूर्वंहृ
षितोस्मिदृष्ट्वाभयेनचप्रव्यथितंमनोमे
तदेवमेदर्शयदेवरूपंप्रसीददेवेशजगन्नि
वास ॥ हेजगन्निवासअदृष्टपूर्वंतवेश्वरं
रूपंदृष्ट्वाहृषितोहृष्टोस्मि तथातवादृष्ट
सर्वकालरूपंदृष्ट्वाभयेनचममनोप्रव्य
थितंव्याकुलीभूतं ऐश्वररूपसमावेशसं

स्कारैवैवभयेनव्यथाःस्थितमपिश्रीकृष्णस्वरूप
मनुपलभ्यमानत्वाद्दर्शयितुंप्रार्थयते तदे
वेतिहेदेवहेदेवेशतदेवप्राचीनंरूपंमेमह्यं
दर्शयप्रसीदप्रसन्नोभवकालरूपसंहरणा
य तदेवरूपंविशिनष्टि ४५ ॥ किरीटिनं
गदिनंचक्रहस्तमिच्छामित्वांद्रष्टुमहंतथै
व तेनैवरूपेणचतुर्भुजेनसहस्रबाहोभ
वविश्वमूर्ते ॥ तथैवपूर्ववद्देवतेनैवकि
रीटादियुक्तेनपतेनपूर्वमपिचतुर्भुजाया
कारेणश्रीकृष्णमर्जुनःपश्यतिस्मेतिगम्य
ते एवंप्रार्थितःसंस्तमाश्वासयन्श्रीभगवा
नुवाच ४६ ॥ मयाप्रसन्नेनतवार्जुनेदंरूपं
परंदर्शितमात्मयोगात् तेजोमयंविश्वम
नंतमाद्यंयन्मेत्वदन्येननदृष्टपूर्वम् ॥ हे
अर्जुनमाभैषीःयतोमयाप्रसन्नेनसताइ
दंत्वतुष्टतंपरमत्युत्कृष्टंमेस्वंरूपमात्मयो
गादात्मनऐश्वरस्यरूपस्ययोगंसमावेशंप्राप
प्यल्यब्लोपेपंचमीतवदर्शितम् दृष्टत्वया
त्वदात्मतयामयुक्तम् परत्वमेवाह तेजोम
यंविश्वंविश्वात्मकंतेवापितेजोमयंचित्प्रका

शामयं अनंतमपरिच्छिन्नं आद्यंविश्वात्मे
षस्यकारणभूतं यन्ममरूपंत्वदन्येनत्वादृशा
दन्येनपूर्वंनदृष्टम् किंचकालरूपसंवलि
तस्यविश्वात्मकस्यदर्शनंमनुष्यलोकेशक
मित्याह ४९ ॥ नवेदयज्ञाध्ययनैर्नदानै
र्नचक्रियाभिर्नतपोभिरुग्रैः एवंरूपःशक्य
अहंनृलोकेद्रष्टुंत्वदन्येनकुरुप्रवीर ॥ न
वेदानांचतुर्णांयज्ञानांयज्ञविद्यानांकल्प
सूत्रादीनामध्ययनैर्नदानैर्नचक्रियाभिर
ग्निहोत्रादिभिः नचोग्रैःकायेंद्रियशोषक
त्वेनदुष्करैस्तपोभिःकृच्छ्रचांद्रायणादिभि
रेवंरूपःकालरूपसंवलितोहमीश्वरोमनु
ष्यलोकेत्वदन्येनद्रष्टुंशक्यः अपितुयेवत
द्दर्शनंसोढुम् कुरुप्रवीरेतिसामर्थ्यसूच
कमामंत्रणम् अन्योहिमनुष्यःपरिच्छि
न्नभयानकवस्तुदर्शनादेवसहसाप्राण
ज्जह्यात् स्तब्धीभावंवाव्रजेत् कापुनःक
थास्यदर्शनस्येति शक्योहमितिवक्तव्ये
विसर्गलोपश्छान्दसः अतः ५० ॥ माते
व्यथामाचविमूढभावोदृष्ट्वारूपंघोरमी

152

दृष्ट्वामेदम् व्यपेतभीः प्रीतमनाः पुनस्त्वं
तदेव मे रूपमिदं प्रपश्य ॥ ममेश्वरस्य रू
पमीदृग्विश्वात्मकमिदं त्वदनुभूतं घोरं का
लपुरुषाकृति योगादुग्रं करं दृष्ट्वा सततं तव
व्यथा भयं मास्तु विमूढभावो मोहेन स्तब्ध
ता च मास्तु भयंकरदर्शने हि वीरस्यापि क्ल
व्यास्तव्यत्वयोरन्यतरद्भवत्येव विगतभयः
प्रीतमनाः संभ्रमाभावेन प्रसन्नचेताः सत्वं पु
नस्तदेवेश्वररूपदर्शनात्प्रागदृष्टं चतुर्भुज
त्वादिलक्षणमिदं परिच्छिन्नत्वेनेदंतयाप
रोभासमानं मे श्रीकृष्णस्य रूपं प्रपश्य सम्य
क्समाधिसंस्कारमवधूय द्रष्टुमर्हो भव सं
जय उवाच ५०॥ इत्यर्जुनं वासुदेवस्तथो
क्त्वा स्वकं रूपं दर्शयामास भूयः आश्वास
यामास च भीतमेनं भूत्वा पुनः सौम्यवपुर्म
हात्मा ॥ एवं वासुदेव उक्त्वार्जुनं यथा पूर्वं
दृष्टं तथा स्वकं रूपं किरीटादियुक्तं भूयो द
र्शयामास पश्यं ते मत्पुत्रजे अर्जुनस्तत्प
श्यति स्म भगवांस्तत्र प्रयोजकोऽभूदित्यर्थः
स महात्मा विश्वरूपः श्रीकृष्णः कालरूपो

भीत+

पसंहारेण समाधिसंस्कारनिरसनेन च सौ
म्यवपुस्सदर्शीकृतिर्भक्तापनं मर्जुनेन भवतस्य
माणेन प्रकारेणास्थास्यामास च सान्त्वया
मास च ततः सम्यग्व्यथितोर्जुन उवाच ५२॥
दृष्ट्वेदं मानुषं रूपं तव सौम्यं जनार्दन इदा
नीमस्मि संवृत्तः सचेताः प्रकृतिं गतः॥ हे ज
नार्दनेदं घोरः स्फुरत्सौम्यसदर्शनं मानुषं रूपं
तव दृष्ट्वा इदानीं मुख्याने प्रकृतिं स्वस्वभावं
जीवत्वरूपं प्राप्तं गतः प्राप्तः सन् सचेताश्चेतः
करणान्वितोऽहं संवृत्तः संपन्नः स्वकृतस्मात्
श्रकृस्यातिदुर्लभं त्वं दर्शयञ्श्रीभगवानुवाच
५३॥ सुदुर्दर्शमिदं रूपं दृष्टवानसि यन्मम
देवा अप्यस्य रूपस्य नित्यं दर्शनकांक्षिणः॥
दृष्टवान्सालात्कृतवान् अन्यस्सुष्टम् तत्र
हेतुः ५४॥ नाहं वेदैर्न तपसा न दानेन न
चेज्यया शक्य एवंविधो द्रष्टुं दृष्टवानसि मां
यथा॥ स्पष्टोऽर्थः नन्वेवं चेत्केनोपायेन तर्हि
द्रष्टुं शक्य इति तत्राह ५५॥ भक्त्या त्वनन्यया
शक्य अहमेवंविधोऽर्जुन ज्ञातुं द्रष्टुं च तत्त्वे
न प्रवेष्टुं च परंतप॥ अनन्यया मद्व्यतिरिक्ता

गी॰टी
१५२
153

कोलक्ष्योयनहितयाभक्त्याप्रेमातिशययुक्ते
नोपासनेनएवंविधस्त्वदृष्टतोविश्वात्मको
ऽहंज्ञातंप्रत्यभिज्ञातुंद्रष्टुंसाक्षात्कर्तुंप्रवेष्टुं
मात्मतयावगाढुंचशक्यः नान्यैरुपायैः तत्र
वधारणेसाधनान्तरव्याहृत्यर्थः अथसर्व
शास्त्रसारमुपदिशति ५५ ॥ मत्कर्मकृन्म
त्परमोमद्भक्तः संगवर्जितः निर्वैरःसर्वभूते
षुयःसमामेतिपांडव ॥ हेपांडवएवंविधो
मद्भक्तोमदुपासकोयःसमांप्राप्नोति किंवि
धइत्याह मत्कर्मकृत् मत्प्राप्त्यर्थमेवोक्त
शास्त्राकर्मकरोति तथासंगवर्जितः आस
क्तिरहितः आसक्तिरहितःतथासर्वभूतेषु
निर्वैरःमैत्र्यादिचित्तपरिकर्मसंपन्नःइतिकु
त्याने निरोधेनमत्परमः अहमेवसर्वथाप्रा
प्यइत्यर्थः शिवम् महात्मास्वात्मविश्वरूपद
र्शनेसमदर्शयत् यःप्रेष्ठायार्जुनायैवभक्ता
धीनंनमामितम् ५५ ॥ इतिश्रीभगवद्गीता
टीकायांतत्त्वप्रकाशिकाख्यायांराजानक
लक्ष्मीराममविरचितायांविश्वरूपदर्शनंना
मैकादशोध्यायः ११ ॥ ॐ एवंश्रीभगवा

न्तुद्धियोगादारभ्यविश्वात्मोपलब्धिंयाव
नयत्नंविनैवोपदेशेनार्ज्जुनमनुशिष्टीतवा
न् श्रवणोपासनापरपर्यायस्यभजनयो
गस्यस्वेच्छयापरतत्त्वप्रवेशेउपायभूतस्य
शास्त्रेषुबहुधोक्तस्यापिभगवतापंचमाध्या
यंयावत्साधम्येनप्राधान्येनचकर्मयोगत
यावष्टध्यायानिरोधयोगतयाचद्विधानि
र्दिष्टस्यैकतरविशिष्टभक्तस्यार्ज्जुनउवाच ॥
एवंसततयुक्तायेभक्तास्त्वांपर्युपासते ये
चाप्यक्षरमव्यक्तंतेषांकेयोगवित्तमाः ॥
एवमुक्तविधयायेभक्ताःप्रणतयेनोपासकाः
सततयुक्ताःसततमनिशंव्यवहारदशाया
पिनतविरोधयोगवत्परिच्छिन्नैकालंयुक्ताः
समाश्रिताःप्रत्यवमर्शतःसंततत्वामीश्वरं
स्वान्तेआविर्भूतंप्रदीपकल्पंहृदयेकांत
तिष्ठितंपर्युपासनेध्यायंति येचकेचिदत
त्स्वरूपादसंचलनेनास्फुटविमर्शेपरिश
यानंकूटस्थंप्रदीपप्रभामंडलसदृशंमत
एवाव्यक्तंसदप्यनाभासमानंपर्युपासते
चिमहत्त्वनिरोधंकृत्वाध्यायंति तेषामुभ

येषांमध्येकेयोगवित्तमाः अतिशयेनप्र
यासंविनैवमुख्ययोगलक्षणसमाधिभा
जःस्युः एवंविज्ञप्तवतपार्थस्यप्रति
पादनार्थंश्रीभगवानुवाच १॥ मय्यावे
श्यमनोयेमांनित्ययुक्ताउपासते श्रद्धया
परयोपेतास्तेमेयुक्ततमामताः॥ येयोगि
नःपरयात्युत्कृष्टयाश्रद्धयाननुभूतस्यापि
समाधिलक्षणफलस्यसंभावनयासमन्वि
ताः तथानित्ययुक्तानित्यमपरिच्छिन्नंकाले
युक्ताः प्रत्यवमर्शंतःसंतःमयीश्वरेऽहंतारूप
स्वांतंत्वाविरहितेनत्वदुरात्मवत्सुरीशयानेम
नोमननात्मकमंतःकरणमावेश्यतत्समा
पन्नंकृत्वामामीश्वरात्मानमुपासतेध्यायंति
तदुक्तंशिवोपनिषदि घटाकाशेनिली
नाकाशःपद्मसंपुटमध्यगः अनन्यचेताःस
भगेपरंसौभाग्यमाप्नुयादिति तेममयुक्त
तमाः अनायासेननिरतिशयसमाधिभाजो
मतानिश्चिताः यत्कृतंच प्रत्याहारादिसं
स्पृष्टाविशेषोस्तिमहाननयम् योगिभ्योभ
क्तिभाजोयद्यप्यनेपिसमाहिताःइति अ

न्मतरपत्तस्यप्रयासबाहुल्येनावरत्वंप्रतिपा
दयति २॥ येत्वक्षरमनिर्देश्यमव्यक्तंपर्यु
पासते सर्वत्रगमचिंत्यंचकूटस्थमचलंध्रु
वं। संनियम्येंद्रियग्रामंसर्वत्रसमबुद्धयः
तेप्राप्नुवंतिमामेवसर्वभूतहितेरताः॥ तुःप
क्षांतरेयेयोगिनःसर्वभूतहितेरतामैत्र्यादिसं
स्कारयुक्ताःसर्वत्रदेहेसमानिर्विशेषाबुद्धि
रात्मविषयोवायोयेषांतेईदृशाःसंतःइंद्रिय
ग्रामंबाह्याभ्यंतरंकरणवर्गसंनियम्यसम्य
क्निरुध्यसमाधिकालीनमक्षरमात्मानंस्वरूपा
संचलनेनपश्यंत्यविषयंपर्युपासतेध्यायंति
तथाचोपदिष्टंशिवोपनिषदि सर्वदेहंचिन्म
यंहिजगद्वापरिभावयेत् युगपन्निर्विकल्पे
नमनसापरमोऽहवइति कीदृशंतमनिर्देश्यं
वैखर्यानिर्देष्टुमशक्यंकुतोव्यक्तंस्फुटमना
भासंतथासर्वत्रगंसर्वदेहंव्याप्यतिष्ठंतमपि
अचिंत्यंचिंतयितुमशक्यंमनसामगोचरं कू
टःकूटस्थंमायातयावास्थितम् अचलंस्व
रूपपरिहाणिरहितंध्रुवमपरिणामिनित्यंते
चमामेवप्राप्नुवंतिकिंतु ३।४॥ क्लेशो

गी·टी
१५५

धिकतरस्तेषामव्यक्तासक्तचेतसाम् अव्य
क्ता हि गतिर्दुःखं देहवद्भिरवाप्यते ॥ तेषां
निरोधयोगमात्रतत्पराणामव्यक्तासक्तचे
तसामव्यक्ते स्फुटविमर्शतया निराभासे
अन्तरात्मनि आसक्तं निषण्णं चेतः करणं
येषां तेषां क्लेशः समाधिप्राप्तये चित्तप्रश
मनरूपः खेदः उक्तरूपेभ्यो मदुपासननिष्ठे
भ्यः कर्मयोगिभ्यः सकाशादधिकतरः सर्व
दा सर्वात्मना सर्वक्रियोपरमस्यासंभवात्
मदुपासकानां कर्मयोगिनां यद्यप्यास्ति मद्वि
मर्शाविच्छेदेन न क्लेशाधिकः तथापि यदाय
दा कर्ममध्ये चित्तमेकाग्रमालम्बितस्वरसेन
तदेव तप्तशिलापतितजलबिंदूपमचित्तप्र
शांतिलक्षणः निरोधात्मकं प्रयासं विनैव
समाध्युदयः उन्निद्रस्य व्यवहारासक्तस्यापि
तं हीव किं तु न निरोधलक्षणे यच्छ्रीगुरुभिः स्त
तं च नाद्यवेद्यतयैकेन न दृश्योऽस्य कः कः स्थि
तः वेद्यवेदकसंक्षोभप्रासिभक्तैः सुदर्शनः
कदाचित्क्वापि लभ्योऽसि योगेनेतीशवंचना
अन्यथा सर्वकल्पनासमाप्तिभक्तिमतां कथ

मिति नैवमक्षरोपासकानां यतो देह
वद्भिर्देहाभिमानेन नित्ययोगिभिरव्यक्ता
क्षरात्मविषया गतिः समाधिरूपा निष्ठा दुः
खमतिक्लेशेनावाप्यते देहाहंभावविल
यस्य दुर्भेदत्वात् चिरतरसमाधिस्थितस्यैव
न देहाहंभावानादरस्वरूपो निष्ठाक्रमः एवम
क्षरोपासकानां क्लेशाधिक्यमुक्त्वा कर्मयोगि
नां स्वात्मानुग्रहाधीनं प्रयासाभावं प्रतिपादयि
तुमाह ५ ॥ ये तु सर्वाणि कर्माणि मयि स
न्यस्य मत्पराः अनन्येनैव योगेन मां ध्यायंत
उपासते । तेषामहं समुद्धर्ता मृत्युसंसारसा
गरात् भवामि न चिरात् पार्थ मय्यावेशितचे
तसाम् ॥ तदुक्तपद्वैलक्षण्ये ये तु नः सर्वा
णि विहितानि स्वाभाविकानि च कर्माणि म
यीश्वरे उक्रष्ट्वा समर्प्य मत्परा बुद्ध्या नेप्रत्य
वमर्शात्यागेन मदेकनिष्ठाः संतः तथानन्येन
न विद्यतेन्यद्बुद्ध्या नेश्वरदृग्गोचरं वस्तु यस्मिं
स्तादृशेनैव योगेन ध्यानयोगेन मामीश्वरा
त्मानमहंतासंवेद्यं ध्यायंतश्चिंतयंत उपास
नेन लक्षणो विद्यमानेन शास्त्राध्यानात्मकमे

गी॰टी
१५८

वोपासतेनेमत्र्वलक्ष्यते तेषांतादृशानांमद्भु
क्तस्वरूपेग्रावेशितमभेदेनसमर्पितंचेतोयै
स्तेषांकर्मयोगिनानचिरात्दहतात्मोपासका
पेक्षयात्मीयसाकालेनजन्ममरणात्मपात्स
मुद्रात्दहंसम्यगुद्धारकोभवामि नतुकर्मयो
गिनोलोकवदेवकर्मणिव्यावृत्तस्यकथंभ
वदनुस्मरणलक्षणोविमर्शोत्पयागउपपद्य
तेपतदत्याश्चर्यमिवभासतेइत्यतआह ९।
७॥ मय्येवमनआधत्स्वमयिबुद्धिंनिवेश
य निवसिष्यसिमय्येवग्रतऊर्ध्वंनसंशयः॥
मय्येवेश्वरात्मनिनिरंतरनयाकतिपयेकालं
मनोमननात्मकमंतःकरणमाधत्स्वसन्निवे
शायमय्येवबुद्धिंबोधशक्तिंसमर्पय ग्रतऊ
र्ध्वंमनोबुद्ध्योःसम्यङ्निवेशनानंतरंमय्येवयु
ष्मानेपिनिवसिष्यसिविश्रांतोभवसिष्यदहा
दपिनमद्विमर्शाद्युक्षससीत्यर्थः नात्रसंशयः
एवमीश्वरात्मनिविश्रांत्यर्थंस्वात्मेनुपासाक्र
मसत्काकृतोप्यशक्तोवैतत्दनुष्ठानस्यासंभ
वेसतिगोणानिसाधनानतरागण्याह ८॥
ग्रथचित्तंसमाधातुंनशक्नोषिमयिस्थिरम्

अभ्यासयोगेनततोमामिच्छाप्तुंधनंजय
॥ अथयदिमयिचित्तमंतःकरणंयथोक्त
प्रकारेणदृढंनित्यनिश्चलतयामदभेदेना
वस्थापयितुंनशक्नोषिनप्रभवसि ततस्त
र्हिविक्षिप्तंचित्तंपुनःपुनःप्रत्याहृत्यमदनु
स्मरणलक्षणोयोभ्यासस्तेनमामात्मभेदे
नलब्धुमिच्छप्रयत्नंकुरुकिंच ९ ॥ अभ्या
सेपिसमर्थोसिमत्कर्मपरमोभव मदर्थम
पिकर्माणिकुर्वन्सिद्धिमवाप्स्यसि ॥ यदि
अभ्यासेपिकुतश्चिदंतरायादशक्तोसितर्हि
मत्कर्मपरमोभवविघ्नविनाशायममेश्वरस्य
प्रीत्युत्पादकानियानिकर्माणिजपस्वाध्याय
पूजादीनितान्येवपरमाणिअवश्यकर्तव्ये
भ्यःकार्येभ्यउत्कृष्टानि यस्यतादृशोभव
कुतइत्यतआहमदर्थमपिकर्माणिकुर्वन्सि
द्धिमभीष्टंममाद्विप्राप्तिलक्षणफलसिद्धि
मवाप्स्यसि अत्रापिपद्यांतरमाह १०॥ अथै
तदप्यशक्तोसिकर्तुंमद्योगमाश्रितः सर्वक
र्मफलत्यागंततःकुरुयतात्मवान् ॥ यद्येत
दपियथोक्तंमत्कर्मापिकर्तुमसमर्थोसि

अशक्तत्वाद्याशास्त्रकर्मावेदनाद्यातर्हि मद्यो
गं मम मद्बुद्धियोगमाश्रितः संयतात्मवान्ब
हिर्विरलप्रचाराशितः सन् सर्वेषां यथोपन
तानां स्वाभाविकानां विहितानां च कर्मणां
फलत्यागमभिसंधिराहित्येन कुरु यथो
क्तं कृताधिकमविज्ञातमित्यादि ननु बुद्धि
योगमास्थितस्यापि कर्मफलत्यागः कथं
शक्यक्रियः मानसानां संकल्पानामक्षीण
त्वादित्याशंकाभ्यासस्यैव तत्र कारणत्वमि
त्यतो नाभ्यासः सर्वथा परिहार्य इत्याह ॥
श्रेयो हि ज्ञानमभ्यासाज्ज्ञानाद्ध्यानं विशिष्यते
ध्यानात्कर्मफलत्यागस्त्यागाच्छांतिरनंतरं ॥
हि यस्मात् ज्ञाने प्रत्यभिज्ञालक्षणमभ्यासा
दनुस्मरणरूपेणाभ्यासेन हेतुना श्रेयः पुष्क
लं स्वस्थिरमिति यावद्भवति ज्ञानात्स्थि
रेण ज्ञानेन हेतुना ध्यानमात्मन्येकतानत्वं
विशिष्यते श्रेष्ठं भजते स्वकरं भवतीत्यर्थः
ध्यानात्तादृशेन ध्यानेन हेतुना कर्मफलस्य
त्यागो भवति त्यागादनंतरं त्यागात्तु परमे
व शांतिर्विक्षेपनिवृत्तिरुपरतिर्भवतीत्यर्थः

तथा च शिवसूत्रम् अभिलाषाद्बहिर्गतिः गी·टी
संवाह्यस्येति अतोऽभ्यासो यथा तथाऽनुष्ठेयः य ३५१
दुक्तम् अपि विज्ञाततत्वेन तत्वयाभ्यस्तमिदं
सदा न नाममात्रात्कृतबुद्धिकफलमनुप्र
सादकमिति अधुना सर्वेषां बुद्धियोगादिप्र
तिष्ठितानां योगिनां भक्तियोगाविनाकृतानां
लक्षणपुरःसरं स्ववल्लभतामाह तत्रादौ योग
निष्पन्नस्य लक्षणमाह १२॥ अद्वेष्टा सर्वभूता
नां मैत्रः करुण एव च निर्ममो निरहंकारः स
मदुःखसुखः क्षमी। संतुष्टः सततं योगी य
तात्मा दृढनिश्चयः मय्यर्पितमनोबुद्धिर्यो म
द्भक्तः स मे प्रियः॥ अद्वेष्टेति मैत्र्यादिचतसंस्का
रसंपन्नः निर्ममो निरहंकारः ममैतदिति अ
हमुदारोहं तेजस्वीत्यादिरहंकारस्तौ यस्य न
स्तः तथा समदुःखसुखः समे तुल्ये चित्तवि
कारानुत्पादके दुःखसुखे यस्य तादृशः क्षांतः
यतक्षमी सहनशीलः हर्षविषादपारतंत्र्यम
शक्नुवन् तथा संतुष्टः यथालाभेन संतोषं भज
मानः तथा सततमपरिच्छिन्नकालं व्यवस्था
रावस्थायामपि योगी यथोपनते योगे समा

हितः कथं यतात्मा यतः संयतः प्रत्यवमर्शो
नापनीत्यक्त आत्मा स्वस्वभावो येन सः दृढनि
श्चयः दृढो विचाल्यो निश्चयो आत्मविषयो
बोधो यस्य सः एवंभूतस्यानेकस्थितिभजमानः
अध्यसमाधानेमय्यर्पितमनोबुद्धिरेवंविधो
मद्भक्तो ममेश्वरस्यानुरागातिशयेनोपासीनः
सममप्रियः अथ कर्मयोगिनो लक्षणमाह
प्र ।१४॥ यस्मान्नो द्विजते लोको लोकान्नो
द्विजते च यः हर्षामर्षभयोद्वेगैर्मुक्तो यः स च
मे प्रियः ॥ यस्मात् बुद्धियोगिधर्मज्ञानयुक्ता
त्कर्मयोगिनः सकाशाल्लोकः संसारिकजनः
नोद्विजते न त्रिविधपवहृतकं निर्वेदं न प्राप्नोति
लोकवत्तस्यापि कर्मसव्यापृतत्वात् अथ च
यश्च कर्मयोगी लोकात्सांसारिकलोकान्नोद्वि
जते निरोधयोगीव चित्तक्षोभलक्षणं निर्वे
दं न प्राप्नोति लोकमध्येपितस्य नित्यसमाहि
तत्वात् तथा हर्षः स्वेष्टलाभे चित्तोत्सेकः अ
मर्षः परस्य लाभसहनं भयं त्रासः उद्वेगः चि
त्तक्षोभः एतैर्विमुक्तो यो मदुपासकः स मे प्रियः
अथ कर्मसंन्यासिनो लक्षणमाह ॥ १५ ॥ अन

पेक्षः शुचिर्दक्ष उदासीनो गतव्यथः सर्वारं
भपरित्यागी यो मद्भक्तः स मे प्रियः ॥ अन
पेक्षो निःस्पृहः शुचिर्बाह्याभ्यंतरशौचसंपन्नः
दक्षः कार्येषु विचक्षणो सम्यगुदासीनः संगर
हितः गतव्यथः नित्यमात्मसमाविष्टतया
ध्यात्मिकादितापत्रयरहितः सर्वानारंभा
विकान्विहितान्वारंभान्कर्माणि परित्यक्तं सं
न्यस्तं शीलस्य स एवंविधः पूर्वोक्तलक्ष
णसंपन्नश्च मम भक्त उपासकः स मे प्रियः
अथ संन्यासयोगिनो लक्षणमाह १६ ॥
यो न हृष्यति न द्वेष्टि न शोचति न कांक्षति
शुभाशुभपरित्यागी भक्तिमान्यः स मे प्रियः ॥
यः सर्वोत्कृष्टगुणयुक्तः यदृच्छोपनते प्रियला
भे न हृष्यति अप्रियलाभे न द्वेष्टि इष्टनाशे न
शोचति अप्राप्तं च न कांक्षति शुभमिष्टप्रा
प्तिहेतुकर्म अशुभमनिष्टप्राप्तिहेतुकर्म सं
न्यस्तं शीलं यस्य स य ईदृशो भक्तिमानुपा
सनायुक्तः स मे प्रियः अथ ज्ञानयोगिनो ल
क्षणमाह द्वाभ्याम् १७ ॥ समः शत्रौ च मित्रे
च तथा मानापमानयोः शीतोष्णसुखदुःखे
षु समः संगविवर्जितः । तुल्यनिंदास्तुति

गी॰टी॰ मौनी संतुष्टो येन केनचित् अनिकेतः स्थिर
१५९ मतिर्भक्तिमान्मे प्रियो नरः ॥ यः प्रागुक्तध
र्म्यामृतयुक्तः शत्रौ मित्रे च समो रागद्वेषरहि
तः मानापमानयोश्च तथा सम एकरूपः शी
तोष्णसुखदुःखादिषु द्वंद्वेषु समो हर्षविषाद
रहितः संगरहितः क्वचिदप्यनासक्तः तथा
तुल्ये उभे कामिमवात्र्यादके निन्दास्तुती
यस्य मौनी संयतवाक् येन केनचिद्यथाप्रा
प्तेन संतुष्टः अनिकेतो नियतवासशून्यः स्थि
राचला मतिः परमार्थविषयो बोधो यस्य स
ईदृशो भक्तिमानुपासकः स मे प्रियो नरः त
था चोक्तम् येन केनचिदाच्छन्नो येन केन
चिदाशितः यत्र क्वचन शायी स्यात्तं देवा ब्रा
ह्मणं विदुरिति अद्वेष्टृत्वादीनि धर्मजातानि
159 कर्मयोगीप्रभृतीनां स्वभावसिद्धत्वादिता
नि तत्त्वयोगश्रमैरुपायत्वेन कथितानि त
दुक्तम् उत्पन्नतत्त्वबोधस्य त्वद्वेष्टृत्वादयो गु
णाः अयत्नतो भवंत्येव न तु साधनरूपिणः
इति अधुनात्र ध्यानयोगादि विनाकृतस्यापि
ईश्वरविषयभक्तियोगयुक्तस्यातिप्रियत्वं स
र्वेषां जनानां यथा तथा भजनाय प्रोत्साह

कत्वेनाह १८।१९॥ येतुधर्म्यामृतमिदं
यथोक्तंपर्युपासते श्रद्दधानामत्परमाभ
क्तास्तेतीवमेप्रियाः॥ तदुक्तलक्षणविप
र्ययेयेतुद्वियोगादिविषयैर्लक्षणैरहिताः
संत इदमनंतरमेवयथोक्तमुक्तप्रकारंध
र्म्यामृतंधर्मएवामृतममृतसाधनत्वात् ध
र्म्यामृतमितिकेचित्पठंतिउपासतेउतिष्ठं
ति तथाश्रद्दधानाआदरातिशययुक्तामत्प
रमामयीश्वरेपरमेणप्रेम्णापरायणाभक्ता
यथातथाजपहोमार्चनादिकर्मणामदुपा
सनायुक्ताः तेतीवममेश्वरस्यप्रियाः पूर्वस्मि
न्श्लोकेषुभक्तेष्वेकवचननिर्देशोमनुष्यसह
स्रेष्वपिमध्येकश्चिदेवमात्रयोगोभवतीति
ध्वनयितुम् इहतुबहुवचनंसर्वेषांभक्तियो
गेधिकारित्वसूचनार्थमितिशिवम् २०॥
उपासनायाद्वैविध्यंलोकानांतयादिशत्
अस्मिन्भजनयोगेयस्तंवन्देहंसमव्ययम्
इतिश्रीभगवद्गीताटीकायांतत्त्वप्रकाशिका
ख्यायांराजानकलक्ष्मीरामविरचितायांभ
क्तियोगोनामद्वादशोध्यायः १२ ॥

गी॰टी
१८॰

ॐ एवमत्र श्रीगीताशास्त्रे यत्र तत्र मच्छब्दप्रयो
गात्किमयं श्रीकृष्णो मच्छब्दवाच्य उतान्यः
कश्चिदित्येवमर्जुनमिषेणाद्यथार्जुनस्य सं
शयमाशंक्यमानो मच्छब्दाभिधेयविवरणा
य त्रयोदशमध्यायं प्रस्तौति श्रीभगवानुवा
च ॥ इदं शरीरं कौंतेय क्षेत्रमित्यभिधीयते
एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञमिति तद्विदः ॥
हे कौंतेय इदं सर्वेषां प्रमाणविषयीभूतं इदं
तापदपतितं वा शरीरं देहः क्षेत्रं नाम कथ्यते
कर्मबीजप्ररोहभूमित्वात्कर्मफलनिर्वृत्तेर्वा
एतज्जडरूपं क्षेत्रं यो वेत्ति वेदयति अंतर्भावि
ताण्यर्थोऽत्र विदिः अहंतयावष्टंभेनाचेतनम
पि चेतनीभावमापादयति तं क्षेत्रज्ञं जीवं
प्राहुः कृषीवलवत्तत्फलभोक्तृत्वात् तद्विद
स्तयोर्विवेकज्ञाः नन्वेवमपि मच्छब्दार्थो न
विवेचित इत्याशंक्याह १॥ क्षेत्रज्ञं चापि मां
विद्धि सर्वक्षेत्रेषु भारत क्षेत्रक्षेत्रज्ञयोर्ज्ञानं
यत्तज्ज्ञानं मतं मम ॥ चोऽवधारणे अपिर्भिन्न
क्रमः तं क्षेत्रज्ञं जीवात्मानमेव मां गौणमच्छ
ब्दाभिधेयं सर्वक्षेत्रेष्वपि चानर्देशविपभूत

160

विशेषमभिप्रेत्यविद्धिजानीहि हे भारत ना
नाविधेष्वपिक्षेत्रेष्वहमात्मैकएवात्रस्सतर
त्याशयेनैकवचनबहुवचननिर्देशः श्रुवं
न्यमच्छहाभिधेयमग्रेवक्ष्यतिज्ञेयंयत्तदि
त्यत्र एतदेवप्रतिपत्तिदार्ढ्यायानुवदति
क्षेत्रक्षेत्रज्ञयोर्विवेकेनयज्ज्ञानंसम्यकातिप
त्याप्रत्यभिज्ञाने तन्मममच्छहाभिधेयस्य
ज्ञानंमतम् अधुनाक्षेत्रक्षेत्रज्ञयोःस्वरूपवि
शेषप्रतिपादयितुंप्रतिजानीते २॥ तत्क्षे
त्रंयच्चयादृक्चयद्विकारियतश्चयत् सच
योयत्प्रभावश्चतत्समासेनमेशृणु ॥ तत्क्षे
त्रंयत्स्वरूपतोजडदृश्यादिस्वभावंयादृक्चे
च्छादिधर्मकं यद्विकारियैरिन्द्रियादिविका
रैर्युक्तंयतश्चप्रकृतिपुरुषसंयोगाद्भवति
यदितियैःस्थावरजंगमादिभेदैर्भिन्नमित्य
र्थः सचक्षेत्रज्ञोयःस्वरूपतःयत्प्रभावश्चाचिं
त्यैश्वर्ययोगेनयैःप्रभावैःसंपन्नःतत्सर्वंसाम
स्त्येनव्यक्तताभावेनसंक्षेपेणमत्तःशृणु
नत्वेवंचेदत्रपरीतमुयमस्तर्हिविस्तारतए
ववक्तव्यमित्यतआह ३॥ ऋषिभिर्बहुधा

गीतं छन्दोभिर्विविधैः पृथक् ब्रह्मसूत्रपदैश्चै
व हेतुमद्भिर्विनिश्चितैः ॥ ऋषिभिः श्रीवसि
ष्ठादिभिर्बहुधा बहुभिः प्रकारैर्योगशास्त्रवेदांत
सांख्यन्यायादिशास्त्रेषु गीतमुपलालितं
तथा विविधैर्नानाप्रकारैश्छंदोभिर्वेदैरुपनि
षदाख्यैश्च गीतम् ब्रह्मणः सूत्रैः पदैश्च ब्र
ह्म लक्ष्यते सूच्यते एभिरिति ब्रह्मसूत्राणि यतो
वा इमानि भूतानि जायंते इत्यादीनि तटस्थ
लक्षणपराणि तथा च ब्रह्म पद्यते गम्यते सा
क्षाज्ज्ञायते एभिरिति पदानि स्वरूपलक्षणपरा
णि सत्यं ज्ञानमनंतं ब्रह्मेत्यादीनि तैश्च बहुधा
गीतम् किंच हेतुमद्भिः सदेव सोम्येदमग्र आ
सीत् कथमसतः सज्जायेतेति तथा को ह्येवा
न्यात्कः प्राण्यात् यदेष आकाश आनंदो न स्या
त् एष ह्येवानंदयतीत्यादियुक्तिमद्भिः विनिश्चि
तैरुपक्रमोपसंहारैकवाक्यतया संदि
ग्धार्थप्रतिपादकैरित्यर्थः यद्वा अथातो ब्रह्म
जिज्ञासेत्यादीनि ब्रह्मसूत्राणि उच्यंते तान्ये
व ब्रह्म पद्यते निश्चीयते एभिरिति पदानि तैर्हे
तुमद्भिरीक्षतेर्नाशब्दम् आनंदमयोऽभ्यासा

दित्यादिभिश्च क्लिमद्भिर्विनिश्चितार्थैः ग्रंत
स्तेषां विस्तरतश्चत्वा प्रसिद्धमेव तथाप्यहं
समासेनव्याचक्षेइति तत्त्वेश्वरूपमाह
४॥ महाभूतान्यहंकारो बुद्धिरव्यक्तमेव
च इंद्रियाणि दशैकं च पंच चेंद्रियगोचराः॥
महाभूतानि भूम्यादीनि अहंकारस्तत्कारण
भूतः बुद्धिर्विज्ञानात्मकं महत्तत्वं अव्यक्तं मूल
प्रकृतिः इंद्रियाणि दशैकं च मनः पंचतन्मा
त्ररूपाएव शब्दादयश्चाकाशादिविशेषगु
णतयाव्यक्ताः संतइंद्रियविषयाः पंच एवं
चतुर्विंशतितत्वानि क्षेत्रमित्युच्यते अथद
र्शनांतरोक्तेच्छादीनामात्मधर्मत्वप्रक्तं तन्नि
राकर्तुं प्रमेयतया तेषां क्षेत्रधर्मत्वमाह ५॥
इच्छा द्वेषः सुखं दुःखं संघातश्चेतनाधृतिः
एतत्क्षेत्रं समासेन सविकारमुदाहृतम्॥
इच्छादयः प्रसिद्धाः क्षेत्रधर्माएव नात्मधर्माः
संघातः शरीरं चेतना ज्ञानात्मिका मनोवृत्तिः
धृतिर्धैर्यं ततः कारणत्रयस्य साधारणं संघातथार
णत्वरूपा प्राणादिलक्षणा वृत्तिः तदुक्तं सामा
न्यकरणवृत्तिः प्राणाद्यावायवः पंचेति एत

क्षेत्रं सविकारमिंद्रियादिविकारसहितं सं
क्षेपेण तुभ्यं मयोक्तम् इति क्षेत्रोपसंहारः
अथेदानीं क्षेत्रज्ञस्य सविस्तरं वर्णयिष्यमाण
स्य ज्ञानसाधनान्याह पंचभिः ७ ॥ अमा
नित्वमदंभित्वमहिंसा क्षांतिरार्जवम् आचा
र्योपासनं शौचं स्थैर्यमात्मविनिग्रहः ॥ अमा
नित्वं स्वगुणश्लाघाराहित्यम् अदंभित्वं ला
भाद्यर्थं स्वधर्मप्रकटीकरणाभावः अहिंसा
परपीडावर्जनम् क्षांतिः सहिष्णुता आर्जव

मवक्रता आचार्योपासनं ज्ञानोपदे
ष्टुर्गुरोः शुश्रूषा शौचं बाह्यमाभ्यंतरम् बा
ह्यं मृज्जलादिना अभ्यंतरं रागादिमलक्षा
लनम् तथा च स्मृतिः शौचं तु द्विविधं प्रो
क्तं बाह्यमाभ्यंतरं तथा मृज्जलाभ्यां स्मृतं
बाह्यं भावशुद्धिस्तथांतरमिति स्थैर्यं सन्मा
र्गे प्रवृत्तस्य तदेकनिष्ठता आत्मविनिग्रहः
शरीरसंयमः एतज्ज्ञानमिति प्रोक्तमिति प
चमेनान्वयः किंच ७ ॥ इंद्रियार्थेषु वैरा
ग्यमनहंकार एव च जन्ममृत्युजराव्या
धिदुःखदोषानुदर्शनम् ॥ इंद्रियार्थेषु

ष्टानु अविवेकेषु विषयेषु वैतृष्ण्यम् अनहं १५ ॥
कारः अहंसर्वोत्कृष्ट इति गर्वाभावः जन्मादि ६३।
षु दुःखदोषयोरनुदर्शनं पुनः पुनरालोच
नम् दुःखरूपस्य दोषस्यानुदर्शनमिति वा
किंच ८ ॥ असक्तिरनभिष्वंगः पुत्रदारगृ
हादिषु नित्यंच समचित्तत्वमिष्टानिष्टोप
पत्तिषु ॥ असक्तिः पुत्रादिपदार्थेषु निमम
मनस्कत्वम् अनभिष्वंगः पुत्रादीनां सुखेदुः
खेचात्ममेव सुखी दुःखी इत्यध्यासातिरेकाभा
वः इष्टानिष्टयोरुपपत्तिषु प्राप्तिषु नित्यंस
मचित्तत्वं हर्षविषादरहितमनस्कत्वम् किं
च ९ ॥ मयिचानन्ययोगेन भक्तिरव्यभि
चारिणी विविक्तदेशसेवित्वमरतिर्जनसं
सदि ॥ मय्यात्मन्यनन्येन निरंतरेण योगे
नत्र्यादियोगेन भक्तिरूपा सम्प्रोक्तलक्षणा
अव्यभिचारिणी निश्चला दृढा विविक्तः शु
द्धः स्वभावतः संस्कारतो वा बहिर्मुखानां प
नत्मलपतां जनानां सभायामप्रीतिः किंच
१० ॥ अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थद
र्शनम् एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतो

न्यथा ॥ आत्मानमधिकृत्य वर्तमानं ज्ञान
मात्मज्ञानोपदेशकं शास्त्रं तत्पर्यालोचने
नित्यत्वं नित्यभावः तत्त्वज्ञानरूपस्य पुरुषा
र्थस्य दर्शनं पुरुषार्थेषु सर्वोत्कृष्टत्वालोच
नम् इत्यर्थः एतदमानित्वमित्यादि विंश
तिसंख्योक्तं ज्ञानमिति प्रोक्तं ज्ञानसाधनत्वाज्ज्ञा
नोत्तरभावित्वाच्च अतोऽन्यथास्माद्विपरीतं
मानित्वादि यदेतदज्ञानमिति प्रोक्तं श्रीव
सिष्ठादिभिर्ज्ञानविरोधित्वात् अतः सर्वथा
रुतो त्याज्यमित्यर्थः एभिर्ज्ञानसाधनैर्य
न्मच्छहार्थलक्षणं ज्ञेयं सामान्यतः सूचि
कमधुना विशेषतो निरूपयति ११ ॥ ज्ञेयं
यत्तत्प्रवक्ष्यामि यज्ज्ञात्वामृतमश्नुते अना
दिमत्परं ब्रह्म न सत्तन्नासदुच्यते ॥ ज्ञेयं ख
वेन ज्ञातं प्रतिभिज्ञातं यौगपंमच्छहार्थल
क्षणं तत्प्रवक्ष्यामि विशेषतो वक्ष्यामि यज्ज्ञे
यं ज्ञात्वा सम्यक्कातिपद्यामृतं मोक्षं प्राप्नो
ति नच्छमशाहृवाच्यं परमार्थतएकमेव
मायया ब्रह्मेश्वरादिभेदभिन्नं शास्त्रेषूक्तं
नग्रादौ ब्रह्मस्वरूपं निरूपयति ब्रह्मालंमयह

163

स्तुअनादिग्रादिरहितंमत्परंमत्तईश्वरात्परं
शुक्लुष्टंमायाकालखअवहितत्वात् नत्सत्
विधिसुखेनप्रमाणेविषयेनोच्यते असन्नि
षेधविषयंचनोच्यतेविधिनिषेधयोरविष
यत्वात् नहिचारस्यशास्त्रेषुबहुधाकृतः इत्र
विस्तारभयान्नोच्यते नद्ब्रह्मस्वरूपंज्ञेयमच्छेद्य
स्यसुखेनवाच्यमिति अधुनाब्रह्मज्ञानोपायभू
तमन्यच्छेद्यवाच्यमीश्वरस्वरूपमाह १२ ॥ सर्वतः
पाणिपादंतत्सर्वतोक्षिशिरोमुखं सर्वतःश्रु
तिमल्लोकेसर्वमावृत्यतिष्ठति ॥ सर्वेषांदेव
ज्ञानांयानिबुद्धिकर्मेंद्रियाणितानिविश्वात्म
नईश्वरस्यैवावयवभेदइतितात्पर्यम् सर्वमहं
तयावृत्यव्याप्यतिष्ठतिस्वस्वभावादप्रच्युतएव
भवतीत्यर्थः तदुक्तम् स्वात्मैवसर्वजंतूना
मेकएवमहेश्वरः विश्वरूपोहमिदमित्यखं
डापरोक्षेहितइति अथेश्वरप्राप्तिकारणभूतं
कूटस्थदेवज्ञतयोःस्वरूपमच्छेद्यवाच्यमन्यो
न्यमविनाभूतत्वादेकत्वनिर्दिशति १३ ॥
सर्वेन्द्रियगुणाभासंसर्वेन्द्रियविवर्जितम्
असक्तंसर्वभृच्चैवनिर्गुणंगुणभोक्तृच ॥

देहेन्द्रियरूपेणसर्वेन्द्रियतद्विषयावभासकम
कूटस्थरूपेणसर्वेन्द्रियविवर्जितम् आत्मरू
पेणासक्तंसंगरहितं जीवरूपेणसर्वभृच्च
सर्वदेहादिकमहंकारेणबिभर्तीति आत्मरू
पेणनिर्गुणंसत्वादिरहितं जीवरूपेणगुणा
नांसत्वादीनांभोक्तृउपलब्धृतज्ज्ञेयमित्यर्थः
एवंमायाकल्पितंचानिर्वाच्यंप्रतिपाद्याधुना
पारमार्थिकेनरूपेणैकंप्रतिपादयति १४॥
बहिरंतश्चभूतानामचरंचरमेवच सूक्ष्मत्वा
त्तदविज्ञेयंदूरस्थंचांतिकेचतत् ॥ भूतानांच

164

राचराणांबहिरंतश्चपरमार्थतस्तदेवमच्छ
ब्दाभिधेयंज्ञेयंसुवर्णमिवकटककुंडलादी
नां अचरंस्थावरंचरंजंगमंभूतजातंतदेवका
रणात्मकत्वात्कार्यस्य नन्वेवमविदितंचेत्तर्हि
कथंनदृश्यतइत्यतआह तन्मच्छब्दवाच्यं
सूक्ष्मत्वादिदंतावच्छिन्नरूपादिहीनत्वादवि
ज्ञेयं इदंतावच्छिन्नवस्तुनिष्ठंज्ञेयत्वंनचास्मि
न्नात्रैकरूपत्वादतोनदृश्यते तथाचश्रुतिः
विज्ञातारमरेकेनविजानीयात् अतस्त्वात्म
नःप्रमेयत्वंप्रतिपादयतांपेयत्तयाप्याय

न्तो च दूरस्थं योजनलक्षान्तरितम् प्रमात
त्वेनध्यानतया च विमर्शतां तदन्तिके च स
न्निकृष्टं प्राप्तमेव तदुःसाधम् तदुक्तं स्वप
दास्वशिरश्छायां यद्वल्लंघितमीहते पादो
द्देशे शिरो न स्यात् तथेयं वैन्दवी कलेति अ
न्यत्र यत्नमीयेक्षतोस्मीति सर्वोप्यात्मनि
लज्जते कथं प्रमेयीकरणं सहतां तन्महेश्व
रइति किंच १६ ॥ अविभक्तं च भूतेषु वि
भक्तमिव च स्थितम् भूतभर्तृ च तज्ज्ञेयं ग्र
सिष्णु प्रभविष्णु च ॥ भूतेषु देवमनुष्यादि
षु चिद्रूपतया परमार्थतो विभक्तमेव सद्वि
भक्तमिवास्थितम् आपाते देहाद्युपाधिभे
देनभासमानत्वात् तदुक्तम् चिद्धर्मा सर्व
देहेषु विशेषो नास्ति कुत्रचिदिति अथम
न्दाधिकारिणामुपासनार्थं तस्यज्ञेयस्य सा
कारतामाह भूतभर्त्रिति तदेवज्ञेयं सत्वेन
सत्वमित्याद्यं योग्ये विष्णुरूपेणास्थिति का
ले भूतभर्तृ रुद्ररूपेण प्रलयकाले ग्रसिष्णु
ब्रह्मरूपेण सृष्टिकाले प्रभविष्णु प्रभवन
शीलं किंच एवं सच यइत्यस्य तत्स्वरूकथ

नैनोत्तरश्लोकायत्वमवश्येत्यस्योत्तरं प्रभा
वप्रतिपादनरूपमाह १८ ॥ ज्योतिषामपि
तज्ज्योतिस्तमसः परमुच्यते ज्ञानं ज्ञेयं ज्ञान
गम्यं हृदि सर्वस्य विष्ठितम् ॥ ज्योतिषामा
दित्यादीनां तदेव मच्छब्दाभिधेयं ज्योतिप्र
काशकं संवित्प्रकाशप्रकाशत्वात्तेषाम्
तथा च श्रुतिः न तत्र सूर्यो भाति न चंद्रतार
कं नेमा विद्युतो भान्ति कुतोऽयमग्निः तमेव भां
तमनुभाति सर्वं तस्य भासा सर्वमिदं विभा
तीति तमसोऽज्ञानात् परं तेनास्पृष्टमुच्यते
परमार्थसंविद्रूपाया अप्रहतायाः कस्यांचि
दप्यवस्थायामनाद्यादिनत्वात् तदेव ज्ञा
नं बुद्धिवृत्तावभिव्यक्तम् तदेव तद्रूपाया आका
रेणाज्ञेयं च तदेवामानित्वादिलक्षणेन ज्ञा
नसाधनेन गम्यं च तदेव सर्वस्य प्राणिजा
तस्य हृदि देहैकदेशविशेषेणाप्रच्युतबल
ज्ञानादिनास्थितम् सर्वत्र देहे सामान्यात्म
ना प्रदीपप्रभामंडलवास्थितमपि अत्र तत्र
विशिष्टतया प्रदीपवत्स्थानास्थितम् १७ ॥
इतिते[illegible]णानांश्लोकेचोक्तमासतः

165

मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते ॥
तेत्रं महाभूतादिरूपं तज्ज्ञानं चामानित्वा
दि तत्त्वज्ञानार्थदर्शनान्तं ज्ञेयं चानादिमद
त्यादिविशिष्टमित्येतत्संक्षेपेणोक्तं एतद्
फलत्रयं मद्भक्तो मदुपासको विज्ञाय मद्भा
वाय मच्छब्दाभिधेयसंपत्तये योग्यो भवति
एवं तत्त्वे ज्ञेयस्य याद्दक्सत्त्वयोयत्नभावस्य
स्यैवं धर्मिप्रतिपादनं प्राधान्येन निर्वाहितम्
अधुना यद्धिकारियतन्नयरिति धर्मप्रतिपा
दनायाह १९ ॥ प्रकृतिं पुरुषं चैव विद्ध्यना
दी उभावपि विकारांश्च गुणांश्चैव विद्धि प्रकृ
तिसंभवान् ॥ प्रकृतिं स्वस्वभावविस्तारण
रूपां पुरुषं परिशयानं कूटस्थमात्मानमता
उभावपि अनादीन विद्येते अन्योन्यमादिर्ययो
ते अनादी परस्परसंबद्धतयात्तुल्यकल्पे स
मप्राधान्ये जानीहि नहि पुरुषमंतरेण प्रकृ
तेः प्रकृतित्वम् अथवा प्रकृतिं विना पुरुष
स्य पुरुषत्वम् यथा मोक्षदशायामन्योन्य
वियोगेन यत्वनादी आदिरहिते इति विद्धि
यतेनमोचितम् ईश्वराद्वाविर्भूतत्वेनादि

166

मत्वात् विकारान्देहेंद्रियादीन्गुणान्गुण
परिणामान्सुखदुःखादीन्प्रकृतेः संभूता
न्विद्धि प्रकृतिसंभूतत्वमेव विशदयति
१९ ॥ कार्यकारणकर्तृत्वे हेतुः प्रकृतिरु
च्यते पुरुषः सुखदुःखानां भोक्तृत्वे हेतु
रुच्यते ॥ कार्यस्य देहादेः कारणस्येंद्रिया
देः कर्तृत्वे उत्पादकत्वे क्षेत्रज्ञस्य प्रकृतिर्हि
गुणसाम्यात्मिका हेतुः प्रयोजिका उच्यते
पाचकस्येव पचनसामग्री न हि चेतनं वि
हाय जडस्य कर्तृत्वं युक्तम् तदुक्तम् अस्मि
न्सतीदमस्तीति कार्यकारणतापि या साप्य
पेता विहीनानां जडानां नोपपद्यते इति
एतदुक्तं भवति स्वस्वविस्मरणेनैव बहिर्मु
खतया तदुपादानं देहेन्द्रियाद्यंकुरं क्षेत्र
तज्जनयतीत्यर्थः बिम्बभूतः पुरुषश्चात्मा
सुखदुःखभोक्तृत्वे प्रतिबिम्बरूपस्य क्षेत्रज्ञ
स्य प्रयोजक उच्यते आश्रयभूतत्वात् पि
तेव बालकस्य तत्र तदाश्रयभूतः पु
रुषएव चेद्भोक्तृत्वे प्रयोजकस्तर्हि सएव भो
क्तास्तु किं चिदाभासरूपक्षेत्रज्ञपरिकल्प

नयानलयोदर्शप्रतिबिम्बितोवन्हिर्दोषंद
हेदित्यतआह २०॥ पुरुषः प्रकृतिस्थोहि
भुंक्तेप्रकृतिजान्गुणान् कारणंगुणसंगोस्य
सदसद्योनिजन्मसु॥ हियस्मात्पुरुषआत्मा
प्रकृतिस्थोस्तत्कार्येदेहादौतादात्म्येनस्थितः
सन्क्षेत्रज्ञसंज्ञोयमः प्रकृतिजान्गुणान्सुखदुः
खादीन्भुंक्तेनुभवति नस्वरूपतः अयोगोल
कादौतादात्म्यमापन्नोवन्हिर्यथादाह्यंदहति
एवमेकस्मिन्देहेतादात्म्यापन्नोदेहांतरेतद
प्रसक्तिरित्याशंक्याह कारणमिति अस्यदे
हवृत्तस्यसतीषुदेवादियोनिषुअसतीषुतिर्यगादि
योनिषुसदसतीषुमनुष्यादियोनिषुयानिज
न्मानितेषुगुणसंगः शुभाशुभकर्मकारिभि
रिन्द्रियैःसंगःकारणमित्यर्थः नतुप्रकृतिता
दात्म्यमापन्नस्यपुरुषस्यक्षेत्रज्ञसंज्ञास्तवस्त
नस्तनस्यैवभोक्तृत्वंसदादियोनिजन्मवतर्हि
ननोव्यतिरेकानुपपत्तेरनिर्मोक्षप्रसक्तिरि
त्याशंक्याह २१॥ उपद्रष्टानुमंताचभर्ताभो
क्तामहेश्वरः परमात्मेतिचाप्युक्तोदेहेस्मिन्पु
रुषः परः॥ अस्मिन्प्रकृतिकार्येदेहेवर्तमा

नोपि पुरुषः उपद्रष्टा इंद्रियद्वारा उपलब्धा अं
तःकरणद्वारानुमंता विश्वप्राणद्वारा भर्ता
देहादेर्धारकः बुद्धिद्वारा सुखदुःखादेर्भोक्ता
एवमीदृशः सन्नपि परो देहादेर्भिन्न एवोक्तः
यतो महेश्वरः स्वातंत्र्यमपरित्यजन् परमात्मा
परमोत्कृष्टो निरवधिरात्मायमेव यथा लौ
किकेश्वरः स्वेच्छयावंभ्रमभ्युपगच्छन् स्वातंत्र्ये
णैव मोचयति तद्वत् अतो नानिर्मोक्षप्रसक्तिः
एवं प्रकृतिपुरुषविवेकलक्षणस्य ज्ञानस्य फ
लमाह २२ ॥ य एवं वेत्ति पुरुषं प्रकृतिं च गु
णैः सह सर्वथा वर्तमानोपि न स भूयोभिजा
यते ॥ यो योगी एवमुक्तविधया पुरुषं गुण
संयुक्तां प्रकृतिं च विवेकेन वेत्ति उपलभ्यते
सर्वथा विधिमुल्लंघ्यापि वर्तमानः स योगी
योगतारतम्येन पुनर्नाभिजायते देहसंबंधं
न प्राप्नोति मुच्यत इत्यर्थः किं पुनर्वक्तव्य
स्वधर्मस्थो भूयो न जायते इत्याशयः एवं प्र
कृतितो विवेकेनात्मनि प्रत्यभिज्ञाते सति त
द्दर्शनार्थमुपायभेदानाह २३ ॥ ध्यानेना
त्मनि पश्यंति केचिदात्मानमात्मना अन्ये

सांख्येन योगेन कर्मयोगेन चापरे ॥ केचि
द्विवेकभाजो योगिन आत्मनि स्वतायाद्धि
मे पुरुषमात्मानं स्वस्वरूपे एव कूटस्थं पुरु
षमात्मानात्मत्वेन ध्यात्रतयानन्तध्येयतया
ध्यानेन चित्तैकाग्र्येण पश्यंति साक्षात्कुर्व
न्ति एवमन्ये योगिनः सांख्येन प्रकृतिपुरुष
वैलक्षण्यालोचनेन अन्ये योगेनाष्टांगेन अ
परे कर्मयोगेनोक्तलक्षणेन पश्यंतीति सर्व
त्रानुषंगः एवं प्रत्यभिज्ञातात्मतत्त्वस्य साध
नभेदानुक्रान्तदनभिज्ञस्य श्रवणमात्रेण भ
जनप्रवणस्य फलमाह २४ ॥ अन्ये त्वेवम
जानंतः श्रुत्वान्येभ्य उपासते तेपि चातितर
न्त्येव मृत्युं श्रुतिपरायणाः ॥ अन्ये तु एवं प्र
कृतितो विवेचितमात्मानमप्रत्यभिजानं
तोन्येभ्यस्तत्त्वनिष्ठेभ्यः श्रुत्वा [illegible] नत्ववधा
ये श्रद्धादिगुणयुक्ता उपासते ध्यायंति ते
पि च श्रवणमात्रतत्पराः संतो मृत्युं संसारं क्र
मेणात्मोपलब्धिः पुरःसरं मतिंरन्त्येव नन्वेवं
संसारोत्तरणे प्रकृतिपुरुषविवेक एव सा
पकतमत्वेन किमिति स्पष्यते किंसाधनोत

रेनास्तीत्याशंक्याह २५ ॥ यावत्संजायते
किंचित्सत्वं स्थावरजंगमम् क्षेत्रक्षेत्रज्ञसं
योगात्तद्विद्धि भरतर्षभ ॥ यावदपरिसंख्येयं
स्थावरजंगमात्मकं किंचित्सत्वप्राणिमात्रं सं
सारे जायते हे भरतर्षभ तत्क्षेत्रक्षेत्रज्ञयोः सं
योगादविवेककृतात्तादात्म्याध्यासाद्भवती
तिजानीहि अतस्तयोर्विवेकपवस्यापनीत
याभावेन संसारोत्तरणप्रकृष्टो हेतुः अथात्म
दर्शनस्यावधिमाह २६ ॥ समं सर्वेषु भूते
षु तिष्ठंतं परमेश्वरम् विनश्यत्स्वविनश्यंतं
यः पश्यति स पश्यति ॥ विनाशभागिषु स
र्वेषु स्थावरजंगमात्मकेषु भूतेषु प्राणिषु स
मं चिद्रूपतया निर्विशेषं वर्तमानमविनाशि
नं स्वात्मानमेवेश्वरं यो योगी स्वत्वेन प्रत्यव
मर्शात्मा तात्कृते स एव पश्यति तस्यै
व पारमार्थिकदर्शनमाक्रान्तमन्यदृष्टत्वम्
न तद्व्यतिरिक्तपुरुषवद्बद्धदर्शिनः ननु
भिन्नात्मदर्शिन एव किमिति सम्यग्दर्शन
मित्याशंक्याह २७ ॥ समं पश्यन्हि सर्वत्र
समवस्थितमीश्वरम् न हिनस्त्यात्मनात्मा

नंततोयातिपरांगतिम् ॥ यस्मादात्मान
मेवेश्वरंसर्वभूतमात्रेसमंचिद्रूपतयानिर्वि
शेषंसम्यगप्रच्युतस्वरूपतयास्थितंसाक्षात्कु
र्वंतः सएवसर्वंवेदआत्मानमात्मनापरिच्छि
न्नमात्रपुरुषमात्रज्ञानेनहिनस्तिनहेयधी
करोति अतस्तस्यैवभेदभावात्सम्यग्दर्श
नम् नभेददर्शिनः अथतज्ज्ञानमाह ततः
सम्यग्दर्शनात्तपदमेवयोगीपरांगतिंमो
क्षाख्यांप्राप्नोति अथभिन्नात्मदर्शिनोदर्श
नंमत्यायवति २८ ॥ प्रकृत्यैवचकर्माणि
क्रियमाणानिसर्वशः यःपश्यतितथात्मा
नमकर्तारंसपश्यति ॥ प्रकृत्यैवदेहेंद्रि
याद्याकारेणपरिणतयासर्वैःप्रकारैःक्रि
यमाणानिकर्माणियःपश्यति तथात्मा
नंचाकर्तारंयःपश्यतिसाक्षात्करोतिसएव
वात्मानंपश्यतितेनैवप्रकृतितोविवेकेन
सम्यगात्मादृष्टः नन्वेवंसतिभिन्नात्मदर्शि
नोप्यसम्यग्दर्शित्वान्मोक्षावाप्तिःस्यादित्या
शंकापरिप्याह २९॥ यदाभूतपृथग्भा
वमेकस्थमनुपश्यति ततएवचविस्तारं

गी॰टी॰
१६९

169

ब्रह्म संपद्यते तदा ॥ यदायं भिन्नात्मदर्शी
योगी भूतानां भेदं वैचित्र्यमेकस्मिन्नात्मनि प्र
कृतौ स्थितं योगाभ्यासेनात्र तस्यैवानुपश्य
ति साक्षात्करोति तत एवात्मनस्तेषां विस्ता
रं पृथक्तामुदितं पश्यति तदा ब्रह्म संपद्य
ते मुच्यते इत्यर्थः ननु भिन्नात्मदर्शनदशायां
ननु चेतनानुग्रहं विना जडायाः प्रकृतेः क
र्तृत्वानुपपत्तेरात्मन एव कर्तृत्वमायातमि
त्याशंक्याह श्०॥ अनादित्वान्निर्गुणत्वात्प
रमात्मायमव्ययः शरीरस्थोपि कौंतेय न
करोति न लिप्यते ॥ अयं परमात्मा कूटस्थः
स्वभावतो व्ययः निर्विकारः शरीरे स्थितोपि
वर्तमानोपि अनादित्वादुत्पत्तिविहीनत्वा
न्निर्गुणत्वात्सत्त्वादिरहितत्वान्न करोति न च
कर्मभिर्लिप्यते भिमानकलंकितः क्रियते
न दुःखं भवति न केवलायाः प्रकृतेः कर्तृत्वं
किं तु तादात्म्यमापन्नस्य क्षेत्रज्ञस्यापि मत्वा
त् सत्त्वादिगुणयुक्तत्वाच्च कर्तृत्वम् नात्म
नः अत्रार्थे पंगुअंधन्यायो दर्शितः अत्रैतद
र्थप्रतीत्यर्थं दृष्टांतमाह श्०॥ यथा सर्व

गतं सौक्ष्म्यादाकाशेनोपलिप्यते सर्वत्रा

वास्थितो देहे तथात्मा नोपलिप्यते ॥ य

था सर्वत्र पंकादिष्ववस्थितमाकाशं सौ

क्ष्म्यादसंगत्वादिभिर्नोपलिप्यते तथा सर्व

त्र देहे जातावेकवचनं सर्वेषु देहेषु स्थि

तोप्ययमात्मा कर्मभिस्तत्फलैश्च न संस्पृश्य

ते नन्वेकत्र देहेवच्छिन्नस्यात्मनः कथं सर्व

त्र देहव्यापकत्वमित्याशंक्य दृष्टांतेन स्पष्टय

ति ३२॥ यथा प्रकाशयत्येकः कृत्स्नं लोक

मिमं रविः क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशय

ति भारत ॥ यथैक एव रविरिमं कृत्स्नं जी

वलोकं प्रकाशयति यथैक एवात्मा क्षेत्री दे

हज्ञात्वेनाभासः सन्कृत्स्नं क्षेत्रं प्रकृतिपरिणाम

रूपं प्रकाशयति प्रकाशनेन व्याप्नोति अ

थ क्षेत्रक्षेत्रज्ञविवेकस्य फलमाह ३३॥

क्षेत्रक्षेत्रज्ञयोरेवमंतरं ज्ञानचक्षुषा भूत

प्रकृतिमोक्षं च ये विदुर्यांति ते परम् ॥ क्षे

त्रक्षेत्रज्ञयोर्यथावदेवमुक्तेन प्रकारेण क्षेत्रक्षेत्रज्ञयो

र्देहजीवयोरंतरं भेदं ज्ञानचक्षुषा ये विदुः प्र

त्यभिजानंति अत एव ईदृशं भूतप्रकृति

मोक्षं भूतप्रकृतेः स्वरूपविस्मरणोपायाम्मो
तोपभक्तिर्ये जानंति ते परं परमात्मानं यांति
प्राप्नुवंतीति शिवम् ३४ ॥ मच्चक्रस्याभि
पेयं यत्तत्वं प्राह भक्तितः क्षेत्रक्षेत्रज्ञनि
र्देशं नमीते हरिमीश्वरम् इति श्रीभगवद्गी
ताटीकायां तत्वप्रकाशिकाख्यायां राजान
कलक्ष्मीरामविरचितायां क्षेत्रक्षेत्रज्ञनि
र्देशो नाम त्रयोदशोऽध्यायः १३ ॥ ॥
ॐ अथ प्रकृतिपुरुषविवेकावांतरदशाभ्य
तां गुणातीतत्वलक्षणां सिद्धभूमिकां विव
क्षन्नस्यार्थं श्रीभगवानुवाच ॥ परंभूयः
प्रवक्ष्यामि ज्ञानानां ज्ञानमुत्तमं यज्ज्ञात्वा
मुनयः सर्वे परां सिद्धिमितो गताः ॥ ज्ञाना
नां पुरुषस्वरादिविषयाणां मध्यादुत्तमम भो
गमोक्षरूपयामलसिद्धिप्रदत्वात्प्रकृष्टं परं
स्वसंज्ञानं वक्ष्यमाणं गुणातीतत्वं भूयः प्र
कृतिपुरुषविवेकांतर्गतस्याप्यस्य ज्ञानस्य
दुरवगमत्वात्पुनरपि प्रकर्षेण वक्ष्यामि य
ज्ज्ञानं ज्ञात्वा प्रतिपद्य सर्वे कपिलादयो मु
नयः परां सिद्धिमुत्कृष्टं स्थानं प्राप्ता इतोस्मादे

170

वदेहाद्गताः प्राप्ताः यतोस्मात्तस्मादयंप्रमा
वः १ ॥ इदंज्ञानमुपाश्रित्यममसाधर्म्यमा
गताः सर्गेपिनोपजायंतेप्रलयेनव्यथंति
च ॥ इदंवक्ष्यमाणंज्ञानंगुणातीतत्वलक्ष
णमुपाश्रित्यस्वाधीनंकृत्वाकपिलादयो
मुनयोममेश्वरस्यसाधर्म्यंप्रकृतिपुरुषयो
र्येष्ठविनियोत्केवलत्वेनसमानैश्वर्यमा
गताःप्राप्ताःततःकिमित्यतआह सर्गेपि
सत्कर्तृकेब्रह्मादीनांसर्जनकालेपिते पर
तेत्रतयानोपजायंतेस्वाधीनप्रकृतितया
याहृच्छिकजन्मत्वात् तथाप्रलयेतेषांल
यकालेनव्यथंतिनबिभ्यतिच उक्तप्रकारे
णस्वतंत्रसत्वात् तत्रसाधर्म्यमित्युक्तो
स्वात्मनईश्वररूपस्यधर्ममाह २ ॥ ममयो
निर्महद्ब्रह्मतस्मिन्गर्भंदधाम्यहम् संभवः
सर्वभूतानांततोभवतिभारत ॥ ममेश्वर
स्यसंबंधिशक्तिरूपंमहद्व्यापकंब्रह्मस्वरू
पगोपनरूपापेश्वरीप्रकृतिर्योनिर्भूताना
मुत्पत्तिहेतुं तस्मिन्नेवाहमीश्वरोगर्भंवि
देशंदधामिनिक्षिपामि भूतप्रकृतेर्व्याह

त्यर्थं महद्ब्रह्मशेषपादानं किमुक्तं भवति स्व
कीयमेव चिदंशं सर्वार्थं स्वरूपगोपनमव
लम्बयामीति ततः सर्वभावाच्छादनमुप
नामितानश्चिदंशान् स्वरूपाभियानान्सर्वेषां च
चतुर्दशविधानां भूतानां तेन मतानां संभव उत्प
त्तिर्भवति अथ महद्ब्रह्मणामभियेयत्वान्तस्या
एकस्या एवेश्वरप्रकृतेर्व्याप्तिमाह ३।। स
र्वयोनिषु कौन्तेय मूर्तयः संभवन्ति याः तासां
ब्रह्म महद्योनिरहं बीजप्रदः पिता ।। सर्वा
सु च चतुर्दशविधासु योनिषु भूतजातिषु या
नानाविधा मूर्तयः संस्थानविशेषाः संभवं
ति तासामनन्तानामेकं महद्ब्रह्मैवेश्वरीप्र
कृतिर्योनिरुत्पत्तिस्थानं मातृस्थानीयम्
अहं चेश्वरस्तासां बीजप्रदश्चिदंशसमर्पकः
पितृस्थानीयः नन्वसंगस्यापरेशरूपस्य
पुरुषस्य कथं जीवत्वप्राप्तिरिति तत्प्रकार
माह ४।। सत्त्वं रजस्तम इति गुणाः प्रकृ
तिसंभवाः निबध्नन्ति महाबाहो देहे देहि
नमव्ययम् ।। सत्त्वं रजस्तम इति गुणाः स्व
रूपतः सुखमोहात्मकाः प्रकाशप्रवृत्तिनियम

नशीलाहित्रगणसाम्यात्मिकायाः प्रकृति
तेउत्पन्नाः पार्थकौन्तेय ज्ञाः संतःअव्य
यं वस्तुतः स्वस्वभावप्रच्युतिरहितमेव दे
हिनमात्मानं देहे प्रकृतिकार्ये निबध्नंति
तादात्म्यालम्बनेनास्वतंत्रीकुर्वंतीत्यर्थः
तत्र तेषां गुणानां लक्षणं बन्धकत्वं चाह
५॥ तत्रसत्वं निर्मलत्वात्प्रकाशकमनाम
यं सुखसंगेन बध्नाति ज्ञानसंगेन चानघ
॥ तत्रतेषु सत्वादिषु मध्ये सत्वं निर्मलत्वादा
वरकतमोलक्षणमलविविक्तत्वात्प्रकाश
कमिंद्रियद्वाराविषयप्रथाकारणं सज्ज्ञानसं
गेनेदमहं जानामीत्येवंविधेनपुरुषं बध्ना
तितदभिमानेनपरतंत्रीकरोति तथानामयं
दुःखरूपरजोगुणरहितंसत्वंसुखसंगेनसुख्ये
हमित्येवंरूपेणाभिमानेनतादात्म्यमापयति
अथरजसोलक्षणं बंधकत्वं चाह ८॥ रजोरा
गात्मकं विद्धितृष्णासंगसमुद्भवं तन्निबध्नाति
कौंतेयकर्मसंगेनदेहिनम्॥ रजःसंत्तंगुणं
रागात्मकमभिलाषात्मकं विद्धि अतएव तत्
तृष्णासंगसमुद्भवं तृष्णाअप्राप्तेर्थे प्रीतिः आसं

गः प्राप्तेऽर्थे लग्नमनस्कत्वं तयोः समुद्भवो य
स्मात् तद्रजो देहिनं उत्कर्षं कर्मसंगेन प्रह
र्षितत्परत्वेन निबध्नाति परवशीकरोति
तमसो लक्षणं बंधकत्वं चाह ७ ॥ तमस्त्व
ज्ञानजं विद्धि मोहनं सर्वदेहिनाम् प्रमादा
लस्यनिद्राभिस्तन्निबध्नाति भारत ॥ तमो
गुणमज्ञानजं सत्त्वकार्यप्रकाशाभावप्रभ
वमथवावरणशक्तिरूपात्प्रकृत्यंशाज्जातं
विद्धि अत एव मोहनं ज्ञेयविषयाप्रतिपत्ति
करम् सर्वेषां देहिनां उ तमः प्रमादेनव
धानतालस्यमनुद्यमः निद्रेंद्रियशक्ति
विरामस्ताभिर्निबध्नात्यात्मसात्करोति नन्व
सत्त्वादीनामन्योन्याश्रयत्वात्कथं विविक्त स्व
कार्यकरणसामर्थ्यमित्याशंक्याह ८ ॥ स
त्त्वं सुखे संजयति रजः कर्मणि भारत ज्ञानमा
वृत्य तु तमः प्रमादे संजयत्युत ॥ स्वबलत
णे सत्त्वकार्ये सति सत्त्वं संजयत्युत्कर्षं लभते
अन्योन्याश्रयत्वे सत्यपि एवं कर्मणि स्वका
र्ये सति रज उत्कर्षं लभते तमो ज्ञानं विषया
वरणमावृत्यातिशयाय प्रमादे सम्यग्जयत्यु

172

त्कर्षं लभते सत्वादिगुणो ज्ञानादीनामुपलक्ष
णे ननूत्कर्षलाभस्तान्योन्याभिभाव्याभिभाव
कतां विना न विद्यते इत्यत आह ९॥ रजस्त
मश्चाभिभूय सत्वं भवति भारत रजः सत्वं त
मश्चैव तमः सत्वं रजस्तथा॥ रजस्तमसी अभि
भूय त्युत्कृत्य सत्वं भवत्युद्भवं लभते न तदा त
दितरौ गुणौ स्वकार्यमारभेते एवं सत्वतमसी
अभिभूय रजो गुणो वर्धते सत्वरजसी अभिभू
य तमो गुणो वर्धते अथ सत्वादीनां वृद्धिकानां
स्वकार्यकरणसामर्थ्यमाह १०॥ सर्वद्वारेषु
देहेऽस्मिन्प्रकाश उपजायते ज्ञानं यदा तदा वि
द्याद्विवृद्धं सत्वमित्युत॥ अस्मिन्देहे यस्मिन्
क्षणे सर्वेषु श्रोत्रादिद्वारेषु विषयसंवेदनरू
पो ज्ञानात्मकः प्रकाशो जायते तदा सत्वगुण
रजस्तमसी अभिभूय उपचित इति जानीयात्
उत शब्दात्सुखादिलिंगेनापि किंच ११॥ लो
भः प्रवृत्तिरारंभः कर्मणामशमः स्पृहा रजस्ये
तानि जायंते विवृद्धे भरतर्षभ॥ रजसि विवृ
द्धे सति लोभः इष्टार्थेमनसश्चांचल्यं प्रवृत्ति
स्तदाहरणे यौत्सुक्यं तदर्थमेव कर्मणामारं

गी॰टी॰
१२३

173

मः अशमः इष्टेष्वसिद्धे सिद्धे वा कर्मतो निवृ
त्त्यभावः स्पृहा तदेकमनस्कता एतानि जाय
ते एतैर्लिंगै रजोगुणवृद्धिं जानीयात् किंच १२॥
अप्रकाशो प्रवृत्तिश्च प्रमादो मोह एव च तम
स्येतानि जायन्ते विवृद्धे कुरुनन्दन ॥ सत्वा
भिभवादप्रकाशो विषयानवभासः रजोभि
भवादप्रवृत्तिः कर्माभावः सोद्रेकात्प्रमादः
कर्तव्यार्थानुसंधानराहित्यं मोहः विवेकध्वं
शः तमसि विवृद्धे एतानि लिंगानि जायंते ए
तैस्तमसो वृद्धिं जानीयात् अथ नासत्वादीना
मनुशील्यमानानां लोकांतरप्राप्तिरूपं फलमा
ह १३॥ यदा सत्वे प्रवृद्धे तु प्रलयं याति देह
भृत् तदोत्तमविदां लोकानमलान्प्रतिपद्य
ते॥ यदा सत्त्वमयेणेव जन्मनानवरतसात्वि
कव्यापाराभ्यासात्सत्वे विवृद्धे सति शरीरमृ
त्युं याति तदोत्तमविदां प्रकृष्टज्ञानानां देवादी
नां लोकान्भुवनानि अमलान् तमसोऽभावात्स्व
स्वप्रकाशमयान्प्राप्नोति तत्र जन्म लभते किं
च १४॥ रजसि प्रलयं गत्वा कर्मसंगिषु जा
यते तथा प्रलीनस्तमसि मूढयोनिषु जायते॥

एवंसत्त्वमयेणजन्मनाराजसकर्माभ्यासाद्र
जोगुणेविवृद्धेसतिमरणंप्राप्यकर्मसंगिषु
मनुष्येषुजायते एवंजन्माभ्यस्ततामसक
र्मातमसिप्रवृद्धेमृतोमूढयोनिषुतिर्यग्वृक्ष
नरकादियोनिषुतमस्तारतम्यानुरूप्याज्जा
यतेयेनव्याचक्षतेमरणकालएवसत्त्वादेःप्र
वृद्धेएतानिफलानीतिनेनसमग्रच्छारीरेनुभ
वेप्रविष्ठायतःसर्वस्यैवसर्वथांत्यक्षणेमोह
एवोपजायते अस्मिन्व्याख्यानेसंवादकाल्य
भिमाणिपद्यानि अत्रहेतुमाह १५॥ कर्म
णःसुकृतस्याहुःसात्त्विकंनिर्मलंफलम् रज
सस्तुफलंदुःखमज्ञानंतमसःफलम् ॥
सुकृतस्यसुष्ठुसात्त्विकयाज्ञानसुखमय्याश्र
द्धयाकृतस्यानुष्ठितस्यकर्मणोयज्ञादेःसात्त्वि
कंसत्त्वादागतंप्रकाशंसुखमयममलंरजस्त
मोमलाभिश्रणाद्दिशुद्धंफलमाहुः रजसोह
त्याकृतस्यकर्मणःफलंदुःखंतमसोहस्या
कृतस्यकर्मणोज्ञानंफलमाहुःपरमर्षयः
सात्त्विकादिकर्मलक्षणमष्टादशाध्यायेवक्ष्य
ति अथसत्त्वादीनांलोकांतरेपिसहतिजन

गी॰टी नैनियममाह १७॥ सत्वात्संजायतेज्ञानं
१७४ रजसोलोभएवच प्रमादमोहौतमसोभ
वतोज्ञानमेवच॥ स्पष्टार्थःश्लोकः लोको
त्तरप्रापणेपितेषांनियममाह १८॥ ऊर्ध्वंग
च्छंतिसत्वस्थामध्येतिष्ठंतिराजसाः जघन्य
गुणवृत्तस्थाअधोगच्छंतितामसाः॥ सत्व
वृत्तस्थाऊर्ध्वंसत्वोत्कर्षतारतम्यादुत्तरोत्तरश
तगुणः नन्दात्मनुष्यगंधर्वपितृदेवादिलो
कान्सत्यलोकपर्यंतान्प्राप्नुवंति रजसास्त
सायाकलामध्येमनुष्यलोकेउत्पद्यंते ज
घन्यगुणस्यतमसोवृत्तेप्रमादमोहादौस्थि
ताअधोगच्छंतितमोवृत्तितारतम्यात्तिर्यङ्न
रकादिषुजायंते एवंप्रसक्तानुप्रसक्त्यागुण
वृत्तस्यबन्धकत्वंप्रकृतेज्ञानोपदेशंपुनरप्य
नुसरति १९॥ नान्यंगुणेभ्यःकर्तारंयदा
द्रष्टानुपश्यति गुणेभ्यश्चपरंवेत्तिमद्भावं
सोधिगच्छति॥ अयंद्रष्टाविवेकज्ञानमोपि
यदागुणेभ्योबुद्ध्याद्याकारपरिणतेभ्योन्यं
कर्तारंनानुपश्यतिगुणाएवकर्माणिकुर्वं
तीतिपश्यतितथागुणेभ्यश्चपरंव्यतिरिक्तं

मेवतस्मात्रिगुणमात्मानंवेत्तिसंवेदयतेनत
वैस्वात्म्यमुपलभते समद्भावंमद्रूपंसमा
मधिगच्छति मद्देवस्वस्याःप्रकृतेर्यथेष्ट
विनियोक्ताभवतीत्यर्थः वोवधारणे अथ
विशेषतोनिर्दिशति १९॥ गुणानेतान
तीत्यत्रीन्देहीदेहसमुद्भवान् जन्ममृत्युःज
राद्वःखैर्विमुक्तोमृतमश्नुते॥ देहस्यसमुद्भ
वोयेभ्यस्तानृदृशानेतानकुलक्षणांस्त्रीन्गुणा
न्सत्वादीनतीत्यस्वात्मनितेभ्योव्यतिरेकेण
विश्रांतिमुपलभ्यजन्मनामृत्युनाजरयःदुः
खैराध्यात्मिकादिभिर्विमुक्तस्तत्संबंधकसू
न्यःसन्देहीदेहसंबंधवानपिजीवन्नेवामृतं
मोक्षानंदमश्नुतेप्राप्नोति एवंगुणातीतत्वं
प्राप्तस्यासिद्धस्यलक्षणंतस्तुपायश्चप्रश्नस्या
र्जुनउवाच २०॥ कैर्लिंगैस्त्रीन्गुणानेतान
तीतोभवतिप्रभो किमाचारःकथंचैतांस्त्री
न्गुणानतिवर्तते॥ हेप्रभोयथायोगंपयोग
दृशाभेददानेसमर्थप्रयंगुणातीतःकैश्चि
ल्लैरुपलक्षितोभवति तथायंकिमाचारः
केनाचारेणस्थितिकथंवर्ततेइत्यर्थः कथंच

गी॰टी॰
१७५

175

केनोपायेनैतान्गुणानतिक्रमतीतिक
थय अत्रोत्तरं श्रीभगवानुवाच २१॥ प्रका
शं च प्रवृत्तिं च मोहमेव च पांडव न द्वेष्टि सं
प्रवृत्तानि न निवृत्तानि कांक्षति॥ प्रकाशं स
त्वकार्यं प्रवृत्तिं रजःकार्यं मोहं तमःकार्यं उप
लक्षणं चैतत् सर्वाण्यपि गुणकार्याणि य
थायथं संप्रवृत्तान्यभिव्यक्तानि संति दोषबु
द्ध्या न द्वेष्टि निवृत्तानि लीनानि गुणबुद्ध्या यो
न कांक्षति स गुणातीत उच्यते इति चतुर्थेना
न्वयः तथा २२॥ उदासीनवदासीनो गुणै
र्यो न विचाल्यते गुणा वर्तंत इत्येव योवति
ष्ठति नेंगते॥ गुणकार्यैः सुखादिभिः प्रवृ
त्तैर्निवृत्तैर्वा यो न विचाल्यते स्वस्वरूपान्न प्रच्या
व्यते यत उदासीनवत्तटस्थवत्साक्षितयासी
नः स्वरूपविश्रांतः औदासीन्यमेवाह गुणा व
र्तंत एव स्ववृत्तिं भजंत एवेति यो वा तिष्ठति स्व
स्वभावे स्थिरः अत एव नेंगते स्वरूपान्न च
लति एभिर्लिंगैः स्वसंवेद्यैरुपलक्षितो यः स
गुणातीत उच्यते अथ परसंवेद्यलक्षणरू
पमाचारमाह २३॥ समदुःखसुखः स्वस्थः

समलोष्टाश्मकांचनः तुल्यप्रियाप्रियो धी २९
रस्तुल्यनिंदात्मसंस्तुतिः ॥ सममविशेषेण
वै दुःखसुखे यस्य यतः स्वस्थः स्वरूपस्थि
तः तथा समलोष्टाश्मकांचनः समानि हेयो
पादेयत्वबुद्धिशून्यानि लोष्टादीनि यस्य तुल्ये
प्रियाप्रिये सुखदुःखहेतुभूते यस्य तुल्ये नि
न्दात्मसंस्तुती यस्य सः हर्षविषादरहितत्वा
त् ननु किं जडभूत एवेत्याह धीरो धीमान्कु
शलः तथा २४ ॥ मानापमानयोस्तुल्यस्तु
ल्यो मित्रारिपक्षयोः सर्वारंभपरित्यागी गुणा
तीतः स उच्यते ॥ मानावमानयोर्मित्रारिप
क्षयोश्च तुल्यः सर्वानारंभान्कर्माणि परित्य
क्तुं शीलं यस्य सः एवंभूताचारयुक्तो गुणाती
त उच्यते कथं चैतान्गुणानतिवर्तते इत्यस्यो
त्तरमाह २५ ॥ मां च योऽव्यभिचारेण भक्तियो
गेन सेवते स गुणान्समतीत्यैतान्ब्रह्मभूयाय
कल्पते ॥ चोऽवधारणे मामेव मच्छब्दवाच्यम
हं ताप्रमेयमीश्वरमेव यो योगी व्यभिचारेण
निष्कंपेन भक्तियोगेनैकरूपेणोपासनायोगे
न सेवते भ्यस्यति स एतानुक्तलक्षणांस्त्रीन्

गी॰टी॰
१२९

णान्तममतीत्य सम्यगतिक्रम्य ब्रह्मभूयाय ब्र
ह्मभावाय कल्पते समर्थो भवति अत्र हेतु
माह २७ ॥ ब्रह्मणो हि प्रतिष्ठाहममृतस्या
व्ययस्य च शाश्वतस्य च धर्मस्य सुखस्यैकां
तिकस्य च ॥ अहमीश्वरो ब्रह्मणः प्रतिष्ठा
आश्रयः अन्यथा तस्य निरंजनतया शून्यप्रा
यत्वानभिव्यक्तेः उक्तं च न सतन्नासदुच्यते
तथाव्ययस्य नाशरहितस्यामृतस्य मोक्षस्य
चाहमेवेश्वरः प्रतिष्ठा धाम तथा शाश्वत
176
स्य नित्यस्य च धर्मस्याहं तावि मर्शरूपस्याह
मेवेश्वरः प्रतिष्ठास्थानं तथैकांतिकस्याव्य
भिचारिणः सहजस्यानन्दस्य चाहमेव प्र
तिष्ठानपुरुषः कूटस्थ इति शिवम् ॥ पंप्रक
त्योर्विवेकस्य यो वाचन्मध्यवर्तिनीम् सिद्ध
अभिगुणोद्देशे तं वन्दे सिद्धमद्भुतम् ॥ इति श्री
भगवद्गीताटीकायां नवप्रकाशिकाख्यायां
राजानकलक्ष्मीरामविरचितायां गुणत्रय
निर्देशो नाम चतुर्दशोऽध्यायः १४ ॥
ॐ श्रीगणेशाय नमः एवं त्रयोदशेऽध्याये

मच्छब्दवाच्यसविस्तरस्वरूपवर्णितं तद्वान्तर

दशाध्युक्तां सिद्धभूमिकां च चतुर्दशेध्याये व्या
ख्यायाधुना मच्छब्दस्य वाच्यांतरमतमेश्वरंत्व
पमत्रैव देहेउपासनार्थं प्रत्यभिज्ञानार्थं च प्र
तिपादयितुं पुरुषोत्तमयोगाख्यः पंचदशो
ध्याय आरभ्यते तत्रेश्वरस्यांशस्येन सहश्रुति
षु प्रसिद्धेन वृक्षरूपकालंकारेणोक्तदेहेतत्स्वरूपव
र्णयति श्रीभगवानुवाच ॥ ऊर्ध्वमूलमधःशा
खमश्वत्थं प्राहुरव्ययम् छंदांसि यस्य पर्णानि
यस्तं वेद स वेदवित् ॥ ऊर्ध्वं सर्वोत्कृष्टमत्रुत्त
मं ब्रह्माख्यं मूलं यस्य तं तथा अधःशाखं अधःस्व
स्वरूपान्निकृष्टाः शाखा जीवा यस्य तं ईश्वराप
क्षया जीवानां परतंत्रतया परिच्छिन्नतया वि
नाशयोगितया च निकृष्टत्वात् अव्ययं नि
त्यमश्वत्थं व्यापकतया स्थास्नुतया चाश्वत्थ
मीश्वरं प्राहुः श्रुतयः तथा च श्रुतिः ऊर्ध्वमू
लोऽवाक्शाख एषोऽश्वत्थः सनातनः तदेव
शुक्रं तद्ब्रह्म तदु नात्येति कश्चनेत्याद्याः यस्ये
श्वरस्य वेदाः पर्णानि यथा हि पर्णैर्हि तस्य म
हत्त्वे फलवत्त्वरसवत्त्वादयः सूच्यंते एवं वेदै
रीश्वरस्य माहात्म्यं सूच्यते अतः पर्णस्थानीया

निच्छन्दांसि यस्तमीश्वरं वेद स वेदवित् तेनै
व वेदार्थः सम्यग्ज्ञातः किंच १॥ अधश्चोर्ध्वं
प्रसृतास्तस्य शाखा गुणप्रवृद्धा विषयप्रवा
लाः अधश्च मूलान्यनुसंततानि कर्मानुबं
धीनि मनुष्यलोके ॥ तस्येश्वरस्य शाखा जी
वा अधो निकृष्टास्पश्वादियोनिषु ऊर्ध्वं चोत्कृ
ष्टास्देवादियोनिषु प्रसृता वैतत्यमापन्नाः
कीदृश्यः गुणप्रवृद्धाः गुणैः सत्त्वादिभिः प्रक
र्षेण गुणवैषम्येन वृद्धिंगताः तथा विषयप्र
वालाः विषया रूपादयः प्रवालाः स्वरूपाच्छा
दकतया पल्लवस्थानीयाः किंच तासां जीवशा
खानां मनुष्यलोके कर्मानुबंधीनि निर्हेत
शुभाशुभात्मककर्मवासनारूपाणि मूला
नि अधश्च पश्वादियोनिषु चकारादूर्ध्वं च दे
वादियोनिषु जीवत्वप्राप्त्यनंतरं संततानि
विस्तृतिमापन्नानि किंच २॥ न रूपमस्येह
तथोपलभ्यते नांतो न चादिर्न च संप्रतिष्ठा
अश्वत्थमेनं सुविरूढमूलमसंगशस्त्रेण दृ
ढेन छित्वा ॥ अस्येश्वरस्य स्वरूपं व्यापकत्व
सर्वज्ञत्वसर्वकर्तृत्वरूपतया यथा भवति

नचेह जीवलोके नोपलभ्यते नानुभूयते केन
चित् नचांतस्य नोपलभ्यते नन्तत्वात् नचादि
रनादित्वात् नच संप्रतिष्ठा संस्थितिरस्यरू
पा च नोपलभ्यते एवमीश्वररूपमश्वत्थं सुवि
रूढमूलं सविरूढं दृढमूलं ब्रह्मरूपं यस्य तं दृ
ढेन वैराग्यशस्त्रेण छित्वा परिच्छिद्य विविच्य
३॥ ततः पदं तत्परिमार्गितव्यं यस्मिन्गता न
निवर्तंति भूयः तमेव चाद्यं पुरुषं प्रपद्ये यतः
प्रवृत्तिः प्रसृता पुराणी ॥ ततस्तस्मादीश्वरा
त्पदं मोक्षरूपं प्रशांतं पदं परिमार्गितव्यं या
चितव्यम् किं तदिति विशेषणाह यस्मिन्प
दे गताः संतो न निवर्तंति संसारे भूयो नावर्तं
ते ननु केनाप्यनुपलभ्यस्वरूपादीश्वरात्कथ
मनाहत्यावहरूपदयाप्तोपपन्नेत्यतः कार्यलिं
गेन तमनुमाप्य याचनप्रकारमाह तमेवेति
तमेवाद्यं पुरुषमीश्वररूपं प्रपद्ये शरणं व्रजा
मि तं कमित्याह यतो यस्मादीश्वरात्पुराणी
चिरंतनी संसारप्रवृत्तिः प्रसृता निर्गत्य विस्त
तिमापन्ना ननु तत्पदं केनचित्सासमपीत्या
शंक्याधिकारिस्वरूपनिरूपणपूर्वं बहूनां त

गी॰टी त्यागस्यमंगीकरोति ४॥ निर्मानमोहाजित
संगदोषाअध्यात्मनित्याविनिवृत्तकामाः द्वं
१२८ द्वैर्विमुक्ताः सुखदुःखसंज्ञैर्गच्छंत्यमूढाः पद
मव्ययंतत् ॥ मानोदेहादिष्वात्मप्रतीतिः मो
हः स्वस्वरूपापरिज्ञानेनताभ्यांनिष्क्रांतः स्वस्वभा
वपरिज्ञानेनदेहाद्यभिमानरहिताः तथासंगो
विषयेष्वासक्तिः जितःसंगरूपोदोषोयैस्ते
तथाअध्यात्मनित्याः नित्यमात्मनिप्रतिष्ठिताः
तथाविशेषेणनिवृत्ताभिलाषाः एवमभ्यास
तारतम्येनसुखदुःखसंज्ञैर्द्वंद्वैरहिताः नन्वेवं
178
तेषांजडत्वप्रसक्तिर्नेत्याह अमूढाः प्रबुद्धाः
एवंविधाअधिकारिणस्तत्पदंनाशरहितंग
च्छंति ननुतदितिसर्वनामपदेनप्रसिद्धंवैकुं
ठादिपदंस्यादित्यतआह ५॥ नतद्भासयते
सूर्योनशशांकोनपावकः यद्गत्वाननिवर्तं
तेतद्धामपरमंमम ॥ सूर्यादयस्तत्पदंवैकुं
ठादिपदवन्नप्रकाशयंति ननुतत्पदंकिं
तत्स्वरूपाद्व्यतिरिक्तंयेननतत्पदस्यात्मनस्स
भेदोक्तिरुच्यतेइत्याशंक्याह यत्पदंप्राप्य
ननिवर्तंतेपुनःसंसारसरणिंनालभंतेतन्म

मेश्वरस्यपरमंधामोत्कृष्टंस्वरूपं शङ्कःशिर
इतिवह्न्याचनिकत्वाभेदेनतात्विकः नन्वेवं
विधंतवेश्वरस्यपरमंधामतदुष्णापमन्नमीय
तेजीवलोकेइत्यतः सोपाधिकस्वस्वरूप
प्रदर्शनंप्रस्तौतिसप्तमिस्लोकेरूपक्रमते
६॥ ममैवांशोजीवलोकेजीवभूतःसना
तनः मनःषष्ठानींद्रियाणिप्रकृतिस्थानि
कर्षति॥ ममैवेश्वरस्यांशइवांशःपुरुषाख्यः
सनातनोविनाशीजीवलोकेउत्कृष्टत्वाज्जी
वभूतः तस्येश्वरांशस्यैश्वर्यमाहप्रकृतौस्व
कारणेस्थितानिलीनानिमनःषष्ठानींद्रिया
णि कर्षतिउपभोगार्थंवहिर्निष्कार्षयति
किंच ७॥ शरीरंयदवाप्नोतियच्चाप्युत्क्रा
मतीश्वरः गृहीत्वैतानिसंयातिवायुर्गंधानि
वाशयात्॥ अयंजीवईश्वरांशत्वादीश्वरइ
तिव्यपदेशार्हः शरीरंयद्यदास्वकर्मवशाद
वाप्नोतियतश्चशरीराडुत्क्रामतिएतानिप्र
कृतिस्थानिमनःषष्ठानींद्रियाणिपूर्वस्माच्छ
रीराद्गृहीत्वासंयातिशरीरांतरंगच्छति श
रीरेसत्येवेंद्रियग्रहणेदृष्टांतः आश्रयात्स

स्थानात्कुसुमादेः सकाशाद्गंधानांपवनः
सत्स्थानेशान्गृहीत्वा यथा वायुः गच्छतित
द्वत् एवं स्थौलसंह्लारे चैतेः साहित्यमस्यास्का
स्थितावपिस्यान्नासनादिरूपायांविषयग्र
हणात्मिकायांचतत्साहित्यस्यैवास्यव्यापार
इत्याह ८॥ श्रोत्रंचक्षुःस्पर्शनंचरसनंघ्रा
णमेवच अधिष्ठायमनश्चायंविषयानुपसे
वते॥ मनोंतःकरणंविषयाञ्छब्दादीन्से
नन्वेवंसोपाधिकत्वेनास्यजीवस्यस्थूलतया
सर्वेषांदर्शनयोग्यत्वप्रसक्तिरित्यतआह
९॥ उत्क्रामंतंस्थितंवापिभुंजानंवागुणान्वि
तं विमूढानानुपश्यंतिपश्यंतिज्ञानचक्षु
षः॥ एवंजीवंउत्क्रामंतंदेहान्निःसरंतंवा
स्थितंवापिदेहेस्थितिंशस्लंतंवागुणान्वितं
गुणविकारैरिंद्रियादिभिःसहितंशब्दादीन्वि
षयान्भुंजानंवाविमूढादेहात्माभिमानिनोनानु
पश्यंतिनासाक्षात्कुर्वंतिकिंतुज्ञानचक्षुषः
प्रत्यभिज्ञालक्षणज्ञाननेत्रयुक्ताः एवंजीवमे
नानावस्थासुपश्यंत्येव कथंपश्यंतीत्यपे
क्षायामाह १०॥ यतंतोयोगिनश्चैनंपश्यंत्या

179

त्मन्यवस्थितम् यतंतोप्यकृतात्मानो नैनं
पश्यंत्यचेतसः ॥ योगिनोऽपियोगाद्यन्य
तमयोगयुक्ता यतंतो ध्यानादिभिः प्रयत
मानाएनंजीवमात्मन्यवस्थितमात्मत्वेनस्थि
तंपश्यंति साक्षात्कुर्वंति न तु स्वतो व्यतिरेके
ण अन्येषां दर्शनाभावमाह येचेतसो विवे
कशून्या अकृतात्मानो यंजीवो न कृतश्चात्मा
येत्वेएनंजीवंभेदेन विमृशंत इत्यर्थः तेतय
तंतोपि ध्यानादिनाएनं न पश्यंति न साक्षात्कु
र्वंति एवमीश्वरस्य सोपाधिकं रूपमुपवर्ण्ये
दानीं तदेव पारमेश्वरं रूपमनंतशक्तित्वेन
निरूपयति त्रिभिः ११ ॥ यदादित्यगतं तेजो
जगद्भासयतेऽखिलं यच्चंद्रमसि यच्चाग्नौ
तत्तेजो विद्धि मामकं ॥ यदेतद्विश्वप्रका
शिकमादित्यसन्निविष्टं तेजो यच्च विश्वाप्या
यकं चंद्रे स्थितं तेजो यच्चाग्नौ स्थितं पाकादि
निर्वर्तकं तेजस्तत्सर्वं मदीयमेव विद्धि जानी
हि किंच १२ ॥ गामाविश्य च भूतानि धार
याम्यहमोजसा पुष्णामि चौषधीः सर्वाः
सोमो भूत्वा रसात्मकः ॥ गां पृथ्वीं प्रविश्य

वहिशरणस्वभावामाविश्य स्वशक्त्याव्याप्य
भूतानि चराचराणि ओजसा बलेनाहमीश्व
रो धारयामि बिभर्मि इच्छाधारणशक्तिम
मेव बलमित्यर्थः अन्यथा हि सिकतामु
ष्टिवद्विशीर्येत नाधो निमज्जेच्च अहमेव रसात्म
करसमयः सोमो भूत्वा व्रीह्याद्या ओषधीः संवर्ध
यामि चंद्रस्याप्यायनरूपा शक्तिर्ममैवेत्यर्थः
किंच १४॥ अहं वैश्वानरो भूत्वा प्राणिनां दे
हमाश्रितः प्राणापानसमायुक्तः पचाम्यन्नं
चतुर्विधम्॥ अहमीश्वर एव वैश्वानरो जाठ
रोग्निर्भूत्वा प्राणिनां देहमाश्रितोंतःप्रविष्टः
प्राणापानाभ्यां तदुद्दीपकाभ्यां सहितः सं
धुक्षितः प्राणिभिर्भुक्तं भक्ष्यं भोज्यं लेह्यं चोष्यं
चेति चतुर्विधमन्नं पचामि परिणमया
यामि तत्र यद्दंतैरवखंड्यावखंड्य भक्ष्यते त
पादि तद्भक्ष्यं चर्व्यमिति चोच्यते यत्केव
लं जिह्वया विलोड्य निगीर्यते पायसादि
तद्भोज्यं यत्तु जिह्वायां निक्षिप्य रसास्वादे
न निगीर्यते द्रवीभूतं गुडादि तल्लेह्यं यत्तु
दंष्ट्राभिर्निपीड्य सारांशं निगीर्यावशिष्टं

त्यज्यते यथेत्यर्द्धेनादितश्लोकयमितिभेदः
अथ स्वातंत्र्यानिग्रहमीश्वरस्वरूपमत्रैव दे
हृद्देशविशेषेनिविष्टतयानुग्रहणोसमश
हवाच्यमुपासनार्थंनिर्दिशति १४ ॥
सर्वस्यचाहंहृदिसन्निविष्टोमत्तःस्मृतिर्ज्ञा
नमपोहनंच वेदैश्चसर्वैरहमेववेद्योवेदा
न्तकृद्वेदविदेवचाहं ॥ सर्वस्यैवप्राणिजा
तस्यहृदिसर्वसंविदधिकरणेदेहैकदेशे
हमीश्वरःसम्यक्स्वातंत्र्यावियोगेनास्थितः
स्वात्मनःस्वातंत्र्यावियोगमाह मत्तइति म
त्तएवेश्वरात्सकाशात्स्मृतिरनुभूतार्थविषया
संस्कारशेषतांनीतस्यसंवृतार्थस्यपुनरव
भासनात्मिका ज्ञानोविषयेंद्रियसंप्रयोग
जन्यंविषयावभासनात्मकस्थापनरूपं अ
पोहनंचतत्प्रमोषरूपःसंहारः नतुकूट
स्थाज्जीवाद्वा तथासर्वैश्चवेदैरहमेवेश्वरो
वेद्योवश्यवेदनीयः तथावेदांतकृत्संप्रदा
यप्रवर्तकश्चाहमेववेदार्थविच्चाहमेवेश्व
रः नकूटस्थोनवाजीवः अधुनाकूटाज्जी
वस्था जीवात्कूटस्थाच्चात्मनाःपुरुषोत्त

मात्मस्य स्वातंत्र्ययोगेन व्यतिरेकमाह द्वि
भिः १५ ॥ द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर
एव च क्षरः सर्वाणि भूतानि कूटस्थोक्षर उ
च्यते ॥ लोके संसारे इमौ पुरि देहे तादात्म्या
वलम्बनेन रूपाच्छयनात्स्वातंत्र्यवियोगलक्ष
णाच्छयनाच्च पुरुषशब्दव्यपदेशौ कौ ता
वित्याह क्षरश्चाक्षर एव चेति क्षरति चल
ति तत्तदवस्थामितीति क्षरो ब्रह्मादिस्थावरां
तो जीववर्गः अक्षरश्च न क्षरति स्वस्वरूपा
न्न चलतीत्यक्षरः आत्मा एतौ पुरुषौ स्वयमे
व भगवान्व्याचष्टे क्षरः सर्वाणि भूतानि देहा
दिनिष्ठाहंभावा जीवाः कूटस्थ उदासीन
आत्मा पुरुषोक्षर उच्यते विवेकिभिः अथ
क्षराक्षराभ्यां विलक्षणमीश्वरं प्रतिपादय
ति १६ ॥ उत्तमः पुरुषस्त्वन्यः परमात्मेत्यु
दाहृतः यो लोकत्रयमाविश्य बिभर्त्यव्य
य ईश्वरः ॥ तः पुरुषद्वयव्यतिरेके एता
भ्यां क्षराक्षराभ्यामन्यो विलक्षणः परम
शीरूपस्वातंत्र्यनित्ययोगितया उत्तमः पुरि
देहे च [illegible] परमो निरवधि

रात्मापरमात्मेतितीश्वरएवोदाहृतःश्रुति
भिःस्मृतिभिश्च कोसावुत्तमःपुरुषोलो
कत्रयंसकलंजगदाविश्यस्वातंत्र्यणापि
श्यविभर्तिधारयतिसंरक्षतीति नन्वुत
क्षणोनसोपिजीववत्तद्धर्मयोगीपरतंत्रो
वाभवेदित्याशंक्याह अव्ययःस्वरूपसंच
लनरहितःईश्वरःस्वातंत्र्यमपरित्यजन्
अथात्मनःपुरुषोत्तमनामनिर्वक्ति ७॥
यस्मात्क्षरमतीतोहमक्षरादपिचोत्तमः
अतोस्मिलोकेवेदेचप्रथितःपुरुषोत्तमः॥
यतःक्षरंजीववर्गमतीतोतिक्रांतोहंतस्यज
डरूपदेहनिष्ठाहंभाववत्वात् अक्षरात्कूटस्था
स्थादपिउत्तमःप्रकृष्टोहंतस्योदासीन्यस्वभा
वत्वात्स्वात्मनश्चस्वातंत्र्यनित्ययोगितया
अतोलोकेकविकाव्यादौवेदेचपुरुषोत्तम
इतिप्रख्यातोस्मि तथाचकाव्येहरिर्यथैकः
पुरुषोत्तमःस्मृतइति अथपुरुषोत्तमज्ञा
नस्यफलमाह १८ ॥ योमामेवमसंमूढो
जानातिपुरुषोत्तमम् ससर्वविद्भजतिमां
सर्वभावेनभारत ॥ योयोगीअसंमूढःसव

ढः स एवमसमूढलक्षणो मामीश्वरं पुरुषोत्तमा
त्वेन जानाति स आत्मतया प्रत्यभिजानाति हे भा
रत स सर्वज्ञो भूत्वा सर्वभावेन सर्वात्मकत
या मामीश्वरं भजते उपासको विद्वान्भवती
त्यर्थः अध्यायपंचदशकार्थमुपसंहर
ति १९ ॥ इति गुह्यतमं शास्त्रमिदमुक्तं मया
नघ एतद्बुद्ध्वा बुद्धिमान्स्यात्कृतकृत्यश्च
भारत ॥ इत्युक्तेन प्रकारेणेदं भवता प्रत्य
क्षभूतं फलमतिरहस्यं शास्त्रमध्यायपं
चदशकरूपं हे अनघ व्यसनशून्य मया तुभ्य
मुक्तम् एतदेव यथोक्तमर्थं बुद्ध्वा सम्यग
वगम्य बुद्धिमान्भवेन्न कृतेनापि शत्रुविजया
र्थाहरणसुखोपभोगादिना च कारेण कृतयो
न कः कृतेन हि कृतकृत्यता दृष्टा एतेन ज्ञ
ज्ञातेनैव निवृत्तम् विशिष्टजन्मप्रसूतेन
पुरुषेण यत्कर्तव्यं तत्सर्वं भगवत्तत्त्वविदि
ते कृतं भवेत् न त्वन्यथा कर्तव्यं समाप्य
ते कस्यचिदित्यभिप्राय इत्योम् २० ॥
उपासनार्थं देहे स्थितमीश्वरं पुरुषोत्तमम्
पुरुषोत्तमयोगाख्ये [illegible] तत्तमोहरं

इतिश्रीभगवद्गीताटीकायांनवप्रकाशि
काख्यायांराजानकलक्ष्मीरामविरचिता
यांपुरुषोत्तमयोगोनामपंचदशोध्यायः
१५ ॥ अथश्रीगीतायाअर्थावबोधनेधि
कार्यनधिकारिणोर्निर्णयायषोडशोध्या
यःप्रस्तूयतेतन्निरूपितेहिकार्यार्थेधिकारि
जिज्ञासाभवति तदुक्तंभाहेः भावोयोयेन
बोद्धव्यःसप्रागातोलितोयदा तदाकस्तस्य
बोद्धेतिशंकाकर्तृनिरूपणमिति तत्रदैवः
सर्गउक्तार्थानुष्ठानेउपपन्नतयाधिकारीआ
सुरःसर्गस्तात्त्वनुपपन्नत्वादनधिकारीत्येवंस
विस्तरंवर्णयितुंश्रीभगवानुवाच ॥ अभयं
सत्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः दानंदम
श्चयज्ञश्चस्वाध्यायस्तपआर्जवम् ॥ अभ
यंसर्वत्रस्वात्मस्फूर्त्याद्वैताभावेनभयाभावः
तथाचश्रुतिः द्वितीयाद्वैभयंभवतीति स
त्वसंशुद्धिः सत्वस्याहंतायाःसम्यक्शुद्धिःरवशोष
णयाशुद्धिर्मायीयकालुष्याभावःज्ञानयोगे
द्वैतत्वतोव्यवस्थितिर्विशेषेणनिष्ठाप्रते
धर्माउत्तमाधिकारिणःपुरुषस्यभवंतीति

दानंचित्तशुद्धिः दैशुशोधने दमोवास्येंद्रिय
संयमः यज्ञउक्तानांयज्ञानांमध्यात्स्वाधिका
रानुसारेणोन्यतमयज्ञानुष्ठानम् स्वाध्यायो
ब्रह्मयज्ञादिर्जपयज्ञः तपउक्तरूपमेवस्व
माणेशारीरादिआर्जवंचित्तप्रसादकारण
मृजुत्वमकौटिल्यम् एतेधर्मामध्यमाधिका
रिणः पुरुषस्यभवंतीति किंच १ ॥ अहिंसा
सत्यमक्रोधस्त्यागःशांतिरपैशुनम् दयाभू
तेष्वलोलत्वंमार्दवंह्रीरचापलम् ॥ अहिंसा
परपीडवर्जनं सत्यंभूतहितयथार्थभा
षणं क्रोधश्चित्तक्षोभकारणकोपपरिवर्ज
नम् त्यागःस्वकीयस्यपरकीयत्वापादनम्
शांतिश्चित्तविक्षेपवर्जनम् अपैशुनंपरदो
षानानिष्करणम् भूतेषुदयाअलोलत्वम
लंपटत्वंवर्णलोपआर्षः मार्दवमरूढत्वम
क्रूरताह्रीरकार्यप्रवृत्तौलोकलज्जा अचाप
लंव्यर्थव्यापाररहित्यं एतेधर्माअधिकारिणोभ
वंतीति एतेधर्माः प्रायशोब्राह्मणस्यैव
अधुनाक्षत्रियादीनांज्ञानाधिकारिणांधर्म
जातमाह २ ॥ तेजःक्षमाधृतिःशौचमद्रो

होनातिमानिता भवंतिसंपदंदैवीमभ्य
जातस्यभारत ॥ तेजःपरानभिभवनीय
त्वकारणंप्रागल्भ्यं क्षमाबलवत्वेपिपरा
पराधसहिष्णुता धृतिर्दुःखादिभिरवसी
दताश्चित्तस्यास्थिरीकरणेपनइर्मजातेत्तश्चि
यस्य शौचमाभ्यंतरमर्थप्रयोगादौमाया
नृतादिराहित्यं अद्रोहः परवंचनाभावः
एतौवैश्यस्यनातिमानितापूज्येषुनम्रता
तिशूद्रस्यासाधारणोधर्मः एतान्यभयादी
नषड्विंशतिर्दैवीसंपदमभिजातस्यभवे
तिदैवयोग्यांसात्विकींसंपदमभिलक्ष्यत
दाभिमुख्येनजातस्यभाविकल्याणस्यपुंसो
भवंतीत्यर्थः आसुरीसंपदमाह ३॥ दंभो
दर्पोभिमानश्चक्रोधःपारुष्यमेवच अज्ञा
नंचाभिजातस्यपार्थसंपदमासुरीम् ॥
दंभोधर्मध्वजित्वंदर्पःस्वगुणसंभावनया
चित्तस्योत्सेकः अभिमानःआत्मन्यत्यंत
पूज्यत्वाध्यारोपःक्रोधःप्रसिद्धःपारुष्यंनि
ष्ठुरत्वं अज्ञानयथोक्तधर्मजातस्यलक्ष्यनं
स्वरूपापरिज्ञानंआसुरीमित्युपलक्षणं

गी॰टी॰
१८४

184

आसुराणां राक्षसानां या संपत्तामासुरीमभि
लक्ष्यजातस्यैतानि दंभादीनि भवंतीत्यर्थः
अनयोः संपदोः फलं निर्दिशति ४ ॥ दैवी
संपद्विमोक्षाय निबंधायासुरी मता माशु
चः संपदं दैवीमभिजातोसि पांडव ॥ दैव्या
संपदा युक्तोतत्त्वज्ञानेधिकारी मुक्तिभाजनं
आसुर्या संपदा युक्तस्तत्त्वज्ञानानधिकारी नित्य
संसारीत्यर्थः एवं सत्यहं कया संपदा युक्त
इति संदिहानमाश्वासयति भगवान् माशु
च इति हे पांडव माशुचः शोकं मा कार्षीः य
तस्त्वं दैवीं संपदमभिलक्ष्य जातोसि प्रागर्जि
तकल्याणो भाविकल्याणश्चासि अथा
स्मिंल्लोके द्विविधः सर्गस्तत्त्वज्ञानेधिकारी अनधि
कारी चेत्याह ५ ॥ द्वौ भूतसर्गौ लोकेस्मिन् दै
व आसुर एव च दैवो विस्तरशः प्रोक्त आसु
रं पार्थ मे शृणु ॥ अस्मिन्मनुष्यलोके भूता
नां प्राणिनां सर्गौ द्वावेव नतृतीयः कौ
तावित्याह दैव आसुर एव चेति दैवो दैव
स्वभावः सत्वप्रधानस्वभावयुक्तः आसुरः
आसुरस्वभावो रजस्तमःप्रधानस्वभावयु

कस्य आसुरस्वभावे एव वा तत्सं प्रकृतिंग
भीकृत्योक्तम् तयोर्मध्याद्दैवः सर्गो विस्तरे
ण प्राक्कथितो यगणो प्रोक्तः आसुरं सर्गमधु
नामतः शृणु अथासुरसर्गस्वरूपं निरूपय
ति ६ ॥ प्रवृत्तिं च निवृत्तिं च जना न विदुरा
सुराः न शौचं नापि चाचारो न सत्यं तेषु विद्य
ते ॥ धर्मे प्रवृत्तिमधर्मान्निवृत्तिं चासुरस्वभा
वा न जानन्ति अतः शौचमाचारः सत्यं च तेषु
नास्ति ननु वेदोक्तयोर्धर्माधर्मयोः प्रवृत्तिं
निवृत्तिं चा ते कथं न विदुः कुतो वा धर्माधर्म
योरनंगीकारे जगतः सुखदुःखादिव्यवस्था
स्यात् कथं वा शौचाचारादिविषयामीश्वरा
ज्ञामतिवर्तेरन् ईश्वरानंगीकारे च कुतो ज
गदुत्पत्तिः स्यादत आह ७ ॥ असत्यमप्रति
ष्ठं ते जगदाहुरनीश्वरम् अपरस्परसंभूतं
किमन्यत्कामहैतुकम् ॥ नास्ति सत्यं वेद
पुराणादिप्रमाणं यस्मिंस्तादृशं जगदाहुः
वेदादीनां प्रमाणं मन्यन्ते इत्यर्थः तदुक्तं च
यो वेदस्य कर्त्तारो भण्डधूर्तनिशाचरा इत्या
दि अत एव नास्ति धर्माधर्मरूपा प्रतिष्ठा व्य

वस्थाहेतुर्यस्य तत् स्वाभाविकं जगदेव वि
श्रमाद्रित्यर्थः अत एव नास्तीश्वरः कर्ताव्य
वस्थापकश्च यस्य तादृशं जगदाहुः न हि क्व
तोऽस्य जगत उत्पत्तिं वदंतीत्यत आह अपरस्प
रसंभूतं अपरश्च परश्चेत्यपरस्परं अपरस्परत
तः कामप्रयुक्तस्त्रीपुरुषमिथुनात्संभूतं
किमन्यत्कारणमस्य नास्त्यन्यददृष्टेश्वरादि
कारणं किंतु कामहेतुकं स्त्रीपुरुषयोः काम
एव प्रवाहरूपेण हेतुरस्येत्यर्थः किंच ९ ॥

एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः प्र
भवंत्युग्रकर्माणः क्षयाय जगतोऽहिताः ॥
नष्टात्मानो नष्टः नित्यसन्निहितः सन्नेवात्मा
अदर्शनं प्राप्तो येषां ते अल्पबुद्धयः दृष्टार्थ
मात्रनिष्ठबुद्धयः पुरुषार्थमापतां लोकायति
कानां दृष्टिं दर्शनमवष्टभ्य निश्चयेन गाढ
मवलम्ब्य तथा उग्रं दारुणं परपीडावहं कर्म
येषां ते अहिताः सर्वेषां वैरिणो भूत्वा जगतो
जीवलोकस्य क्षयाय विनाशाय प्रभवंति
उद्भवं लभंते इत्यर्थः एवमुद्दिक्तमस्क
स्यासरसर्गस्य सत्वपश्चकाउदिक्राजस्क

स्यासुरसर्गस्यस्वरूपमुक्त्वाउद्रिक्तरजस्कस्य
स्वभावमाह ९ ॥ काममाश्रित्यदुष्पूरंदंभ
मानमदान्विताः मोहाद्गृहीत्वासद्ग्राहान्प्र
वर्त्ततेशुचिव्रताः ॥ अन्येत्वसुरस्वभावाजनादु
ष्पूरंपूरयितुमशक्यंकामंविषयाभिलाषं
माश्रित्यावलम्ब्यदम्भेनाधार्मिकत्वेपिमिथ्या
धार्मिकत्वख्यापनेनमानेनाभिमानेनमदेन
चित्तमोहकेनचान्विताः मोहान्नतत्वावधार
णेनासद्ग्राहान्दुष्टाभिनिवेशाननेनमंत्रेण
मांदेवतामाराध्यमहानिधीन्साधयिष्यामः
कामिनीनामाकर्षणंवाकरिष्यामइत्येवंगृ
हीत्वानिश्चयेनस्वीकृत्याशुचिव्रताअशुची
निश्मशानादिदेशोच्छिष्टत्वाद्यवस्थासापेक्षा
णिव्रतानिनियमविशेषायेषांतेएवंविधाः
संतःप्रवर्त्ततेकर्मारंभते एतादृशाःएतानि
नरकेषुचावित्यग्रिमेणान्वयःकिंच १०॥
चिंतामपरिमेयांचप्रलयांतामुपाश्रिताः
कामोपभोगपरमाएतावदितिनिश्चिताः आ
शापाशशतैर्बद्धाःकामक्रोधपरायणाः ई
हंतेकामभोगार्थमन्यायेनार्थसंचयान् ॥

चिंतामात्मीययोगक्षेमोपायपर्यालोचना
त्मिकामपरिमेयां बहुविधां प्रलयांतां प्रलयो
मरणमेवांतो यस्यास्तामुपाश्रिताश्चिंत
वंतः तथा कामोपभोगो विषयसुखानुभव
एव परमः पुरुषार्थो न धर्मादिर्येषां ते एता
वदेव दृष्टं विषयसुखमेवेह सारो नान्यदेत
द्व्यतिरिक्तं किंचिदित्येवं निश्चयवंतः तथा
आशाभिरायताभिस्ताभिरेव पाशतैरज्ज
नह्यैर्बद्धाः संयताः कामक्रोधौ परमयन
माश्रयो येषां ते एवंविधा अपरेऽसुरस्वभा
वा विषयभोगार्थमन्यायेन विहितविपर्य
येन चौर्यादिना धनसमृद्धीः कर्तुं चेष्टंते
एवमलब्धमनोरथानां हृतमनुत्कालब्धम
नोरथानामाह त्रिभिः ११।१२॥ इदमद्यम
यालब्धमिदं प्राप्स्ये मनोरथम् इदमस्ती
दमपि मे भविष्यति पुनर्धनम्॥ मनोरथं
मनसः प्रियं शेषं स्पष्टम् किंच १३॥ अ
सौ मया हतः शत्रुर्हनिष्ये चापरानपि ई
श्वरोऽहमहं भोगी सिद्धोऽहं बलवान्सुखी॥
ईश्वरोऽहमनुकूलादीनां स्वामी भोगी विष

यस्त्वोत्तमभविता सिद्धः कृतकृत्यः किंच

१४॥ आढ्योभिजनवानस्मि कोन्योस्ति स

दृशो मया यक्ष्ये दास्यामि मोदिष्य इत्यज्ञा

नविमोहिताः॥ आढ्योधनाभिसंपन्नः अ

भिजनवान् कुलीनः किं बहुना को मया स

दृशोन्योस्ति न कोपीत्यर्थः यक्ष्ये यागेनाप्य

न्यानभिभविष्यामि दास्यामि स्तावकेभ्यो न

र्तनर्तकादिभ्यश्च तन्मोदिष्ये हर्षं प्राप्स्या

मीत्येवमज्ञानेनाविवेकेन विमोहिता मिथ्या

भिनिवेशं प्रापिताः किंच १५॥ अनेकचि

त्तविभ्रांता मोहजालसमावृताः प्रसक्ताः का

मभोगेषु पतंति नरकेशुचौ॥ अनेकैरुक्त

प्रकारैश्चित्तैर्दुष्टसंकल्पैर्विशेषेण भ्रांता अ

नवस्थिताः विक्षिप्ताः मोहः अविवेक एव

जालमाच्छादकत्वात् मत्स्यादेरिव

नियंत्रिताः तथा विषयभोगेष्वेव प्रकर्षेण

सक्ता लीनचित्ताः एवंविधाउक्तलक्षणाः

पुरुषा अशुचौ विण्मूत्रपूरीषादिपूर्णे नर

के वैतरण्यादौ पतंत्यवशा निमज्जंति नन्व

यक्ष्ये इत्युक्तास्तेषां यजनपरत्वात्कथं नरके

गी॰टी॰ पतनमित्याशंक्याह १८ ॥ आत्मसंभावि
१८७ ताःस्तब्धाधनमानमदान्विताः यजंतेनाम
यज्ञैस्तेदम्भेनाविधिपूर्वकम् ॥ तेपूर्वोक्त
विशेषणाराजसतमःप्रधानाआसुरसर्गभाजो
जनायजंतेनामनामशब्दोलोकपर्यायः य
ज्ञैरलीकमेवनिष्फलमेवयजंतेयागक्रि
यामनुतिष्ठंतीत्यर्थः अथवानामयज्ञैर्ना
ममात्रेणयेयज्ञास्तैः यद्वादीक्षितःसोमया
जीत्येवमादिनाममात्रसिद्धयेयेयज्ञास्तैर्य
जंते किंविधाःसंतः आत्मसंभाविताः आत्म
नैवस्वयमेवनतुकैश्चित्साधुभिः संभाविताः
187
वयंसर्वगुणविशिष्टाइत्येवंपूज्यतांप्रापि
ताः तथास्तब्धाः प्रणामविषयेप्यनम्राः
यतोधननिमित्ताभ्यांमानमदाभ्यामन्वि
ताः अविधिपूर्वकंविहितेतिकर्तव्यता
रहितंदंभेनधर्मध्वजितयानतुश्रद्धयाय
जंते अविधिपूर्वकत्वमेवप्रपंचयति
१७ ॥ अहंकारंबलंदर्पंकामंक्रोधंचसं
श्रिताः मामात्मपरदेहेषुप्रद्विषंतोभ्यसू
यकाः ॥ अहंकारमभिमानंबलंहठाग्र

दं दर्पधनादिमदं काममिष्टविषयाभिला
षं क्रोधमनिष्टविषये द्वेषं च संश्रिताः सन्त
गवष्टम्भन्तः आत्मपरदेहेषु स्वदेहेषु परदेहे
षु च चिदंशेन स्थितं मां प्रद्विषन्तो यजन्ते द
म्भयन्तेषु श्रद्धाया अभावादात्मनो ह्येव
पीडा भवति तथा पश्वादीनामप्यविधिना
हिंसायां चैतन्यद्रोहमात्रमेवावशिष्यते
इति प्रद्विषन्त इत्युक्तं ननु गुर्वादयः कथं ता
मात्रशासतित्याह अभ्यसूयकाः गुर्वादी
नां सन्मार्गवर्तिनां कारुण्यादिगुणेषु सतार
ण्यादिदोषारोपकाः अतस्ते नरके पतन्ति न
त्वेतेषां कदाचिन्निस्तारोऽपि स्यादिति नेत्याह
१८ ॥ तानहं द्विषतः क्रूरान्संसारेषु नराध
मान् क्षिपाम्यजस्रमशुभानासुरीष्वेव यो
निषु ॥ तानशुभकारिणो नराधमान्क्रूरान्
हिंसापराञ्जगतो द्विषतः संसारेषु जन्ममर
णप्रवाहेषु मध्यान्नारकीं व्यथामनुभाव्या
सुरीष्वेव क्रूरास्वेव व्याघ्रसर्पादियोनिषु न
वरतं क्षिपामि ननु तां पापयोनिमतिक्रम्य
तेषां किं विच्छेदो भवेदिति नेत्याह १९ ॥

आसुरीयोनिमापन्नामूढाजन्मनिजन्मनि
मामप्राप्यैवकौंतेयततोयांत्यधमांगतिं ॥
तेचमूढाअविवेकिनोयथोक्तामासुरीप
रपीडावहांयोनिंप्रतिजन्मप्राप्ताःसंतोमा
मप्राप्यैवेत्येवकारेणमत्प्राप्तिशंकाना
स्त्येवेतिसूच्यते ततोयोनेरनंतरमधमांनि
कृष्टांकृमिकीटादियोनिंयांति उक्तदोषा
णांमध्यात्सर्वथावर्जनीयंदोषत्रयमित्या
ह २० ॥ त्रिविधंनरकस्येदंद्वारंनाशनमा
त्मनः कामःक्रोधस्तथालोभस्तस्मादेतत्त्र
यंत्यजेत् ॥ कामोविषयाभिलाषःक्रोधो
द्वेषःलोभउत्तरोत्तरगर्धः एतत्त्रिविधंनरक
स्यद्वारंप्रवेशकृत् आत्मनश्चपरतत्वस्य
नाशनमदर्शनकारकं तस्मादात्मनःश्रे
योर्थीएतत्त्रयमनर्थमूलंसर्वात्मनात्यजेत्
तत्त्यागेचविशिष्टफलमित्याह २१ ॥ एतै
र्विमुक्तःकौंतेयतमोद्वारैस्त्रिभिर्नरः आचर
त्यात्मनाश्रेयस्ततोयातिपरांगतिम् ॥
एतैस्त्रिभिर्यथोक्तैस्तमोद्वारैरज्ञानलक्ष
णमहान्ध्यप्रवेशकारणैर्विमुक्तःश्रेयम्

नः पुरुषः आत्मनः स्वस्य श्रेयः साधनं तपो
योगाद्यनुष्ठानरूपमाचरति ततोनुष्ठान
तारतम्येन परां गतिं मोक्षाख्यां प्राप्नोति
श्रेयआचरणे च मार्गदर्शकं शास्त्रमेव प्र
माणमित्याह २२ ॥ यः शास्त्रविधिमुत्सृ
ज्य वर्तते कामकारतः न स सिद्धिमवाप्नो
ति न सुखं न परां गतिम् ॥ यः पुरुषः शा
स्त्रविधिमितिकर्तव्यतारूपमुत्सृज्याश्रद्ध
यापरित्यज्य कामकारतः स्वाच्छंद्याद्वर्तते
प्रवृत्तिं भजते स सिद्धिमाख्यां क्रियानिष्प
त्तिं सुखमैहिकीमामुष्मिकीं परतत्वात्मिकीं
वा निर्वृत्तिं परां गतिं मोक्षाख्यां च न प्राप्नो
ति फलितमाह २३ ॥ तस्माच्छास्त्रं प्रमा
णं ते कार्याकार्यव्यवस्थितौ ज्ञात्वा शास्त्र
विधानोक्तं कर्म कर्तुमिहार्हसि ॥ यस्मा
देवं तस्मादिदं कार्यमिदमकार्यमित्यस्यां
व्यवस्थायां तव शास्त्रमेव बोधकं प्रमाणं
अतः शास्त्रोक्तेन विधानेन चोदितं कर्म ज्ञा
त्वा यथावत्सौवपर्येण पर्यालोच्य इह कर्म
भूमौ स्वाधिकारानुसारेण कर्म कर्तुमर्ह

सीत्योम् २४ ॥ दैवसर्गस्याधिकारयोगी
तार्थावबोधने तदन्यस्यानधिकृतिं षोड
शेनाह्रतेस्तमः ॥ इति श्रीभगवद्गीताटी
कायां तत्वप्रकाशिकाख्यायां राजानक
लक्ष्मीरामविरचितायां दैवासुरसंपद्विभा
गो नाम षोडशोध्यायः १८ ॥ ॥
ॐ श्रीगणेशाय नमः पूर्वस्मिन्नध्याये दै
वः सर्गः सत्वप्रकृतिर्गीतार्थावधारणाधि
कारी आसुरः सर्गो रजस्तमः प्रकृतिरनधि
कृत इत्येवं भगवता संक्षिप्योक्तमपि श्रु
ना दैवासुरसर्गस्य विभागेनाधिकारानधि
कारनिश्चयाय पिप्रच्छिरर्जुन उवाच ॥
ये शास्त्रविधिमुत्सृज्य यजन्ते श्रद्धयान्विताः
तेषां निष्ठा तु का कृष्ण सत्वमाहो रजस्तमः ॥
ये केचिच्छास्त्रोक्तं विधिमितिकर्तव्यतारू
पमुत्सृज्य भक्त्या श्रद्धयास्तिकबुद्ध्यान्विताः
सन्तो यजन्ते देवताराधनात्मिकां यागक्रि
यां कामकारतोऽनुतिष्ठंति तेषां का निष्ठा
का स्थितिः कश्चाश्रयः तावेव विशेषेण
पृच्छति किं सत्वं किं वा रजः किं वा तमः

189

किं सत्वं संश्रितः रजस्तमसी वा अथोमंश्र
द्धात्रसारेण श्रीभगवानुवाच १॥ त्रिविधा
भवति श्रद्धा देहिनां सा स्वभावजा सात्वि
की राजसी चैव तामसी चेति तां शृणु ॥
देहिनां देहाहंभावेन नित्यसंवद्धानां सा
श्रद्धा सत्वगुणकार्यभूता यदुक्तं श्रीभगवतेव
शमो दमस्तितिक्षेज्या तपः सत्यं दयास्मृतिः
तुष्टिस्त्यागोस्पृहा श्रद्धा ह्रीर्दयानिर्वृतिरि
त्येताः सत्वस्य वृत्तयइति स्वभावजा स्वभावा
स्वरूपविस्मारणरूपाजीवत्वबीजभूतात्मकु
न्याख्याज्ञाना साच त्रिविधा भवति सत्वादि
कां तामसीतितामेव श्रद्धां सात्विकादीं त्रि
विधां ममः शृणु ननु सत्वगुणकार्यभूतायाः
श्रद्धायाः कथं राजसतामसत्वाभ्यां निर्देश इ
त्यत आह २॥ सत्वानुरूपा सर्वस्य श्रद्धा भ
वति भारत श्रद्धामयोयं पुरुषो योयच्छ्रद्धः
सएव सः॥ सर्वस्य त्रिविधगुणविशिष्टस्यप्र
नत्रामस्य श्रद्धा सत्वकार्यभूता सत्वानुरूपा
सत्वतारतम्यानुसारिणी भवति सत्वादेके
सात्विकी राजसतामोभ्यां सत्वस्याभिभूतत्वेन

गी·टी·
१९·

190

जसीतामसीचेतिभूयसाव्यपदेशाभवंतीत्य
र्थः यथाहिअधार्मिकैर्विप्रैरभिभूतस्याधा
र्मिकस्यराज्ञःपरिवारश्चाधिक्येनविप्रत्वमना
ज्ञसोर्थ्येवमभवत्येवंश्रद्धापि नन्वेवंसत्यपितरः
किमित्यतआह श्रद्धामयोयमिति अयंपुरु
षोजीवःश्रद्धामयःश्रद्धयैवप्राचुर्येणसावि
कादिस्वभावउपलक्ष्यते यतोयःपुरुषोयच्छ्र
द्धःयादृश्यासात्विक्यादिरूपयाश्रद्धयायुक्तःसए
वपुनस्तादृशःसात्विकोराजसस्तामसोवा
भवति श्रद्धयाअभिव्यंजकंकार्यविशेषमा
ह ३॥ यजंतेसात्विकादेवान्यक्षरक्षांसिराज
साः भूतान्प्रेतगणांश्चान्येयजंतेतामसाजनाः
॥ सात्विकाजनाःसत्वप्रकृतीनिंद्रादिदेवान्य
जंतेपूजयंति राजसाजनारजःप्रकृतीन्यक्षा
न्रक्षांसिचयजंते एतेभ्योन्येविलक्षणास्ता
मसाजनास्तामसानेवभूतान्प्रेतांश्चयजंते यज
नात्मकेनकार्येणसत्वादिप्रकृतयोज्ञेयाः
भूतानितिविप्रादयःस्वधर्मप्रच्युतादेहपाता
दूर्ध्ववायवीयदेहमापन्नाउल्कामुखकटपूत
नादिसंज्ञाःप्रेताभवंतीति राजसतामसेषुपु

नर्विशेषोंतरमारूढाभ्याम् ५॥ अशास्त्र
विहितं घोरं तप्यंते ये तपो जनाः दंभाहंका
रसंयुक्ताः कामरागबलान्विताः। कर्षयंतः
शरीरस्थं भूतग्राममचेतसः मांचैवांतःशरी
रस्थं तान्विद्ध्यासुरनिश्चयान् ॥ ये जनाः पा
षांडिसंगेन गतानुगत्या वा अशास्त्रविहितं
शास्त्रेण प्रत्यक्षतोनुमानतो वा न चोदितं
घोरं दुःसहं तप्तशिलारोहणादितपोनियम
विशेषाभासं तप्यंते चरंति तत्र हेतवः दंभे
न धार्मिकत्वख्यापनेनाहंकारेणाभिमानेन
संयुक्ताः तथा कामोभिलाषः रागश्चासक्तिः
बलं पराग्रहरूपं तैरन्विताः शास्त्रीयो विधिर
प्यन्यथैव तथाहि यथा शरीरं न ग्लायेत्तथा
त्मस्ववशं यथा स्यात्तथा तपस्विवर्तेत न मूढ
त्वेनमाचरेदिति तथा शरीरस्थं शरीरत्वेन
परिणतं भूतग्रामं पृथिव्यादिभूतसंघातं कर्ष
यंतः वृथोपवासादिभिः कृशं कुर्वंतो चेतसो
विवेकशून्याः मांचैवात्मानमंतःशरीरस्थं
शरीराधिष्ठातृत्वेन स्थितं कर्षयंतस्तत्वान
वधारणेन तिरस्कुर्वंतस्तानासुरनिश्चया

गी॰टी॰
१९१

191

न आसुरः क्रूरो निश्चयो येषां तांस्तथाविधा
न्विधान्विद्धि जानीहि एवंशास्त्रान्येनश्रद्धेये
व सात्विकादिस्वभावो गीतार्थनिश्चयाधिका
रमतीत्यर्थमनुमीयते:पुनः आहारादिनापि
तमनुमापयितुं दशभिः श्लोकैराह ५। ९॥
आहारस्त्वपि सर्वस्य त्रिविधो भवति प्रियः
यज्ञस्तपस्तथा दानं तेषां भेदमिमं शृणु॥
सर्वस्यापि जनस्य य आहारो न्नादिः स च यथा
यथं त्रिविधः प्रियो भवति तेषां च वक्ष्यमाण
मिमं भेदं शृणु तत्राहारस्य त्रैविध्यमाह ७॥
आयुःसत्वबलारोग्यसुखप्रीतिविवर्धनाः
रस्याःस्निग्धाःस्थिरा हृद्या आहाराःसात्विक
प्रियाः॥ आयुषो जीवितसत्वस्य बुद्धेर्बलस्य
सामर्थ्यस्यारोग्यस्य रोगराहित्यस्य सुखस्य
चित्तप्रसादस्वरूपस्यानिर्हेतेः प्रीतेरभिरुचेर्वि
वर्धनाः परिपोषकाः ते च रस्या रसवंतः स्नि
ग्धाः स्नेहयुक्ताः स्थिरा रसांशेन चिरकाला
वस्थायिनः हृद्या हृष्टमात्रा एवं हृदयंगमाः
एवंविधा आहारा भक्ष्यभोज्यादयः सात्विका
ना[illegible]भवंति त

या ८ ॥ कट्वम्ललवणात्युष्णतीक्ष्णरूक्षवि
दाहिनः आहारा राजसस्येष्टा दुःखशोका
मयप्रदाः ॥ अतिशब्दः कट्वादिषु सप्तस्वपि
संबध्यते अतिकटुः निम्बादिः अत्यम्लमम्ला
दिः अतिलवणात्युष्णस्य प्रसिद्धः अतितीक्ष्णो
मरिचादिः अतिरूक्षः कोद्रवादिः अतिविदा
हीसर्षपादिः एते आहारा राजसस्य प्रिया भ
वंति एवंविधैराहारै राजसास्ते याः तथा दुःखं
तात्कालिकंदुःदयं गरासंतापादि शोकं पश्चा
द्भाविदौर्मनस्यं आमयो रोग एतानि प्रयच्छं
ति तथा ९ ॥ यातयामं गतरसं पूति पर्युषि
तं च यत् उच्छिष्टमपि चामेध्यं भोजनं तामस
प्रियम् ॥ यातो यामः प्रहरो यस्य पक्वस्योद
नादेस्तद्यातयामं शैत्यावस्थां प्राप्तमित्यर्थः
गतरसं विगतास्वादं पूति दुर्गंधि पर्युषितं प
कं सद्रात्र्यंतरितं उच्छिष्टमन्यभुक्तावशिष्टं
अमेध्यमभक्ष्यं कलंजादि एवंभूतं भोजनं
भोज्यं तामसप्रियं अनेन तामसो ज्ञातव्यः
अथ त्रिविधयज्ञमध्यात्सात्विकं यज्ञमाह
१० ॥ अफलाकांक्षिभिर्यज्ञो विधिदृष्टो य उ

ज्यते यष्टव्यमेवेतिमनःसमाधायससात्वि
कः॥ दृष्टादृष्टफलाकांक्षारहितैःपुरुषैर्
विधिदृष्टःविधीयतेनेनकार्यमितिविधिः
शास्त्रंतेनदृष्टोविभावितोयोयज्ञइज्यतेऽनु
ष्ठीयते कथमित्याह यष्टव्यमेवेति वर्णा
श्रमविभागेनशास्त्रचोदितंयज्ञंयागाद्यं
कर्मावश्यमनुष्ठेयमित्येवंमनश्चित्तंसमाधा
यसमाहितंकृत्वाइज्यते नतुफललिप्सया
ससात्विकोयज्ञः राजसंयज्ञमाह ११॥ अ
भिसंधायतुफलंदंभार्थमपिचैवयत् इज्य
तेभरतश्रेष्ठतंयज्ञंविद्धिराजसम् ॥ फलम
दृष्टंपारलौकिकंदंभार्थमपीतिदृष्टमैहलौ
किकंफलंचाभिसंधायसंकल्प्ययदिज्यते
यज्ञःक्रियतेतंयज्ञंराजसंविद्धितामसंयज्ञ
माह १२॥ विधिहीनमसृष्टान्नंमंत्रहीनम
दक्षिणं श्रद्धाविरहितंयज्ञंतामसंपरिचक्ष
ते॥ विधिनाशास्त्रोक्तयेनकृतंव्यतयार
हितं तथासृष्टान्नमसृष्टंसृष्टंविसृष्टमन्नंभो
ज्ययत्र इत्यपाठेतुअन्नदानहीनंस्वरतोव
र्णतश्चमंत्रहीनंस्वर्णोगभ्यतदक्षिणाशून्यं

श्रद्धयासंभावनायारहितमेवंविधंयज्ञं
तामसंतामसत्वप्रकाशकत्वंपरिचक्षतेकथ
यंति तपसःसात्विकादिभेदेनतस्यत्रैविध्य
माहत्रिभिः १३ ॥ देवद्विजगुरुप्राज्ञपूजनं
शौचमार्जवं ब्रह्मचर्यमहिंसाचशारीरंत
पउच्यते ॥ देवाःशिवविष्णुसूर्यब्रह्मदुर्गा
द्यादयः द्विजाब्राह्मणाःगुरवःपितृमातृआचा
र्यादयः प्राज्ञागुरुव्यतिरिक्ता अन्येपितत्त्व
विदः तेषांपूजनंप्रणाममयजनशुश्रूषादि
शौचंमृज्जलाभ्यां आर्जवंशोभनमह्रार्घव
स्त्रादिसंगेभुजंगवद्दाविकवद्वाअभंगत्वी
वावक्रत्वादिनाहितत्वं ब्रह्मचर्यनिषिद्धमै
थुननिवृत्तिः अहिंसापरपीडावर्जनं चका
रात्क्लेशापरिग्रहावपि एतत्सर्वंशारी
रनिर्वर्त्यत्वंतपउच्यते वाचिकंतपआह १४॥
अनुद्वेगकरंवाक्यंसत्यंप्रियहितंचयत् स्वा
ध्यायाभ्यसनंचैववाङ्मयंतपउच्यते ॥
अनुद्वेगकरंपरस्याविदावहंसत्यंप्रमाणे
नावाधितार्थंसत्यमित्यस्यस्वरूपनिरूपणं
प्रियहितमित्यनेनाक्रियतेप्रियंतत्कालेम

193

नोक्तं च हितं कालांतरे कल्याणपर्यवसायि
चेहैहदृष्टं यद्वाक्यं तत्सत्यमित्युच्यते तत्तथा
स्वस्तकथनमात्रं स्वाध्यायस्य वशात्पाठस्या
भ्यसनमावर्त्तनम् एवंविधविशेषणविशि
ष्टं वाक्यं वचा निर्वर्त्यत्वाद्वाचनिकं तप उच्यते
मानसं तप आह १५ ॥ मनःप्रसादः सौम्यत्वं
मौनमात्मविनिग्रहः भावसंशुद्धिरित्येतत्त
पो मानसमुच्यते ॥ मनसः प्रसादो रागद्वे
षराहित्यं नाकालुष्यं सौम्यत्वमक्रूरता प्रशां
ततेति यावत् मौनं मुनेर्भावश्चात्ममननमि
त्यर्थः आत्मनश्चित्तस्य विशेषेण सर्वहानि
श्चल्यतया निग्रहो निरोधः समाधिदशायां
भावसंशुद्धिर्व्यवहारे मायानतादिराहित्य
एतन्मनो निर्वर्त्यत्वान्मानसं तप उच्यते अ
थ त्रिविधमप्येतत्सात्विकादिभेदात्त्रैवि
विधमाह १६ ॥ श्रद्धया परयात तप्तं तपस्तत्त्रि
विधं नरैः अफलाकांक्षिभिर्युक्तैः सात्विकं प
रिचक्षते ॥ तत्पूर्वोक्तं शारीरादिभेदेन त्रिवि
धं तत्कृष्टया श्रद्धया फलाकांक्षारहितैर्नरैर्यु
क्तैरात्मनिसमाहितैस्तप्तमनुष्ठितं सात्विक

मितिपरिचलते राजसमाह १७ ॥ सत्कारमा
नपूजार्थं तपोदंभेन चैव यत् । क्रियते तदिह
प्रोक्तं राजसं चलमध्रुवम् ॥ सत्कारः साधुका
रः साधुरयं तापस इत्यादि वाक्पूजा मानः प्रत्यु
त्थानाभिवादनादिर्दैहिकादरः पूजार्थला
भादिः एतदर्थं दंभेनैव यत्तपः क्रियते तदिह
प्रोक्तमेवंविधमायिनिशास्त्रे राजसं प्रोक्तं कीदृशं
तत् चलं लोकदृष्टवत्तद्दर्शनाद्विजने चानव
शनादनियतं अर्थलाभादिफलव्यभिचारा
ल्लोकदृष्टवदध्रुवमनावश्यकम् तापसं तप
आह १८ ॥ मूढग्राहेणात्मनो यत्पीडया क्रि
यते तपः परस्योत्सादनार्थं वा तत्तामसमुदा
हृतम् ॥ मूढग्राहेणाविवेककिनिष्टेन दुराग्रहे
णात्मनः पीडया कदर्थनेन च परस्य शत्रोः स्था
नप्रच्यावनादिरूपविनाशार्थं वा यत्कर्कशं त
पोभिचाररूपं क्रियतेऽनुष्ठीयते तत्तामसमुक्तम्
एवं प्रतिज्ञातं दानस्य त्रैविध्यमाह तत्रा च सा
त्त्विकमाह १९ ॥ दातव्यमिति यद्दानं दीयते
नुपकारिणे देशे काले च पात्रे च तद्दानं सात्त्वि
कं स्मृतम् ॥ दातव्यं दयादिति शास्त्रनियोग

मात्रंपालनीयमित्येवमभिसंधायअनुपकारि
णेदृष्टादृष्टप्रत्युपकाराजनकायदेशेकुरुक्षे
त्रादौतीर्थेकालेग्रहणेसूर्योपरागादौपात्रेविद्या
तपोयुक्तायदानःरक्षकायवायद्दानंदीयते त
त्सात्विकंस्मृतं विद्यातपोभ्यामात्मनोदातृश्च
पालनत्राणमपवप्रतिग्रहेत्क्रीयादितिशास्त्रम् रा
जसंध्यानमाह २०॥ यत्तुप्रत्युपकारार्थंफ
लमुद्दिश्यवापुनः दीयतेचपरिक्लिष्टंतद्राज
समुदाहृतम्॥ कालांतरेऽयंमांप्रत्युपकरिष्य
तीत्येवंदृष्टफलमभिसंधायाथवास्वर्गादिक
मदृष्टंफलमुद्दिश्यसंकल्प्ययद्दानंदीयतेयद्वा
परिक्लिष्टंकष्टमेतावद्दायितमित्येवंपश्चात्ता
पयुक्तंयथाभवत्येवंयद्दीयतेतद्दानंराजसं
स्मृतम् नामसंदानमाह २१॥ अदेशकाले
यद्दानमपात्रेभ्यश्चदीयते असत्कृतमवज्ञातं
तत्तामसमुदाहृतम्॥ अदेशेअशुचिस्थाने
अकालेअशौचसमयेअपात्रेभ्योनटविटादि
भ्योयद्दानंदीयतेदेशकालपात्रसंपत्तावपि
सत्कृतेपादप्रक्षालनादिसत्कारशून्यमवज्ञा
तंतिरस्कारयुक्तमेवंभूतंदानंतामसमुदाहृ

तम् श्रद्धायाः सात्विकादिस्वभावत्रय्येलक्ष
णभूतायाश्चांतरतादुर्लक्षतामालक्ष्यवाह्याश्र
याहारादयः सात्विकादिस्वभावपर्यालोच
नायसात्विकोगीतार्थविवोधानुष्ठानयोर्भाज
नं राजसः किंचिदुपायानुशीलनेन सात्विक
स्वभावाभ्याधिकारी भविष्यति तामसस्त्वत्यं
तमनधिकृतइत्येतदर्थंभगवताश्रद्धात्रयप्र
पञ्चितः अधुनाराजसानांपुरुषाणांगीतार्था
वधारणेचित्तपरिकर्मार्थंतेषांयज्ञतपोदाना
दिकस्यचसात्विकत्वापादनायोपायभूतं ॐत
त्सदितिश्रीभगवन्नामोच्चारणरूपंप्रायश्चित्तंपर
मकारुणिकतयाश्रीभगवानुपदिशति २३॥
ॐतत्सदितिनिर्देशोब्रह्मणस्त्रिविधः स्मृतः
ब्राह्मणास्तेनवेदाश्चयज्ञाश्चविहिताः पुरा॥
ॐमित्यक्षराभ्युपगमात्मकंपदंतदिति सर्व
नामपदंपरोक्षवाचकं सदितिप्रशस्तप्रति
पादकमित्येवंपरब्रह्मणोनिर्देशोनामव्यप
देशस्त्रिविधस्त्रिप्रकारः स्मृतः विगुणस्यापिस
गुणत्वापादनायोपदिष्टः शिष्टैः अत्रसंमति
माह ब्राह्मणाइतितेनत्रिविधेनब्रह्मणोना

मनुराम्नाद्यो विधाता ब्राह्मणो जातिश्रेष्ठाय
ज्ञायज्ञष्टारो वेदास्तत्साधनीभूता यज्ञाः कर्मा
णि च विहिताः स्रष्टृत्वेन निर्मिताः अतो राज
सत्वपरिहाराय सात्विकत्वापादनाय ॐ तत्स
दिति नामत्रयमवश्यं यज्ञतपोदानादावुपदे
श्यम् यदुक्तं प्रमादात्कुर्वतां कर्म प्रच्यवेताध्व
रेषु यत् स्मरणादेव तद्विष्णोः संपूर्णं स्यादिति
श्रुतिः नचैतत्केवलं शास्त्रसिद्धमेव यावल्लोके
पि प्रसिद्धमित्याह २४ ॥ तस्मादोमित्युदाहृ
त्य यज्ञदानतपःक्रियाः प्रवर्तंते विधानोक्ताः
सततं ब्रह्मवादिनाम् ॥ यस्मादेवं तस्मात्
ॐमिति ब्रह्मेति श्रुतिप्रसिद्धे ॐमिति मंत्रपदे
प्रत्येणाभासमानस्य ब्रह्मणोन्तरभ्युपगम
त्वप्रतिपादकश्रुत्यार्थं ॐ ब्रह्मेवेदं सर्वमित्यव
श्रुतीर्थं ब्रह्मवादिनां विज्ञानवतां सर्वं खल्विदं
ब्रह्मेत्येवं वदनशीलानां विधानोक्ताः शास्त्रो
क्ता यज्ञदानतपसां क्रियाः कर्माणि सर्वदा प्र
वर्तंते प्रसरंति किंच २५ ॥ तदित्यनभिसं
धाय फलं यज्ञतपःक्रियाः दानक्रियाश्च वि
विधाः क्रियंते मोक्षकांक्षिभिः ॥ ततमसीति

श्रुतिप्रसिद्धंतदितिमंत्रपदंसर्वनामत्वंपरो
तस्यब्रह्मणःप्रतिपादकंमुच्चार्य तद्ब्रह्मसाधु
यामित्येवमुदीर्यफलेस्वर्गाद्यनभिसंधायासक
त्यविविधायज्ञतपोदानक्रियामोक्षार्थिभिः
शुद्धचित्तैःक्रियंतेत्वर्थीयंते किंच २५॥ सद्भा
वेसाधुभावेचसदित्येतत्प्रयुज्यते प्रशस्तेकर्म
णितथासच्छब्दःपार्थयुज्यते॥ सदेवसोम्ये
दमग्रआसीदित्यादिश्रुतिप्रसिद्धंसदित्येतन्मं
त्रपदंसद्भावेश्चविद्यमानत्वशंकायांविद्यमान
त्वेसाधुभावेचासाधुत्वशंकायांसाधुत्वेचसर्वैर्ज
नैःप्रयुज्यते तथाप्रशस्तेमांगलिकेविवाहा
दौकर्मणिसदिदंकर्मेत्येवंप्रयुज्यतेसर्वैः॥किं
च २७॥ यज्ञेतपसिदानेचस्थितिःसदितिचो
च्यते कर्मचैवतदर्थीयंसदित्येवाभिधीयते॥
यज्ञादिषुचयास्थितिस्तात्पर्येणावस्थानंतद
पिसदित्युच्यतेविद्वद्भिः तदर्थीयंयज्ञाद्यर्थंहि
तेकर्मार्जनादितदपिसदित्येवाभिधीयते
यस्मादस्यनाम्नोव्यस्तस्यापिसद्गुणत्वापादनं
लोकेप्रसिद्धंकिंपुनः ॐतत्सदितिसमस्तस्य
वक्तव्यम तस्मादेतन्नामयज्ञादौसात्विकत्व

गी·टी· निष्फलत्वार्थमवश्यमुक्तत्वार्थम् अथ तामसानां
१९८ श्रीगीताशास्त्रार्थावबोधेऽत्यंतमनधिकृतत्व
प्रतिपादनाय तेषां कर्माण्यनर्हत्वान्न किंचिदु
पकारकमित्याह २८ ॥ अश्रद्धया हुतं दत्तं त
पस्तप्तं कृतं च यत् असदित्युच्यते पार्थ न च त
त्प्रेत्य नो इह ॥ अश्रद्धया तामसैः पुरुषैर्यद्धुतं
हवनं कृतं दानं दत्तं तपश्चरणं निर्वर्तितं यद
न्यत्कर्म नमस्कारवंदनादि कृतं तत्सर्वम
सदसाधित्युच्यते सद्भिः अतस्तस्य ॐ तत्स
196 दिति निर्देशेनापि सत्त्वं कर्तुं न शक्यते शिला
यामिवांकुरः अतस्तामसा गीतार्थावबोध
ने सर्वथानधिकृता एवेति यतस्तत्प्रेत्यलो
कांतरे न फलति नो इह न चास्मिंल्लोके फलति
श्रद्धाराहित्येनापूर्वाजनकत्वात् अनया भग
वद्भक्त्या ऐहिकमामुष्मिकं च फलं कर्म साधय
तीति गम्यते तथा चोक्तं क्लेशमूलः कर्माश
योदृष्टादृष्टजन्मवेदनीय इत्योम् २९ देवस
र्गपरीक्षायै भोजनाद्यमलत्वयत् योऽस्मिंस्तु
ष्टगणोद्देशेनैव तत्त्वगुणसागरम् ॥ इति श्रीभ
गवद्गीताटीकायां तत्त्वप्रकाशिकाख्यायां स

ज्ञानकलक्ष्मीनामविरचितायांश्रद्धात्रयनि
र्देशोनामसप्तदशोध्यायः १७ ॥ ॐ श्रीगणे
शायनमः अथसर्वगीतार्थस्यसंग्रहंकारयि
तुंसंन्यासत्यागयोःपूर्वेलक्षितलक्षणयोरपि
पार्थक्येनलक्षणंबुभुत्सयाप्रस्तावनयार्जुनउवा
च ॥ संन्यासस्यमहाबाहोतत्त्वमिच्छामिवेदि
तुम् त्यागस्यचहृषीकेशपृथक्केशिनिषूद
न ॥ हेमहाबाहोहेकेशिनामासुरप्रध्वंसन
संन्यासःसर्वपरिहारःत्यागोहानमित्यनयोरे
कार्थत्वात्किंपरस्परपर्यायत्वमुतभिन्नार्थतेत्येवं
पृथग्विवेकेनसंन्यासत्यागयोस्तत्त्वंयाथात्म्यंज्ञा
तुमिच्छामि अर्जुनंश्रीभगवानुवाच १ ॥ का
म्यानांकर्मणांन्यासंसंन्यासंकवयोविदुः सर्व
कर्मफलत्यागंप्राहुस्त्यागंविचक्षणाः ॥ का
म्यानांपुत्रकामोयजेतेत्यादिनाफलकामन
याचोदितानांकर्मणांन्यासंपरिहारंकवयःसर्व
ज्ञाः संन्यासशब्दार्थंजानंतिकाम्यमपिकर्माणि
फलाभिसंधिरेववर्ज्योनत्वनुष्ठानमित्याह स
र्वेति सर्वेषांनित्यनैमित्तिकंकाम्यानांकर्मणां
यज्ञादीनांक्रियमाणानामपिफलस्यस्वर्गादिलक्ष

गी॰टी॰
१८०

197

णस्त्यागं वर्जनं विचक्षणा विवेकिनस्त्यागंश
ब्दार्थमाहुः एतेन संन्यासत्यागयोरेकार्थतास्ति
ष्टा तदैवविशेषनिर्णयाय मतान्युपन्यस्यति
२॥ त्याज्यं दोषवदित्येके कर्म प्राहुर्मनीषिणः
यज्ञदानतपःकर्म न त्याज्यमिति चापरे॥ एके
मनीषिणः सांख्यदृष्ट्या दोषवदविशुद्धिक्षया
तिशयादिदोषयुक्तत्वात्कर्म सर्वं त्याज्यं परिहा
र्यमित्याहुः यद्वा दोषवत् दोषइव मनीषि
ण इत्यस्यायं भावः न हिंस्यात्सर्वभूतानीति हि
निषेधः पुरुषस्यानर्थहेतुर्हिंसेत्याह अग्नीषो
मीयं पशुमालभेतेत्यादिप्राकरणिको विधिस्तु
हिंसायाः क्रतूपकारकत्वमाह अतो भिन्नवि
षयत्वेन सामान्यविशेषन्यायागोचरत्वाद्दूष्य
सांख्यैश्च सर्वेष्वपि कर्मसु हिंसादेः संभवात्स
र्वमपि कर्म त्याज्यमेवेति तदुक्तं दृष्टवदानुश्र
विकः सह्यविशुद्धिक्षयातिशययुक्त इति अप
रे तु मीमांसकाः [illegible] विशुद्धिक्षयातिशये यज्ञादि
कं कर्म न त्याज्यमित्येवमाहुः यथा च यज्ञादेर्नि
यतस्य कर्मणः परिहारादुपपातित्वं तथा बहुशः
प्रतिपादितं प्राक् एवं विप्रतिपत्तौ स्वमतं सर्व

मताशीतोमाणीश्रूतेनिश्चायपितमाह ३॥
निश्चयंश्रुणुमेतत्रत्यागेभरतसत्तम त्यागो
हिपुरुषव्याघ्रत्रिविधःसंप्रकीर्तितः॥ त
त्रैवंविप्रतिपन्नेत्यागेममवचनान्निश्चयंश्र
णुत्यागस्यलोकेप्रसिद्धत्वात्किमत्रश्रोतव्य
मितिमामंस्थाइत्याह हियतोपुरुषश्रेष्ठश्र
यंत्यागःसामान्यजनदुर्बोधस्तस्मात्त्रिविधःसा
त्विकादिभेदेनत्रिप्रकारःसम्यग्विवेकेनप्र
कीर्तितःनिश्चयमेवाह ४॥ यज्ञदानतपः
कर्मनत्याज्यंकार्यमेवतत् यज्ञोदानंतप
श्चैवपावनानिमनीषिणाम्॥ सर्वैर्जनैर्ज्ञा
निभिर्वायज्ञदानतपोरूपंकर्मन
त्याज्यंनपरिहार्यंकिंतुतदवश्यंकर्तव्यमेव
तत्रकर्मत्यागेप्रयोजनमाह यस्मादितिमनी
षिणांदैवसर्गभाजांविवेकवतांयज्ञोदानं
तपश्चेत्येतानिपावनानिशोधकान्यज्ञान
रूपमलनिर्णेजकानीतियानिपदे ज्ञानि
पदेनपावनानिदेहाहंभावात्मकमलना
शकानि येनप्रकारेणकृतान्येतानिपाव
नानिभवंतितंप्रकारमाह ५॥ एतान्यपि

गी·टी·
१९८

नकर्माणि संगं त्यक्त्वा फलानि च कर्तव्यानी
ति मे पार्थ निश्चितं मतमुत्तमम् ॥ अपितु इति
किं तदर्थं एतान्यत्याज्यतयोक्तानि कर्माणि
यज्ञदानादीनि कर्तव्यान्यवश्यकरणीयानि
किंतु संगं तन्निमित्तमभिनिवेशं फलानीष्टानिष्ट
रूपाणि त्यक्त्वा कर्तव्यानीति मम मेश्वरस्यार्जुनमे
सर्वोत्कृष्टं निश्चितं प्रमाणैरवधारितं मतम्

198

अत्र हेतुमाह ७ ॥ नियतस्य तु संन्यासः क
र्मणो नोपपद्यते मोहात्तस्य परित्यागस्ता
मसः परिकीर्तितः ॥ काममस्तु काम्यस्य
कर्मणः संन्यासः नियतस्य तु वर्णाश्रमवि
भागेन नित्यस्याव्यभिचारिणः कर्मणो यज्ञा
देः संन्यासस्त्यागो न तु इष्टानेनोपपद्यते शास्त्र
युक्तिभ्यां न घटते योगप्रतिकूलत्वात् तथा च
शास्त्रं तथैव यैः परित्यक्तं कर्मकांडमपंडितैः
पाषंडाः पंडितैः संन्यासं यान्ति नरकं ध्रुवमि
ति युक्तिश्च न हि देहभृता शक्यं त्यक्तुं कर्माण्य
शेषत इत्यादिनोक्ता च अतिप्रसक्तिस्तानेन त्याग
स्यैव त्रैविध्यं दर्शयति मोहादिति अविवेकता
नमपरिविहितत्यागनिरसनं तेन मोहादिपर्या

स्वरूपान्नस्यात्त्याज्यस्यानियतस्यकर्मणः प
रित्यागस्तामसः तमःकार्यमोहजन्यत्वाद
योगातिरेकत्वाच्चतामसः परिकीर्तितः ता
मसंत्यागमुक्त्वाराजसंत्यागमाह ७॥ दुः
खमित्येवयत्कर्मकायक्लेशभयात्त्यजेत्
सकृत्वाराजसंत्यागंनैवत्यागफलंलभेत्॥
यत्कर्मदुःखंखेदावहमित्येवंमत्वाकायक्ले
शभयाच्छरीरकदर्थनाख्यान्नित्यंकर्मय
स्त्यजेदितियत् सपुरुषस्तादृशंराजसंत्या
गंकृत्वात्यागस्याद्वैतज्ञानयथारारूढयोगप
स्यफलंमोक्षणंनैवलभेतेत्यर्थः सात्विकंत्या
गमाह ८॥ कार्यमित्येवयत्कर्मनियतंक्रि
यतेर्जुन संगंत्यक्त्वाफलंचैवसत्यागःसात्वि
कोमतः॥ संगंतद्धीनचित्तत्वंफलंचत्यक्त्वा
नित्यंस्वरूपप्रतिष्ठितप्रज्ञतयापरिहार्यं का
र्यमवश्यकर्तव्यमेतदितिबुद्ध्यानियतंशास्त्र
चोदितंनित्यंकर्मक्रियतेइतियत् सतादृश
स्त्यागःसात्विकोमतः अथैवंविधस्यसात्विक
स्यत्यागिनःस्वरूपंप्रतिपादयति ९॥ नद्वे
ष्ट्यकुशलंकर्मकुशलेनानुषज्जते त्यागीस

त्वसमाविष्टोमेधावीछिन्नसंशयः॥ स
त्वेनाहंतयासमाविष्टोव्याप्तःसात्विकस्त्या
गीमेधावीतत्वबोधनित्यसंबद्धःछिन्नसंश
यस्तुरितदेहाभिमानोकुशलंशरीरान
ष्टकुलंशिशिरेप्रातःस्नानादिकंकर्मन
द्वेष्टिअप्रीत्यानभावयति तथाकुशले
देहाद्यनुकूलेनिदाघेमध्याह्नस्नानादौनानु
षज्जतेरतिंनवध्नाति नन्वेवंविधस्यसात्वि
कस्यत्यागिनःकर्मत्यागएववरंकिंकर्मा
नुष्ठानेनेतिनेत्याह १०॥ नहिदेहभृता
शक्यंत्यक्तुंकर्माण्यशेषतः यस्तुकर्मफ
लत्यागीसत्यागीत्यभिधीयते॥ देहभृता
तानिनापिदेहंविभ्रतासर्वाणिकर्माणि
त्यक्तुंनैवशक्यम् तस्माद्यस्तुकर्माणिकुर्व
न्नपिकर्मफलत्यागीसएवमुख्यस्त्यागीत्य
भिधीयते फलात्यागिनोनुष्ठातुःसात्विका
दिभेदेनफलस्यत्रैविध्यमाह ११॥ अनि
ष्टमिष्टंमिश्रंचत्रिविधंकर्मणःफलम्
भवत्यत्यागिनांप्रेत्यनतुसंन्यासिनांक्व
चित्॥ [illegible]दुःखात्मकनार

कित्वादि इष्टमभिमतं स्वर्गात्मकं देवत्वा
दि मिश्रं स्वर्गदुःखात्मकं मनुष्यत्वादि इत्ये
वं पापस्य पुण्यस्योभयमिश्रस्य च कर्मणो
यत्फलं प्रसिद्धं तत्सर्वमत्यागिनां कर्मानु
ष्ठातॄणां न तु फलत्यागिनां प्रेत्य परलोके
भवति संन्यासिनां कर्म कुर्वतामपि फल
त्यागिनां क्वचिदपि इहका परत्र वा न भव
ति अभिसंधिनैव कर्मणां फलावहत्वात्
न तु कर्म कुर्वतः कर्मफलं कथं न भवेदित्या
शंक्य संगत्यागिनो निरहंकारस्य सर्वकर्म
फलेन लेपो नास्तीत्युपपादयितुमाह १२॥
पंचेमानि महाबाहो कारणानि निबोध मे
सांख्ये कृतांते प्रोक्तानि सिद्धये सर्वकर्म
णाम्॥ कृतांते कृतनिश्चये सांख्यशास्त्रे
सर्वेषां मनोवाक्कायनिर्वर्त्यानां कर्मणां
सिद्धये निष्पत्तये प्रोक्तानि प्रतिपादितानी
मानि वक्ष्यमाणानि पंच कारणानि हेतून
हे महाबाहो मे वचनान्निबोधावधारय
कानि तानीत्याह १३॥ अधिष्ठानं तथा क
र्ता करणं च पृथग्विधम् विविधाश्च पृथ

चेष्टा दैवं चैवात्र पञ्चमम् ॥ अधिष्ठानं श
रीरं कर्तादिजडग्रन्थिरहंकारः पृथग्विधं
नानाप्रकारं चक्षुःपाण्यादि तत्करणमने
कं तथा पृथक्पृथग्भूताः कार्यतो विवि
धाश्चेष्टाश्चलनादीनां प्राणापानादीनां
व्यापाराः अत्रैवैतेषु चतुर्षु चलनायतनग्रा
हको देवसमूहः पञ्चमं पञ्चसंख्यापूरणं
देवसमूहः श्रुतिप्रसिद्धं यथा कर्तारहं
कारस्याधिष्ठात्री देवता रुद्रः बुद्धीन्द्रियाणा
मधिष्ठात्र्यो देवता दिग्वातार्कप्रचेतोश्वि
नः कर्मेन्द्रियाणां वह्नीन्द्रोपेन्द्रमित्रप्रजाप
तयः मनोबुद्ध्योश्चन्द्रबृहस्पती पञ्चप्राणा
नां क्रियारूपाणां सद्योजातवामदेवाघो
रतत्पुरुषेशानाइति एतेषामेव पञ्चानां
सर्वकर्महेतुत्वं निगमयति १४ ॥ शरीर
वाङ्मनोभिर्यत्कर्म प्रारभते नरः न्याय्यं वा
विपरीतं वा पञ्चैते तस्य हेतवः ॥ अत्रैव
सर्वस्मिन्कर्मणि करणत्वेन प्रसिद्धेः शरी
रवाङ्मनोभिर्यत्कर्म यथार्थमयथार्थं वा नरः क
रोति तस्य सर्वस्य एते अधिष्ठानादयः पञ्च

डि.गि
१०६

हेतवः कारणानि ततः किमत आह १५॥
तत्रैवं सति कर्तारमात्मानं केवलं तु यः पश्य
त्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः॥ तत्र
सत्युदिते एवाधिष्ठानादिपंचके एव शुभाशुभक
र्मणस्सम्यक्शरीरादिक्रियाकारणभूते सति यः क
श्चित्स्वरूपः केवलमेकमेवात्मानं कर्तारं कर्म
संपादकं पश्यति बध्यते स पुरुषो न पश्यति
न सम्यग्वेत्ति कुतोऽकृतबुद्धित्वाद्धेतोः न कृता
न सम्यक्छिष्यादिता बुद्धिर्देहादिव्यतिरिक्तस्या
त्मनो बोधो येन स तस्य भावस्तस्मात् यतो दु
र्मतिः दुष्टा विपरीतभावनाभिभूता मतिः प्रज्ञा
यस्य सः अथ संन्यासिनो लक्षणमाह १९॥
यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते
हत्वापि स इमांल्लोकान्न हंति न निबध्यते॥
यस्य स्वस्वरूपप्रतिष्ठस्य कर्मकर्तारावित्यहं
कृतोऽहंकारस्य भावः स्वभावोऽहं करोमीत्ये
वंदेहाद्यभिमानाभावान्नास्ति बुद्धिश्च यस्य
न लिप्यते नानुशायिनी भवति स पुरुषश्रेष्ठ
इमान्योद्धुमवस्थितानिमान्सर्वांल्लोकान्हत्वा
लोकान्प्राणिनो हत्वापि न हंति कर्तृत्वाभि
मानाभावान्न निबध्यते तत्फलेश्च न युज्यते

वासनानाशनात् निवृत्तत्वाच्च कर्महेतोः पं
चविधत्वं लोकप्रसिद्धं त्रैविध्यमेव ज्ञानकर्म
हेतोः प्रतिपादयामीत्याह १७ ॥ ज्ञानं ज्ञेयं प
रिज्ञाता त्रिविधा कर्मचोदना करणं कर्म क
र्तेति त्रिविधः कर्मसंग्रहः ॥ ज्ञायतेऽनेनेति ज्ञा
नमिंद्रियादिकं ज्ञेयं यज्ज्ञायते सुखदुःखनी
लपीतादि परिज्ञाता ज्ञानात्मिका यो क्रियायां
सतंत्रश्चेत्येवं कर्मणः क्रियायाश्चोदना प्रवृ
त्तिहेतुः तथा करणं साधकतमं हस्तादि क
र्म क्रियानिर्वर्त्यं घटादि कर्ता क्रियानिवर्तक
श्चेत्येवं कर्मणः क्रियायाः संग्रहः निष्पत्तिहेतू
नां संक्षेपः ततः किमत आह १८ ॥ ज्ञानं क
र्म च कर्ता च त्रिधैव गुणभेदतः प्रोच्यते गुण
संख्याने यथावच्छृणु तान्यपि ॥ ज्ञानं कर्म
कर्ता चेत्येतत्त्रयं प्रत्येकं सत्त्वादिगुणभेदेन
गुणानां संख्याने निश्चयो यत्र तत्र सांख्ये य
सिद्धांते प्रोच्यते तान्यपि ज्ञानादीनि वक्ष्यमा
णानि यथावच्छृणु तत्र त्रिविधज्ञानमध्या
त्सात्त्विकं ज्ञानमाह १९ ॥ सर्वभूतेषु येनैकं
भावमव्ययमीक्षते अविभक्तं विभक्तेषु तत्
ज्ञानं विद्धि सात्त्विकम् ॥ येन ज्ञानेन करणे

भूतेनसर्वेषुब्रह्मादिस्थावरांतेषुविभक्तेषु
परस्परंव्यावृत्तेषुविभक्तमनुस्यूतमेकमव्य
यंशाश्वतंभावंचिदात्मकंनवमीक्षतेस्वात्म
तयासाक्षात्करोति तज्ज्ञानंसंवेदनंसात्विकं
विद्धि राजसंज्ञानमाह २०॥ पृथक्त्वेनतुय
ज्ज्ञानंनानाभावान्पृथग्विधान् वेत्तिसर्वेषु
भूतेषुतज्ज्ञानंविद्धिराजसम्॥ सर्वेषुचतत्
द्देशाविधेषुभूतेषुप्राणिषुनानाभावाननेका
न्क्षेत्रज्ञान्पृथग्विधान्सुखिदुःखित्वादिरूपेण
स्थावरजंगमादिभेदेनवापरस्परतोव्यतिरि
क्तान्वेत्तीतियत्पृथक्त्वेनसतोभेदेनज्ञानंतद्रा
जसंविद्धि यथासांख्यतार्किकादीनां तामस
संज्ञानमाह २१॥ यत्तुकृत्स्नवदेकस्मिन्का
र्येसक्तमहैतुकम् अतत्वार्थवदल्पंचतत्ता
मसमुदाहृतम्॥ एकस्मिन्कार्येभूतेदेहेप्र
तिमादौवाकृत्स्नवत्परिपूर्णवत्सक्तंपतिवा
नेवात्माईश्वरोवेत्यभिनिवेशनलग्नं अहेतुकं
निरुपपत्तिकं अतत्वार्थवत्परमार्थावलम्ब
नशून्यमतएवाल्पविषयत्वादल्पफलत्वाच्च
स्वल्पंचयदेवंभूतंज्ञानंतत्तामससमुदाहृतम्

यथा चार्वाकादीनाम् इदानीं त्रिविधं कर्माह
२२ ॥ नियतं संगरहितमरागद्वेषतः कृतम्
अफलप्रेप्सुना कर्म यत्तत्सात्विकमुच्यते ॥
नियतं नित्यतया विहितं संगेनात्मनिष्ठप्रत्त
त्वात्मत्विमस्त्रचित्ततया रहितं अरागद्वेषतः
पुत्रादिप्रीत्या शत्रुद्वेषेण वा यत्कृतं न भवति
फलाभिलाषरहितेन कर्त्रा यत्कृतं कर्म तत्सा
त्विकमुच्यते राजसं कर्माह २३ ॥ यत्तु कामे
प्सुना कर्म साहंकारेण वा पुनः क्रियते बहु
लायासं तद्राजसमुदाहृतम् ॥ कामेप्सुना
ऐहिकामुष्मिकभोगलिप्सुना साहंकारेण दे
हादावात्मप्रत्ययवता च कर्त्ता बहुलायासम
तिक्लेशयुक्तं यत्कर्म क्रियते तत्कर्म राजसमु
दाहृतम् बाशब्दः समुच्चये तामसं कर्माह
२४ अनुबन्धं क्षयं हिंसामनवेक्ष्य च पौरुषं
मोहादारभ्यते कर्म तत्तामसमुदाहृतं ॥
अनुबन्धं पश्चाद्भाविशुभाशुभं क्षयं धनादि
नाशं हिंसां प्राणिपीडां पौरुषं स्वसामर्थ्यम
नवेक्ष्यापर्यालोच्य केवलान्मोहादविवेका
देव यत्कर्मारभ्यते तत्तामसमुदाहृतं अथ

202

त्रिविधः कर्तोच्यते तत्र सात्विकस्तावत् २५॥
मुक्तसंगोनहंवादी धृत्युत्साहसमन्वितः सि
द्ध्यसिद्ध्योर्निर्विकारः कर्तासात्विकउच्यते॥
मुक्तस्त्यक्तः संगआसक्तिर्येनसः विरक्तइत्य
र्थः देहाद्यभिमानाभावादनहंवादी अहम
हमितिगर्वोक्तिरहितः धृत्यादार्ढ्येनोत्साहेनो
द्यमेनचसमन्वितः तथारब्धकर्मणः फलस्य
सिद्धौवासिद्धौवानिर्विकारोहर्षविषादशून्यः
एवंभूतः कर्तासात्विकउच्यते राजसंकर्ता
रमाह २९॥ रागीकर्मफलप्रेप्सुर्लुब्धोहिं
सात्मकोशुचिः हर्षशोकान्वितः कर्ताराज
सःपरिकीर्तितः॥ रागीविषयाभिलाषवा
न् कर्मफलेलिप्सुःलुब्धःपरस्वाभिलाषीहिं
सात्मकोमारकस्वभावः अशुचिर्बाह्याभ्यंत
रशौचरहितः फलसिद्ध्यसिद्ध्योर्हर्षशोकाभ्या
मन्वितः एवंविधः कर्ताराजसःपरिकीर्तितः
तामसंकर्तारमाह २७॥ अयुक्तः प्राकृतः स्त
ब्धः शठोनैष्कृतिकोलसः विषादीदीर्घसूत्री
चकर्तातामसउच्यते॥ अयुक्तोसमाहितः प्रा
कृतः प्रकृतिं नहिकारं वास्तवेनप्रतिपन्नः

स्तब्धो मिथ्याभिमानाभिनिवेशान्न कंचित्प्रण
मति शठो मायावी नैष्कृतिकः निष्कृतिः पर
वंचनं प्रयोजनं यस्य स अलसोऽनुद्यमः विषादी
शोकशीलः दीर्घसूत्री चिरकारी ईदृशः क
र्त्ता तामस उच्यते अथ बुद्धिधृत्योरेवमेव त्रैवि
ध्यं वक्तुमुपक्रमते २८ ॥ बुद्धेर्भेदं धृतेश्चैव गु
णतस्त्रिविधं शृणु प्रोच्यमानमशेषेण पृथ
क्त्वेन धनंजय ॥ वस्तुनिश्चायकमंतःकरणं
बुद्धिः धृतिरारब्धे कर्माणि सिद्धिपर्यंतं स्थैर्यं त
योः सत्वादिगुणतस्त्रिविधं भेदं शृणु मे म
या साकल्येन विशेषेण च प्रोच्यमानं हे धनं
जय सात्विकीं बुद्धिमाह २९ ॥ प्रवृत्तिं च नि
वृत्तिं च कार्याकार्ये भयाभये बंधं मोक्षं च या
वेत्ति बुद्धिः सा पार्थ सात्विकी ॥ धर्मे प्रवृत्तिम
धर्मे निवृत्तिं यस्मिन्देशे काले च यत्कार्यमकार्यं
च भयाभये कार्याकार्यनिमित्तावर्थावनर्थौ
कथं बंधः कथं वा मोक्ष इति या बुद्धिरंतः
करणं वेत्ति सा सात्विकी यया पुमान्वेत्तीति
वक्तव्ये करणे कर्तृत्वोपचारः काष्ठानि पचं
तीतिवत् राजसीं बुद्धिमाह ३० ॥ यया धर्म

203

मधर्मंचकार्यंचाकार्यमेवच अयथावत्प्रजा
नातिबुद्धिःसापार्थराजसी ॥ यथाबुद्ध्याऽ
दृष्टविषयोधर्मोधर्मौसदाचारपापाचारौ
दृष्टविषयेकार्याकार्येच अयथावन्निश्चया
भावादसम्यक्संशयास्पदत्वेनवेत्तिसाराज
सीबुद्धिः तामसींबुद्धिमाह ३१॥ अधर्मंधर्म
मितियामन्यतेतमसावृता सर्वार्थान्विपरी
तांश्चबुद्धिःसापार्थतामसी ॥ सर्वार्थान्सर्वा
न्पदार्थान् विपरीतग्राहिणीबुद्धिस्तामसीत्य
र्थः सात्विकींधृतिमाह ३२॥ धृत्यायया धार
यतेमनःप्राणेंद्रियक्रियाः योगेनाव्यभिचारि
ण्याधृतिःसापार्थसात्विकी ॥ अव्यभिचारि
ण्यानिश्चलयाययाधृत्यादार्ढ्येनदृढतया
योगेनात्मसमाधानेनकरणेनमनसःक्रियाः
संकल्पात्मिकाःप्राणानांक्रियाउच्छ्वासनिःश्वा
साध्यात्मिका इंद्रियक्रियादर्शनादिरूपाधार
यतेवष्टभ्नातिसाधृतिःस्थैर्यंसात्विकीराजसी
धृतिमाह ३३॥ ययातुधर्मकामार्थान्धृत्याधा
रयतेऽर्जुन प्रसंगेनफलाकांक्षीधृतिःसापार्थ
राजसी ॥ ययाधृत्यादार्ढ्येनधर्मकामार्थान्त्रि

वेगंधारयतेनित्यंकर्तव्यतयावश्यात्प्रसंगे
ननतथाभिनिवेशेनफलाकांक्षीचभवति सा
धृतीराजसी नामसाधृतिमाह ३४ ॥ ययास्वप्नं
भयंशोकंविषादंमदमेवच नविमुंचतिदुर्मे
धाधृतिःसापार्थतामसी ॥ येनस्थैर्येणस्वप्नं
निद्रांभयंत्रासंशोकंविनष्टानुशोचनम् विषा
दंविषण्णोनामउन्मत्ताहंमदंचित्तोद्रेकंविनष्टा
नुशोचनं नविमुंचतिपुनःपुनरावर्तयति
यतोदुर्मेधाःदुष्टदेहाद्यभिमानाभिनिवेशे
नविपर्यस्ताबुद्धिर्यस्यसाधृतिस्तामसी सुख
स्यत्रैविध्यंप्रतिजानीतेर्धेन ३५ सुखंत्विदा
नींत्रिविधंशृणुमेभरतर्षभ अभ्यासाद्रमते
यत्रदुःखांतंचनिगच्छति ॥ मेवचनाच्छृणु
अन्यस्यहं नत्रसात्विकंसुखमाह अभ्यासा
दितिसार्धेन यत्रयस्मिन्सुखेभ्यासान्नित्यानु
शीलनाद्योगीरमते यथोत्तरंप्रीतिंभजते नतु
हिजतेयस्मिन्नममाणश्चदुःखस्याध्यात्मिका
दिनात्रिविधस्यांतमवसानंनिगच्छतिनितरां
प्राप्नोति ३६ ॥ यत्तदग्रेविषमिवपरिणामे
मृतोपमम् तत्सुखंसात्विकंप्रोक्तमात्मबुद्धि

प्रसादजम् ॥ यत्तदिति किमप्यनिर्वाच्यम्
अग्रेऽभ्यासकाले विषमिव दुःखं जन्मशता
भ्यस्तदेहात्मभाववासनायाः दुष्परिहरत्वात्
परिणामे पर्यंते योगस्य संसिद्धावमृतोपमं
निरुपमास्वादम् एवं सामान्येनोक्ता विशेष
तो निर्दिशति आत्मबुद्धिप्रसादजमिति आ
त्मनः परतत्त्वस्य बुद्धेः सम्यग्बोधस्य वैशद्याज्जा
तं एवंविधं यत्सुखमानंदं तत्सात्विकं प्रोक्
तमुपदिष्टं राजसं सुखमाह ३७ ॥ विषयेंद्रि
यसंयोगाद्यत्तदग्रेऽमृतोपमं परिणामे विष
मिव तत्सुखं राजसं स्मृतम् ॥ विषयाणां श
ब्दादीनामिंद्रियाणां श्रोत्रादीनां च संयोगा
त्संबंधाद्यत्तत्प्रसिद्धं स्त्रीसंगादिसुखमग्रे
उपभोगवेलायां सुधारसतुल्यं परिणामे
पर्यंते उपभोगाभावे विषमिव पश्चात्तापा
द्यनंतदुःखहेतुत्वात् तत्सुखं राजसं स्मृतं
तामसं सुखमाह ३८ ॥ यदग्रे चानुबंधे च सु
खं मोहनमात्मनः निद्रालस्यप्रमादोत्थं
तत्तामसमुदाहृतम् ॥ निद्रायाइंद्रियव्या
पारोपरमादालस्यात्प्रमादादनवधानाच्च

ज्ञानमपेक्षादावप्यनुवंधेपस्मादपिआत्मनो
मोहनंविस्मृतिकारणंयत्सुखंतेनतामससुखदा
एतं तत्वाभ्यासादमतेयत्रेत्यादावात्मसमा
धिजसुखोदीनांसात्विकत्वेननिर्देशोनुचित
आत्मनोनिर्गुणत्वादित्याशंक्याह ३९ ॥ न
तदस्तिपृथिव्यांवादिविदेवेषुवापुनः सत्वंप्र
कृतिजैर्मुक्तंयदेभिःस्यात्त्रिभिर्गुणैः ॥ यत्सत्वं
प्राणिमात्रंयोगिलक्षणमस्मानिलक्षणंवाप्र
कृतिजैरेभिरुक्तंत्रिपेक्षिभिःसत्वादिभिर्गुणैर्मु
क्तंयत्कमस्तीतिसंभाव्येत नतत्पृथिव्यां
मनुष्येषुदिविस्वर्गलोकेदेवेषुवापुनःअन्य
स्मिंलोकेवानास्त्येव अतोदेहधारयतोहियो
गिनोपिसुखस्वपिसत्वादिगुणानामनतिक्र
मणादात्मसमाधिजसुखस्यसात्विकत्वेवनि
र्देष्टुंशक्यं अन्यथाप्रत्यभिज्ञालक्षणज्ञान
प्रास्यवसरेएवप्राकृतस्यदेहस्यपातप्रसक्तिः
नचैवं तस्मादेवमनुमीयते यथायथात्म
समाधानस्याभ्यासेनोत्तरोत्तरमुत्कर्षःतथा
तथाप्रकृतेःक्षीणत्वमुपजायतेयावन्मुक्ति
रूपपदेन एवंसात्विकानामुत्कृष्टतामुक्त्वा

205

पुनाराजसानांसंसारोत्तरणायवर्णाश्रमोचि
तेनस्वकर्मणाईश्वराराधनरूपंज्ञानोत्पत्त्यु
पायंवर्णयित्वेतावद्वर्णविभागेनकर्मप्रस्तौ
ति ४०॥ ब्राह्मणक्षत्रियविशांशूद्राणांचप
रंतप कर्माणिप्रविभक्तानिस्वभावप्रभवैर्गु
णैः॥ स्वभावात्स्वस्वरूपविस्मरणरूपाज्जीव
त्वहेतुभूतात्तथानाद्योत्पभवउद्रेकेणवि
भवोयेषांतैःसत्वादिभिरुपलक्षणभूतैर्ब्रा
ह्मणानांक्षत्रियाणांविशांशूद्राणांचकर्माणि
प्रविभक्तानिमयाविभागेनकथितानि तत्र
सत्वप्रधानाब्राह्मणाः सत्वोपसर्जनरजःप्र
धानाःक्षत्रियाः तमउपसर्जनरजःप्रधाना
वैश्याःरजउपसर्जनतमःप्रधानाःशूद्राः
तत्रब्राह्मणस्यस्वाभाविकानिकर्माण्याह
४१॥ शमोदमस्तपःशौचंक्षान्तिरार्जवमे
वच ज्ञानंविज्ञानमास्तिक्यंब्रह्मकर्मस्वभाव
जम्॥ शमश्चित्तोपरमोदमोबाह्येंद्रियोपर
मः तपःपूर्वोक्तंशारीरादिशौचंबाह्याभ्यंतरं
क्षांतिःक्षमाआर्जवंसरलताज्ञानंशास्त्रीयंवि
ज्ञानमनुभवः आस्तिक्यमास्तिकमतिपर

गी॰टी॰ २०९

लोकश्चेति मतिः एतच्च स्वभावाज्जातं शमादि
ब्राह्मणस्य कर्म क्षत्रियस्य स्वाभाविकं क
र्माह ४२॥ शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्य
पलायनं दानमीश्वरभावश्च क्षात्रं कर्म स्व
भावजम् ॥ शौर्यं पराक्रमः तेजः प्रागल्भ्यं धृ
तिर्धैर्यं दाक्ष्यं कौशलं युद्धे चाप्यपलायनमप
राङ्मुखता दानमौदार्यं ईश्वरभावो नियमन
शक्तिः एतत्स्वभावजं कर्म क्षत्रियस्य वैश्य
शूद्रयोः कर्माह ४३॥ कृषिगोरक्ष्यवाणिज्यं
वैश्यकर्म स्वभावजं परिचर्यात्मकं कर्म शू
द्रस्यापि स्वभावजम् ॥ कृषिः कर्षणं गा र
क्षतीति गोरक्षस्तस्य भावो गोरक्ष्यं पाशुपा
ल्यमित्यर्थः वाणिज्यं क्रयविक्रयादि एत
द्वैश्यस्य स्वभावजं कर्म त्रैवर्णिकपरिच
र्यात्मकं कर्म शूद्रस्यापि स्वभावजं यदर्थमे
षकर्मविभागः तत्फलमाह ४४॥ स्वे
स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः स्व
कर्मनिरतः सिद्धिं यथा विन्दति तच्छृणु॥
स्वस्वाधिकारविहितेन कर्मणाभिरतः स
क्तस्त्रैवर्णिकः पुरुषः संसिद्धिं ज्ञानाधि

206

गमः सर्वं तदुत्कर्षं लभते तत्रापि प्रकारमाह स्वा
येन स्वकर्मनिरत इति स्वकर्मपरिनिष्ठितो येन
प्रकारेण सिद्धिं तत्त्वज्ञानं लभते तदभिधीयमा
नं शृणु ४५ ॥ यतः प्रवृत्तिर्भूतानां येन सर्व
मिदं ततम् स्वकर्मणा तमभ्यर्च्य सिद्धिं विंद
ति मानवः ॥ तमीश्वरं स्वकर्मणा प्रतिवर्णाश्र
मं विहितेनाभ्यर्च्य परितोषमानवः सिद्धिं तत्त्वज्ञा
नं लभते नेकमिति तमीश्वरं सामान्यतो दृष्टेना
नुमापयति यतः प्रवृत्तिरिति यतः श्रीपरमेश्व
राद्भूतानां प्राणिनां प्रवृत्तिः प्रसरो भवति येन
चेश्वरेणेदमिदं तावधार्यं सर्वं जडरूपं जगत्तत
व्याप्तम् यतः स्वधर्म एवमनुष्ठाणामीश्वरप्र
सादहेतुरतः ४६ ॥ श्रेयान्स्वधर्मो विगुणः प
रधर्मात्स्वनुष्ठितात् स्वभावनियतं कर्म कुर्व
न्नाप्नोति किल्बिषम् ॥ परधर्मात्सकाशाद्विगु
णोप्यप्रशस्तोपि स्वधर्मो वर्णाश्रमविभागेना
त्मीयो धर्मः सम्यगनुष्ठितात्परस्य विजातीयस्य
धर्मोदाचाराच्छ्रेयान्प्रशस्यतरः न च बंधुवधा
दिदुःखाद्युद्रेकः स्वधर्मात्सकाशाद्विलाटना
दिपरधर्मः श्रेष्ठ इति मंतव्यं यतः स्वभावानुसा

रेण नियतं शास्त्रेण वर्णाश्रमविभागतो नि
यंत्रितं कर्म कुर्वन्किल्बिषं पापं बंधुवधादिनिमि
त्तं नाप्नोति सदोषमपि सहजं कर्म विषक्रिमि
न्यायेन कर्तुर्दोषकरं न भवतीत्याह ४७ ॥ स
हजं कर्म कौंतेय सदोषमपि न त्यजेत् सर्वा
रंभा हि दोषेण धूमेनाग्निरिवावृताः ॥ सहजं
जन्मना सहैव शास्त्रेण विहितं कर्म युद्धादि
सदोषमपि हिंसादिदोषयुक्तमपि न त्यजेत्
नैव त्याज्यं न तु हिंसादिदोषयुक्तात्स्वधर्माद्
विशुद्धादेः सकाशाद्भिक्षादिचर्यैव दोषरहि
ता श्रेयसीत्याशंक्याह सर्वारंभा इति सर्वारं
भा वर्णानामाश्रमाणां च विभागेनोक्तानि स
र्वाणि कर्माणि केनचिद्दोषेणाव्यभिचारिणा
वृता व्याप्ताः सहजेन धूमेनाग्निरिव अथ सर्व
गीतार्थसंग्रहं चिकीर्षया प्रस्तौति ४८ ॥ अ
सक्तबुद्धिः सर्वत्र जितात्मा विगतस्पृहः नैष्क
र्म्यसिद्धिं परमां संन्यासेनाधिगच्छति ॥ जितः
प्रत्यवमर्शेन वशीकृत आत्मा स्वस्वभावो येन
स जितात्मा पुरुषः नैष्कर्म्यस्य ज्ञानकाष्ठाधिरो
हेण सर्वकर्मोपरमरूपां सिद्धिं निष्पत्तिं परमाम

207

स्पृहः सो संन्यासेन सर्वोफलत्यागेनानुष्ठाने ·टि·गी·
सतिकर्मफलयोः संकल्पत्यागेनाधिगच्छति २०६
प्राप्नोति किंविधः संजितात्मा इति विशेषण
द्वारा संन्यासमेव विवृणोति असक्तबुद्धिरि
ति सर्वत्र विहितेष्वाभाविके वा कर्मण्यसक्ता
आतिमच्या बुद्धिरंतःकरणं यस्य तथा विगता
पोत्ताफलविषयास्पृहाभिलाषो यस्य सः अयु
नातह्याभक्रमं विवृत्तराह ४९ ॥ सिद्धिं प्राप्तो
यथा ब्रह्म तथाप्नोति निबोध मे समासेनैव कौं
तेय निष्ठा ज्ञानस्य या परा ॥ सिद्धिं ज्ञानस्य परम
पुरुषार्थं यथा येन प्रकारेण प्राप्नो योगी ब्रह्म निरू
मरंतममाप्नोति व्याप्नोति तथा तेन प्रकारेण
वक्ष्यमाणेन मेव चनान्निबोधावधारय किंत
समासेनैव संक्षेपेणैव स्वर्वं विस्तरेणोक्तवात्
कौ सिद्धिमिति सिद्धेर्लक्षणमाह निष्ठेति यासि
द्धिर्ज्ञानस्याद्वैतलक्षणस्य परा निष्ठा पर्यंतका
ष्टा अथ प्रतिज्ञात ज्ञानकाष्ठा प्राप्तिक्रममाह
त्रिभिः ५० ॥ बुद्ध्या विशुद्धया युक्तो धृत्यात्मानं
नियम्य च शब्दादीन्विषयांस्त्यक्त्वा रागद्वेषौ व्यु
दस्य च ॥ विशुद्धया देहाद्यभिमानेनाकलंकि

तयाबुद्ध्यात्मबोधेनयुक्तः संवद्धोयोगीशब्दादी
न्विषयांस्त्यक्त्वाविहाय तत्त्यागप्रकारमाह रा
गद्वेषौव्युदस्यचेतिरागद्वेषौनिरसनेनेत्यर्थः
नहिंद्रियसुखस्यपरमेणापित्यागायारणयादार्ढ्ये
नात्मानंस्वस्वभावंनियम्योत्पत्त्यवमर्शेनवशी
कृत्यवुद्ध्यानेएवंविधः सन्ब्रह्मभूयायकल्प
ते इतितृतीयेनान्वयः किंच ५१ ॥ विविक्त
सेवीलघ्वाशीयतवाक्कायमानसः ध्यानयो
गपरोनित्यंवैराग्यंसमुपाश्रितः ॥ नित्यंप्र
तिदिनंध्यानयोगपरोध्यानयोगेवहुध्याय
त्प्रपंचितेतत्परः ध्यानयोगस्योपलक्षणंप्रामा
रु विविक्तसेवीत्यादि विविक्तस्वभावतः संस्का
रतोवाशुद्धंविजनंचदेशंसेवितुंशीलमस्येत
थालघ्वाशीमितभोजी तथायतानिस्वछंदेरु
परामितानिवाक्कायमानसानियेनसः तथा
ध्यानाविच्छेदार्थंवैराग्यंसम्यगुपाश्रितः त
था ५२ ॥ अहंकारंवलंदर्पंकामंक्रोधंप
रिग्रहम् विमुच्यनिर्ममःशांतोव्रह्मभूयाय
कल्पते ॥ अहंकारमहंसर्वोत्कृष्टइत्येवम
भिमानंवलदुराग्रहंदर्पमदंकाममभिलाषं

208

क्रोधंपरिग्रहंचत्यक्त्वादारादीनांममतयास्वीकारमि
त्येतत्सर्वमात्मविश्रांतेःप्रतिबंधकंत्यक्त्वाह
त्यैवंसर्वत्रममताशून्यःतथाशांतएवंनित्या
त्मशीलनेनसर्वविकल्पोपशमरूपोशांतिंप्रा
प्तोब्रह्मभूयायदेहपातानंतरंब्रह्मभावायक
ल्पतेयोग्योभवति एवंविधस्यमहिमानमाह
५३ ॥ ब्रह्मभूतःप्रसन्नात्मानशोचतिनकांक्ष
ति समःसर्वेषुभूतेषुमद्भक्तिंलभतेपराम् ॥
एवंविधःप्रसन्नात्माप्रसन्नोदेहाद्यभिमानक
लंकशून्यआत्मास्वस्वभावोयस्यसब्रह्मभूतो
भाव्यपिब्रह्मत्वंप्राप्तएवविनष्टंनशोचतिअप्रा
प्तंचनकांक्षति नन्वेवंविधेनयोगिनांजीव
द्दशायामेवाकिमितिब्रह्मत्वंनप्राप्तमित्याशं
क्याह ममइति सर्वेषुब्रह्मादिस्थावरांतेषु
भूतेषुद्वयएवयोगीसमःचिदात्मरूपसाम्यप्रा
प्तः सएवपरांश्रेष्ठांमद्भक्तिंममेश्वरस्यभक्तिंस
र्वात्मकोहमितिजडवर्गव्यापिरूपाद्युपासनां
लभतेनतुमितयोगीयतः ५४ ॥ भक्त्यामाम
भिजानातियावान्यश्चास्मितत्त्वतः ततोमांत
त्त्वतोज्ञात्वाविशतेतदनंतरम् ॥ यावान्स

र्व्यापीत्यनेनेत्यर्थः यश्चास्मि सच्चिदानंदघन
स्तत्वतः परमार्थतोस्मि तादृशमेव मामीश्वरं
भक्त्या सर्वात्मत्वलक्षणेनोपासनेनाभिजा
नात्यात्मत्वेन प्रत्यगभिजानाति ततः प्रत्यगभि
ज्ञानेनतरं मामीश्वरं तत्वतः सम्यग्निरवशेष
तया ज्ञात्वा प्रतिपद्य जीवन्नेव मुक्तिमनुभूय
तदनंतरं सम्यग्निरवशेषतया प्रतिपत्त्य
नंतरं मामीश्वरमभेदेन समाविशते ऽहमे
व सर्वात्मक ईश्वरः संपद्यते इत्यर्थः एवमा
त्मबोधयुक्तस्य निस्तारोपायमुक्त्वा वोधर

हितस्यापि तमाह ५५ ॥ सर्वकर्माण्यपि
सदा कुर्वाणो मद्व्यपाश्रयः मत्प्रसादादवा
प्नोति शाश्वतं पदमव्ययम् ॥ मद्व्यपाश्रयो
मामीश्वरमेकंकृष्णं परमेण प्रेम्णाश्रितवा
न्सर्वाणि विहितानि नित्यनैमित्तिककाम्य
रूपाणि प्रतिषिद्धानि स्वाभाविकानि च कर्मा
णि कुर्वन्नपि ममेश्वरस्य प्रसादादनुग्रहाच्छा
श्वतं नित्यमव्ययमविनाशि पदं मोक्षाख्यं
धाम ज्ञानप्राप्तिद्वारा प्राप्नोति एवमर्जुना
य श्रीगीताशास्त्रमुपवर्ण्याधुनाधिकारात्

सोऽहं तं नियोजयति ५६ ॥ चेतसाः सर्व
कर्माणि मयि संन्यस्य मत्परः बुद्धियोगमुपा
श्रित्य मच्चित्तः सततं भव ॥ सर्वाणि विहिता
नि शारीरितान्यभिचारीणि च कर्माणि विवेक
युक्तेन मनसा मयीश्वरे उत्क्रम्य समर्प्य म
त्परो मदेकशरणः सन्बुद्धियोगं कर्माणि क्रिय
माणेप्यात्मबोधे समाधानरूपमाश्रित्य स्वीकृत्य
मच्चित्तो मयीश्वरात्मनि चित्तं यस्य तादृशः सत
तं सर्वास्ववस्थास्वव्यावहारिकीष्वपि भव यतः
सततं मच्चित्तस्त्वस्यायं प्रभाव इत्याह ५७ ॥
मच्चित्तः सर्वदुर्गाणि मत्प्रसादात्तरिष्यसि अ
थ चेत्त्वमहंकारान्न श्रोष्यसि विनंक्ष्यसि ॥
मच्चित्तो मयीश्वरात्मनि चित्तं यस्य स एवंविधः
सन्सर्वाणि दुर्गाणि देहाद्यात्मप्रत्ययादी
न्याध्यात्मिकादिदुःखानि च ममेश्वरस्य प्र
सादात्स्वरूपप्रकाशनरूपादनुग्रहात्तरि
ष्यसि प्रयत्नं विनैवानायासेनातिक्रमिष्यसि
व्यतिरेके दोषमाह अथ चेद्यदि त्वमहं
काराद्देहाद्यात्मप्रत्ययाभिनिवेशान्न श्रोष्य
सि मत्कृतानानुशासनानि नहि विनंक्ष्यसि शास्त्रा

गी॰टी॰

२९

210

दपि बुद्धियोगादुत्पन्नात्मबोधोपि विस्म
तिपर्यंयास्यतीत्यर्थः नन्वात्मबोधाविर्भाय
त्वच्चित्तएव कालमतिवाहयेयमिति चेत्तन्नयु
द्धादिकारणमित्याशंक्याह ५८ ॥ यदहंका
रमाश्रित्य न योत्स्य इति मन्यसे मिथ्यैव व्यव
सायस्ते प्रकृतिस्त्वां नियोक्ष्यति ॥ अहंकारम
पि युध्यमाने सति युद्धेचदतेत्येवं कर्तृत्वाभि
मानमवलम्ब्य युद्धे न करिष्यामीति यत्त्वं मन्य
से एष व्यवसायस्ते व्यवसायो निश्चयो मिथ्यै
व निष्फल एव प्रकृत्यधीनत्वात्तव तदेवाह
यतः प्रकृतिरुक्तलक्षणा रजोगुणेन प्रकृति
स्वभावान्नियोक्ष्यति प्रवर्त्तयिष्यत्येव नके
वलं यत्र तत्र कर्माणि प्रवर्त्तयिष्यति यावत्स्व
भावनियत एवेत्याह ५९ ॥ स्वभावजेन कौं
तेय निबद्धः स्वेन कर्मणा कर्त्तुं नेच्छसि य
न्मोहात्करिष्यस्यवशोपि तत् ॥ हे कौंतेय स्व
भावात्प्रकृतेराविर्भूतेन स्वकीयेन शौर्यादि
लक्षणेन कर्मणा प्रवृत्त्या निबद्धो नियंत्रित
स्त्वं यत्कर्म युद्धादिलक्षणं प्रकृतिं मोहाद
विवेकात्कर्त्तुं नेच्छसि अवशोप्यस्वतंत्र एव

संसक्तकर्मकरिष्यस्येव प्रकृत्यधीनत्वात्
किंबहुनोक्तेनाधुनोपदेशसर्वस्वंशृणुवित्या
ह ६०॥ ईश्वरःसर्वभूतानांहृद्देशेऽर्जुनति
ष्ठति भ्रामयन्सर्वभूतानियंत्रारूढानिमाय
या॥ ईश्वरोंतर्यामीसर्वेषांचतुर्दशविधा
नांभूतानांप्राणिनांहृद्देशेसर्वसंविदभिक
रणेहृदयैकदेशेतिष्ठत्यप्रच्युतज्ञानबलवीर्य
एवास्थितिंबभाति किंकुर्वंस्तिष्ठति यंत्रा
रूढानिदेहमेवयन्त्रंचक्रमारूढानिमाया
निसर्वाणिभूतानिजीवात्मायथानिशल्याध्या
मयन्स्वादात्म्याध्यासेनमोहयन् अथतादा
त्म्याध्यासाडनितोघोरूपायमाह ६१॥ त
मेवशरणंगच्छसर्वभावेनभारत तत्प्रसा
दात्परांशांतिंस्थानंप्राप्स्यसिशाश्वतम्॥
हेभारततमेवहृद्देशास्थितमीश्वरंसर्वभा
वेनसर्वात्मनाशरणंगच्छउपाःस्वतस्येवे
श्वरस्यप्रसादात्स्वरूपप्रकाशनरूपादनुग्र
हात्परामत्युत्कृष्टांशांतिंसर्वविकल्पोपर
मंप्राप्स्यसिजीवद्दशायाम् देहपातेनशा
श्वतंस्थानंमोक्षाख्यंचप्राप्स्यसि सर्वगीता

उ॰गि॰ १९

र्थमुपसंहरन्नाह ६२ ॥ इतितेज्ञानमाख्या
तंगुह्याद्गुह्यतरंमया विमृश्यैतदशेषेणय
थेच्छसितथाकुरु ॥ इत्युक्तेनप्रकारेणम
यासर्वज्ञेनपरमकारुणिकेनश्रीपरमेश्वरे
णतेतुभ्यंभक्तायज्ञानंगभीकृतबुद्धियोगा
दिकमद्वैतलक्षणमाख्यातमुपदिष्टम् कथं
भूतंगुह्याद्रहस्यान्मंत्रनिरोधयोगादिज्ञाना
दपिगुह्यतरम् नातःपरंकिंचिद्रहस्यंव
क्तव्यमस्तीति एतन्मयोपदिष्टंगीताशास्त्र
मशेषतःसामस्त्येननत्वेकदेशेनविमृश्य
पर्यालोच्यस्वाधिकारानुसारेणयथेच्छसि
तथातथैवप्रकारेणकुरु अनुतिष्ठ अति
गंभीरंगीताशास्त्रमशेषतः पर्यालोचयि
तुमशक्नुवंतःकृपयातस्यसारंसंक्षिप्यक
थयितुंप्रतिजानीते ६३ ॥ सर्वगुह्यतमंभू
यःशृणुमेपरमंवचः इष्टोसिमेदृढमति
ततोवक्ष्यामितेहितम् ॥ सर्वेभ्योगुह्येभ्यो
गुह्यतमंपरममत्युत्कृष्टमेववचस्तत्रतत्रोक्त
मपिभूयःपुनरपिवक्ष्यमाणंशृणु पुनःपु
नःकथनेहेतुमाह इष्टमत्यंतंमेममेष्टः

प्रियोसीति मत्वा ततएव हेतोस्ते हितं वक्ष्या
मि यद्वा त्वं मम प्रेष्टोसि मया वक्ष्यमाणं च हि
तं प्रमाणेनापि तेन मितिनिश्चित्य ततस्ते वक्ष्या
मीत्यर्थः प्रतिज्ञातमर्थमाह ६४ ॥ मन्मना
भव मद्भक्तो मद्याजी मां नमस्कुरु मामेवैष्य
सि सत्यं ते प्रतिजाने प्रियोसि मे ॥ एवं विधो
ममेश्वरस्य भक्त उपासको भव कीदृशो मन्म
नाः मयि प्रतीचि मनो मननात्मकमंतःकर
णं यस्य स तथा मद्याजी मदर्पणार्थमेवाको
पपत्त्या यजनशीलः यजनमत्र सर्वस्य का
यिकस्य कर्मण उपलक्षणम् तथा मामीश्वरं
सामान्यस्यत्वं समष्टिरूपं नमस्कुरु नमस्का
रोत्र वाचिकस्य कर्मण उपलक्षणम् एवं म
नोवाक्कायव्यापारैर्मदेकनिष्ठस्त्वं मामे
वेश्वरमेष्यस्यपेष्यसि अत्र च संशयं माका
र्षीः त्वं हि मे प्रियोसि प्रियस्य प्रतारणे नोचि
तेति भावः अतः सत्यं यथा भवत्येवं त्वभ्यं प्र
तिजाने प्रतिज्ञां करोमि किंच ६५ ॥ सर्वध
र्मान्परित्यज्य मामेकं शरणं व्रज अहं त्वां स
र्वपापेभ्यो मोक्षयिष्यामि मा शुच ॥ सर्वा

न्वर्णाश्रमविभागेनोक्तान्धर्मानाचारान्परि
त्यरित्यज्यप्युक्तान्वावज्ञापनेधर्मएवेत्यवंशरणा
त्वेनविज्ञायमामेकमीश्वरंशरणंव्रजअनुस
र्थमुक्तम्ब्रह्मोमास्त्व यथाहिजितोविशोःपुरु
षस्यमहत्तान्सर्वान्भोगान्विज्ञायानेनसर्वथा
भाव्यमित्युक्तौजीवनहेतोरन्नस्यावश्यकता
गम्यतेनान्येषामहभोगानां ननन्वत्रयदुक्तो
पनतानांमहभोगानांपरिहारोविवादितः
एवमत्रमुमुक्षोर्भगवदुपासनमवश्यानुष्ठे
यतयोपदिष्टंनतुधर्माणांसर्वथात्यागोवि
वक्षितः एवंवर्तमानस्यमेकदाचित्कर्मत्या
गनिमित्तंपापंस्यादितिमाशुचः शोकंमाका
र्षीः यतस्त्वामदेकशरणंसर्वपापेभ्योऽहंमो
क्षरोमोचयिष्यामि एवंगीतार्थमुपदिश्य
तत्संप्रदायप्रवर्तनेनियममाह ६६ ॥ इदं
तेनातपस्कायनाभक्तायकदाचन नचाशु
श्रूषवेवाच्यंनचमांयोभ्यसूयति ॥ इदंश्री
गीतातत्त्वंतेत्वयातपस्कायशारीरादित्रिवि
धतपोहीनायस्वधर्मानुष्ठानहीनायवाकदा
चिदपिनवाच्यम् तथाविनेष्यभक्तायगुरो

श्रीपरमेश्वरे च भक्तिहीनाय च न वाच्यम्
तपास्विने भक्तायाप्यशुश्रूषवे परिचराम्
कुर्वते श्रोतुमनिच्छते वा न वाच्यम् तथा मां
श्रीपरमेश्वरं योभ्यसूयति मनुष्यदृष्ट्यादो
षारोपणान्निन्दति तस्मै च न वाच्यम् एतैर्दो
षैर्विरहितेभ्यो भक्तेभ्यो गीताशास्त्रोपदेष्टुः
फलमाह ९७॥ य इदं परमं गुह्यं मद्भक्तेष्व
भिधास्यति भक्तिं मयि परां कृत्वा मामेवैष्य
त्यसंशयः॥ यः कश्चिन्मयीश्वरे परामनवच्छि
न्नतयात्युत्कृष्टां भक्तिमुपासनां कृत्वा स्वयमा
त्मसात्कृत्वेदमावयोः संवादरूपं परमरह
स्यं मम भक्तेषु परप्रेमयुक्तेष्वभिधास्यत्युपदे
क्ष्यति ततोसंशयः देहाद्यभिमानरहितः
सन्मामेवेश्वरं प्राप्स्यति किंच ९८॥ न च त
स्मान्मनुष्येषु कश्चिन्मे प्रियकृत्तमः भविता
न च मे तस्मादन्यः प्रियतरो भुवि॥ तस्मादेवं
विधान्नरोत्तमात्सकाशात्कश्चिदपि मनुष्ये
षु प्रियकृत्तमोत्यंतं परितोषकर्ता नास्ति न
च कालांतरे भविता भविष्यति ममापि तस्मा
दन्यः प्रियतरोधुना भुवि तावन्नास्ति न च कालां

तोऽभविताभविष्यति ममापितस्मादन्यःप्रि
यतरोभुवनाभुविताबभूमिनचकालांतरेभवि
ष्यतीत्यर्थः गीतार्थार्थमनुध्यमानस्यापवदत
एवफलमाह ६९ ॥ अध्येष्यतेचयइमंधर्म्यं
संवादमावयोः ज्ञानयज्ञेनतेनाहमिष्टःस्या
मितिमेमतिः ॥ आवयोःसंवादमिमंधर्म्यंध
र्मादनपेतंयोऽध्येष्यतेपठिष्यति तेनपुरुषेण
ज्ञानयज्ञेनोक्तलक्षणेनसर्वयज्ञेभ्यःश्रेष्ठेनै
ष्टःपूजितःस्यांभवेयमितिमेमतिर्निश्चयः
अध्ययनासमर्थस्यश्रद्धयाश्रवणतःफलमाह
७० ॥ श्रद्धावाननसूयश्चशृणुयादपियोन
रः सोपिमुक्तःशुभांल्लोकान्प्राप्नुयात्पुण्यक
र्मणाम् ॥ अवइंजपन्नुश्चेर्जपत्येवमसूया
रहितोयोनरःसोपिपापेभ्योमुक्तोऽश्वमेधा
दियाजिनांपुण्यकर्मणांशुभान्सत्वोत्पदीप्तां
तांल्लोकान्भुवनानिप्राप्नुयात् सम्यक्प्रतिपा
दितस्यज्ञानस्यबोधाबोधजिज्ञासयार्जुनमा
ह ७१ ॥ कच्चिदेतच्छ्रुतंपार्थत्वयैकाग्रेण
चेतसा कच्चिदज्ञानसंमोहःप्रणष्टस्तेध
नंजय ॥ हेपार्थत्वयैकाग्रेणानन्यविष

213

येण चेतसा एतन्मयोक्तं कच्चिदपि नाम स्फुत
मवधारितम् तथाज्ञानात्तत्वाप्रतिपत्तेर्यः
संमोहो देहाद्यात्मप्रत्ययोपि नाम प्रकर्षेण
नष्टः अत्र सत्युत्तरमर्जुन उवाच ७२ ॥ नष्टो
मोहः स्मृतिर्लब्धा त्वत्प्रसादान्मयाच्युत स्थि
तोस्मि गतसन्देहः करिष्ये वचनं तव ॥ हेअ
च्युत न वा त्वय ह्यात्मोहो देहाद्यात्मप्रत्ययो न
ष्टोधुनाः स्मृतिरनुभूतस्यापि केनचिदंतराये
ण विस्मृतिपथमुपनतस्यात्मनोनुसंधानरू
पा लब्धा प्राप्ता नागतसन्देहो नष्टदेहाहंभावः
स्थितोस्म्यात्मनि विश्रांतोस्मि तव वचनं यथो
क्तमात्मज्ञाननिष्ठतया युद्धलक्षणं स्वधर्मानु
ष्ठानोपदेशात्मकं करिष्ये तदेवं धृतराष्ट्रप्र
ति श्रीकृष्णार्जुनसंवादं कथयित्वा प्रस्तुतं क
थामनुसन्दधानः संजय उवाच ७३ ॥ इत्य
हं वासुदेवस्य पार्थस्य च महात्मनः संवादमि
मममश्रौषमद्भुतं रोमहर्षणम् ॥ रोमहर्षणं
रोमांचकरं संवादमश्रौषं श्रुतवानहम् स्प
ष्टमन्यत् व्यवहितस्यापि भगवदर्जुनसंवा
दस्य श्रवणयोग्यतामात्मन आह ७४ ॥

व्यासप्रसादाच्छ्रुतवानेतद्गुह्यमहं परम्
योगं योगेश्वरात्कृष्णात्साक्षात्कथयतः स्वयं ॥
व्यासमहर्षेर्दिव्यचक्षुःश्रोत्रादिदानरूपा
त्प्रसादादेतत्परमरहस्यमहं श्रुतवानस्मि
किं तदित्यपेक्षायामाह परं निरतिशयं यो
गं कर्मानुष्ठानेष्यात्मसमाधानरूपं कस्माच्छ्रु
तवानित्याह यदुकुलावतीर्णाच्छ्रीपरमेश्व
रात्कृष्णात्स्वामियानायोगेश्वराद्योगंदातुंशक्ता
त्स्वयमेवात्मनैवसाक्षादव्यवधानेनकथय
तोऽर्जुनायोपदिशतः केचित्साक्षादेवाहं श्रुत
वानस्मि न परम्परयेति व्याचक्षते इममिति
पुंलिंगपाठमप्याहुः किंच ७५ ॥ राजन्संस्मृ
त्य संस्मृत्य संवादमिममद्भुतम् केशवार्जु
नयोः पुण्यं हृष्यामि च मुहुर्मुहुः ॥ हे राजन्धृ
तराष्ट्र केशवार्जुनयोः पुण्यं पापहरं इममम
त्यद्भुतं संवादं संस्मृत्य संस्मृत्य वारंवारं हृष्या
मि रोमांचितो भवामि हर्षं प्राप्नोमि वा किंच
७६ ॥ तच्च संस्मृत्य संस्मृत्य रूपमत्यद्भुतं ह
रेः विस्मयो मे महान्राजन्हृष्यामि च पु
नः पुनः ॥ तच्चेति विश्वरूपं निर्दिशति स

ष्टमन्यत येनाभिप्रायेण कुरुपांडवसैन्य
योर्जयपराजयजिज्ञासा सञ्जयेणाधृतराष्ट्रः पृ
ष्टवांस्तत्र निश्चयमाह ७७ ॥ यत्र योगेश्वरः
कृष्णो यत्र पार्थो धनुर्धरः तत्र श्रीर्विजयो भू
तिर्ध्रुवा नीतिर्मतिर्मम ॥ यत्र पक्षे योगमाये
श्वरः श्रीकृष्णो वर्त्तते यत्र च पार्थो गांडीवधन्व
र्धरस्तत्र पक्षे श्री राज्यलक्ष्मीस्तत्रैव विजयः सक
लविपक्षाभिभावकत्वं तत्रैव च विभूतिरुत्त
रोत्तराभिवृद्धिर्नीतिर्नयोपि तत्रैव ध्रुवा निश्चि
तेति सर्वत्र संबध्यते इति मम प्रत्यस्तदृष्टकृ
ष्णार्जुनप्रभावातिशयस्य मतिर्निश्चय इत्योम्
७८ ॥ ॥ गीताशास्त्रं समस्तं योऽस्य समर्थोऽव
गाहितुम् संक्षिप्यतत्तदर्थं यः प्राकृतेनोमि
माधवम् ॥ शास्त्रानुसरन्याविवृतेः क्वचित्क
चित्तात्तात्कृतेः क्वाप्यंतमानतो ब्रह्मि प्रामा
णिकीत्याद्रियतां बुधाः सदा टीका न चैषा स्व
कपोलकल्पिता ॥ नास्मिन्कार्यैकौशलोऽस्मी
लनायत्न्योत्स्यर्थं वा लोभतो वा प्रवृत्तः किं
तु श्रीमन्माधवेनैव सोऽहमस्मात्तत्त्वः प्रेरितो
नः स्थितेन ॥ तस्माद्दुराख्याकृतौ क्वाप्यवी

ह्यस्मर्वोत्थोक्तौदोषदृष्टिर्नकार्या प्रेक्षावद्भि
स्तत्समाधेयमेतेपर्यालोच्यक्वापिचेद्विस्मृतं
स्यात् ॥ लक्ष्मीरामइतिद्विजोत्रनिवसन्क
श्मीरभूमण्डले मेरोर्मान्तरूपात्तदेहजनना
राज्ञानगोपालकात् श्रीशाकेद्विगुणाद्रि
भूपरिमितेमासेतिथावाश्विने शुक्लायांप्र
तिपद्यजोज्झितिरतोगीतासटीकाव्यधात्
इतिश्रीमहाभारतेशतसाहस्र्यांसंहितायां
वैयासिक्यांभीष्मपर्वणिश्रीभगवद्गीतासूप
निषत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृष्णार्जु
नसंवादेतत्त्वप्रकाशिकाख्यायांटीकायांरा
जानकलक्ष्मीरामविरचितायांमोक्षयोगोना
माष्टादशोध्यायः १८ ॥ सम्पूर्णसमाप्तं॥